CC0. In Public Domain, Digitizagtion by eGangotri

6.3

वसुधातलाव्यसकलप्रकारक-
सुखभुक्त्यनन्तरमनन्तपादयोः ।
पुरतो दधाति विनतालिमाशु या
कलयामि धेनुनिजरूपमातरम् ॥ ९ ॥

स्वकटाक्षलेशसुलभीकृताखिल-
क्षितिनायकत्वमुखसर्ववैभवाम् ।
निखिलत्रिलोककलिताङ्घ्रिचिन्तनां
कलयामि धेनुनिजरूपमातरम् ॥ १० ॥

निजपूर्विकातनुसमुत्थविक्रम-
हृतधर्मलङ्घिधरणीशसैनिकाम् ।
स्मृतिनाशितज्वरमुखाखिलामयां
कलयामि धेनुनिजरूपमातरम् ॥ ११ ॥

धिषणामलीमसलवातिदूरहृद्-
वनजातयोगिततिसेविताङ्घ्रिकाम् ।
वरदानभीतिहृतिपण्डितां सदा
कलयामि धेनुनिजरूपमातरम् ॥ १२ ॥

सुमनोगणैर्विधिहरामरेण्मुखैः
सुमनोहरैस्त्रिदिवभूमिजोद्भवैः ।
सुमनोभिरर्चितपदां निरन्तरं
कलयामि धेनुनिजरूपमातरम् ॥ १३ ॥

गणनाविहीनजनिमृत्युमण्डली-
पतितानतालितरिकाष्ठसंस्मृतिम् ।
परमार्थलम्भिशममुख्यदायिनीं
कलयामि धेनुनिजरूपमारम् ॥ १४ ॥

हृदयान्धकारवशसम्भवानता-
खिलपापमर्षणनिबर्हणप्रियाम् ।
निखिलाङ्गसंयुतमनोनिरोधदां
कलयामि धेनुनिजरूपमातरम् ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगोमातृस्तवः

[कोकिलानाराचम्]

अमरविनुतसौरभेयीपवित्रान्वयप्रोद्भवां
कलितचरणभक्तिकल्पाङ्घ्रिपां संसृतेर्मोचिनीम् ।
चरणविनतवाञ्छिताशेषकाम्यप्रदाङ्घ्रिस्पृशां
शरणमनिशमादरोद्रेकतो यामि गोमातरम् ॥ १ ॥

अचलकुशलकाङ्क्षकव्रातनम्यस्वपादव्रजान्
निखिलजगदवनमातृरम्यस्वचित्ताम्बुजाम् ।
शमनभयनिधूननाग्रहां कारुणीसागरं
शरणमनिशमादरोद्रेकतो यामि गोमातरम् ॥ २ ॥

दिविजनृपतिवल्लभावन्दितां देवराट्पूजितां
कनकसदनवल्लभावर्ष्मभूमुख्यसर्वेष्टदाम् ।
जननमरणपारहीनाम्बुधेः सत्वरं पारदां
शरणमनिशमादरोद्रेकतो यामि गोमातरम् ॥ ३ ॥

दिवसरमणवंशभूदिलीपादिपाण्यर्चितां
शिशिरकिरणवंशभूषायदूत्तंसदोर्लालिताम् ।
विनतविहितमानहीनाघराश्यम्बुधेः कुम्भजं
शरणमनिशमादरोद्रेकतो यामि गोमातरम् ॥ ४ ॥

अतुलमखिलरीतिधीर्वर्ष्मनैरोग्यबुद्ध्यैधना-
प्रभृतिगुणमनोहरस्वौधसक्षीरदध्यादिमाम् ।
प्रणतसकलकष्टनिर्मूलिनीमिष्टसंस्पर्शिनीं
शरणमनिशमादरोद्रेकतो यामि गोमातरम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगोवर्धनपीठाधीश्वरश्रीजगद्गुरु—

श्रीमधुसूधनतीर्थपञ्चरत्नमालास्तवः

[आर्या]

भवजलधिपारदातॄ-
न्नानाविधशास्त्रतत्त्वसारनिधीन् ।
श्रीमधुसूदनतीर्था-
न्वन्दे विश्वात्मतादिवैभवदान् ॥ १ ॥

पदनम्राखिलशिष्टा-
न्दापितभक्ताखिलेष्टसंपत्तीन् ।
श्रीमधुसूदनतीर्था-
न्वन्दे श्रितजनसमस्तपापघ्नान् ॥ २ ॥

अपनीतकृतान्तभया-
न्कृपणकृपाम्भोधिचित्तपाथोजान् ।
श्रीमधुसूदनतीर्था-
वन्दे वाञ्छितवितारणप्रीतान् ॥ ३ ॥

अरुणाम्बरवृतकाभा-
न्वरततिसंस्पर्शतुष्टहृदयाब्जान् ।
पङ्कजजित्वरहस्ता-
न्मधुघ्नसंज्ञान्भजामि धरणिगुरून् ॥ ४ ॥

श्राणितनतजनकाम्या-
न्दीनकृपामुखगुणावलीरम्यान् ।
मस्करिवरतति नम्या-
न्मधुघ्नसंज्ञान्भजामि धरणिगुरून् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगोवर्धनपीठाधिष्ठित–

श्रीजगद्गुरुश्रीशंकराचार्य—

श्रीमधुसूदनाख्यधरणीगुरुपस्तुतिः

[उल्लाला मात्रिकं वृत्तम्]

नियमाञ्चितं स्वचरणाम्बु-
जनिनतनिलिम्प (सुपर्व) भूरुहम् ॥
नौमि हृतभवभीप्रमुखं
मधुसूदनाख्यधरणीगुरुपम् ॥ १ ॥

अरुणाम्बरं नतजनेष्ट-
वरततिवितारणप्रियम् ॥
नौमि जितकमलाङ्घ्रियुगं
मधुसूदनाख्यवसुधागुरुपम् ॥ २ ॥

यमिपुङ्गवं स्वपदपद्म-
नतनिकरकाम्यदीपकम् ॥
नौमि शम (यम) मुख्यरम्यपतिं
मधुसूदनाख्यवसुधागुरुपम् ॥ ३ ॥

यतचेतसं प्रणतलोक-
शमनमुखभीनि (भीति) वारकम् ॥
नौमि नतकरुणाम्बुनिधिं
मधुसूदनाख्यवसुधागुरुपम् ॥ ४ ॥

तप उज्ज्वलं कनकमुख्य-
वितरणचणाङ्घ्रि सेवनम् ॥
नौमि यमिततिपूज्यपदं
मधुसूदनाख्यवसुधागुरुपन् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0: In Public Domain, Digitizagtion by eGangotri

विरतिप्रियं प्रणतकाङ्क्ष्य-
वरततिवितारिपत्स्मृतिम् ।।
नौमि भवजलधेर्घटजं
मधुसूदनाख्यवसुधागुरुपम् ।। ६ ।।

करुणात्मकं विहितनैज-
परमपुरुषाकृती (षत्ववी) क्षणम् ।।
भवभयहृन्नमनं
मधुसूदनाख्यवसुधागुरुपम् ।। ७ ।।

●

श्रीगोविन्दपादाचार्यस्तोत्रम्

[स्रग्धरा]

कारुण्यांबोधिचित्तान्क्षितिगुरुभगवच्छंकरार्यार्चिताङ्घ्रीन्
मुक्तिस्त्रीरत्नकान्तान् पदनतवरदान्हस्तिमुख्यार्थदांघ्रीन् ।
विद्याव्रातज्ञवर्यान् जितमतिसुलभान्नम्रहर्षाब्धिचंद्र-
श्रीमद्गोविन्दसंज्ञान् फणिकुलपनवाकारमीडेऽनुवेलम् ।। १ ।।

नम्राभीष्टस्पृगंघ्रीन्हरिशयनतनुं चन्द्रचूडांघ्रिभक्तं
शान्त्याद्युत्पत्तिभूमिं सुरवरविनुतं श्राणिताशेषऋद्धिं ।
योगिव्रातार्चितांघ्रिं सकलविभवदं गौडपादार्यशिष्यं
श्रीमद्गोविन्दसंज्ञान् फणिकुलपनवाकारमीडेऽनुवेलम् ।। २ ।।

ओंकारासक्ततुष्टं पदजितवनजं दत्तश्ववत्सुखालिं
पीयूषांशुप्रजाता तटनिकटलसत्स्वीयदिव्याश्रमाग्र्यं ।
कारुण्योद्रेककृत्तानमदखिलशुचं स्पृष्टसर्वेष्टजालं
श्रीमद्गोविन्दसंज्ञान् फणिकुलपनवाकारमीडेऽनुवेलम् ।। ३ ।।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगोविन्दगुरुस्तोत्रम्

[वियोगिनी]

सुरनम्यपदं भुजंगपं भगवत्पादनुतांघ्रिपंकजम् ।
विधुजाततटगं नयप्रदं हृदि गोविन्दगुरुं विभावये ॥ १ ॥

जगतीगुरुदेशिकप्रभं नतभुक्तिव्रजमुक्तिदायकम् ।
हरिभक्तिरतं गुणोज्ज्वलं हृदि गोविन्दगुरुं विभावये ॥ २ ॥

भवभीतिहरं नतेष्टदं विधुजातातटगं नयप्रदम् ।
दिननायकतुल्यवाससं हृदि गोविन्दगुरुं विभावये ॥ ३ ॥

करुणाजलधिं भयान्तकं जगतीदगुरुदेशिकप्रभम् ।
[करुणावरुणालयं नतो] हृदि गोविन्दगुरुं विभावये ॥ ४ ॥

श्रीगौडपादगोविन्दशंकरगुरुस्तुतिः

(विषममात्रिकं वृत्तम्)

मुक्तिस्त्रीमणिनिस्तुलकाम्यान्भक्तसुरद्रून्
मुद्रारञ्जितहस्ताब्जान्
सुरमुनिमणिगणनम्यान्कृपया पूर्णान्
वनजाङ्घ्रिमुखस्तुतपादान् ॥
वैराग्यादिमगुणमणिरम्यान्भुजगक्ष्मापति-
रुद्राद्यभिनवशिवमूर्तीन्
वन्दे श्रीमद्गौडपदाम्बुजगोविन्दाभिध-
शंकरभगवत्पादार्यान् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीगौडपादगोविन्दशंकरगुरुस्तवः

[उपजातिः]

वैराग्यचित्तप्रशमाक्षिनिग्रह-
मुख्याढ्यलभ्याङ्घ्रिसरःसमुद्भवान् ।
सरागहृद्दुर्लभपादवीक्षणान्
गौडाङ्घ्रिगोविन्दजगद्गुरून्भजे ॥ १ ॥

पादाम्बुसंजातविनम्रलोकदु-
र्मृत्यामयव्रातजरादिकृन्तनान् ।
चतुर्मठाचार्यपरम्परार्चितान्
गौडाङ्घ्रिगोविन्दजगद्गुरून्भजे ॥ २ ॥

क्षराक्षरातीतपुमुत्तमाकृति-
स्वकीयतत्त्वात्ममहारहस्यदान्
व्यासार्यतत्सूनुपरम्परागतान्
गौडाङ्घ्रिगोविन्दजगद्गुरून्भजे ॥ ३ ॥

श्रीगौडपादार्यस्तोत्रम्

[कोकिलानाराचम्]

विजितधिषणतत्त्वबोधप्रदस्वर्णजिष्णुच्छवे
विजितधिषणमौनिलोकार्चितव्यासजान्तेवसन् ।
विनतधरणिदेशिकेड्देशिकेण्णप्रपापापह
प्रभव विभवभूतये गौडपादार्य मे सन्ततम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(द्रुतविलम्बितम्)

शुकमहर्षिविनेयशिरोमणी-
न्प्रणतहर्षपयोधिपयोधिजान् ।
धरणिदेशिकदेशिकदेशिका-
न्परगुरून्हृदि गौडपदान्भजे ॥ १ ॥

(विषममात्रिकं वृत्तम)

विधिकमलेट्शिवाकृतिधरान्नतेष्टविभवप्रदान्-
निहतरुजानबोधहरणान्सरोजनिकरान् ।
विबुद्धनिखिलान्परमगुरून्क्षमागुरुपतेर्नतश्रमहरान्
विकारहरणान्कृतान्तभयहान्छमप्रदपदान् शुकायुकरजान् ।
हृदि कलयामि गौडचरणान् ॥ १ ॥

श्रीगौतमस्तोत्रम्

[हरिणी]

अजितनिजधीलभ्यान्याङ्घ्रि विरागिजनेक्षितं
त्रिदशनिकरस्तव्यज्ञानं जरापमृतापहम् ।
नतजनवचोधूतास्वप्नक्षितीश्वरदेशिकं
प्रणतजनताकारुण्याब्धिं भजे हृदि गौतमम् ॥ १ ॥

नगपतिसुताकान्ताहीन्द्रस्वतल्पनिजाकृतिं
नमदघचयोच्छेदासक्तं करिप्रमुखप्रदम् ।
विजितजलधृत्कायच्छायं सुनिव्रजसंस्तुतं
हृदयकलितब्रह्माकारं दधे हृदि गौतमम् ॥ २ ॥

विहितविनमत्काम्यस्पर्शं चतुःपुरुषार्थदं
क्षरतदितरातीताकारं नृपत्वमुखप्रदम् ।
त्रिभुवनतृणीकर्तृज्ञानं ज्वरादिनिवारकं
निहतनतिकृन्मूलाज्ञानं श्रये हृदि गौतमम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

करधृतजपस्रग्दण्डादि विकारनिवारकं
शममुखगणस्पृक्पादाब्जं सुपर्वनमस्कृतम् ।
विनतदुरितक्षान्त्यम्भोधिं श्रमव्रजकृन्तकं
यममुखभयव्रातघ्नाङ्घ्रिं दधे हृदि गौतमम् ॥ ४ ॥

●

श्रीगौरीस्तुतिः

[नाराचम्]

मदनतदनुसम्भवव्रातवश्योकृतस्वीयधी-
कुजननिकरदुर्लभस्वीयपादामृतप्रोद्भवाम् ।
विषयनिचयवासनालेशदूरस्वचित्तामृत-
प्रभवसुलभपादकीलालजां नौमि गौरीं मुदा ॥ १ ॥

कुलिशकरणपाशहस्ताश्रयास्यर्कचन्द्रानिल-
प्रभृतिविबुधपुङ्गवैर्नित्यमाराधितस्वाङ्घ्रिकाम् ।
चरणकमलसम्भवद्वन्द्वभक्तावलीवार्धकी-
कुमृतिमुखनिवारकस्वार्चनां नौमि गौरीं मुदा ॥ २ ॥

द्रविणरहितमन्दधीवंशचूडामणिश्चापिय-
च्चरणवनजधूलिलेशस्मृतिस्पर्शमुख्यैर्द्रुतम् ।
द्रविणपतिसुपर्वराड्देशिकाहङ्कृतिच्छेदक-
स्वधनधिषणतामवाप्नोत्यहो नौमि गौरीं मुदा ॥ ३ ॥

धरणिधरधवाधवप्रोद्भवस्वाङ्गतास्याष्ट्यक्त-
द्धरणिधरकठोरपीनेच्छ्रितो [रोज] सम्भवाम् ।
जननिधनघोरपाथोधिमग्नानमत्सञ्चया-
नुभवविषयशोकहृत्कारुणीसागरं नौम्युमाम् ॥ ४ ॥

द्विरदवदनमातृतायोग्यरीत्यास्ववक्षोजनु-
र्निहितनिखिलडम्बरीभूतकुम्भीन्द्रकुम्भद्वयोम् ।
विविधनिरययातनाप्रापकाघालिनिर्मूलक-
द्विरदमुखरमाप्रदस्वार्चनां नौमि गौरीं मुदा ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परमपुरुषसम्भवप्रोद्भवस्वासनक्षोणिभृ-
च्छयनसहजतास्फुटीकर्त्तृशीर्षप्रभवमैचकीम् ।
सकलभुवनलोचनस्वीयहस्तावलीडम्बरा-
हङ्कृतिशरीरकान्तिरोचिश्छटां नौमि गौरीं मुदा ॥ ६ ॥

तुरगगलपराशराङ्गोत्थकुम्भोद्भवव्यासभू-
प्रमुखमुनिकुलावतंससूतस्वापनाङ्घ्रिकाम् ।
क्षरतदितरवस्त्वतीतान्तरात्माभिधाप्रोल्लसत्
परमपुरुषशक्तिभेदापकृतिं नौमि गौरीं मुदा ॥ ७ ॥

विविधसुखपरम्पराकाङ्क्षकस्वानमच्चित्तसद्-
भवगनिखिलकामितार्थव्रजस्पर्शदीक्षाधराम् ।
अखिलविषयवैमुखीभास्वरस्वीयचेतोऽम्बुज-
प्रभवशमनकृत्कटाक्षाञ्चितां नौमि गौरीं मुदा ॥ ८ ॥

निगमनिकरतच्छिरोवाक्यसङ्घातसङ्कीर्त्तित-
निखिलविधपुमर्थसन्तानदस्वाङ्घ्रिपद्मस्मृतिम् ।
प्रणतहृदयवर्त्तिगाढान्धकारावलीच्छित्तिकृत्-
स्वपदनखसमुल्लसद्रोचिषं नौमि गौरीं मुदा ॥ ९ ॥

जलधिरशनिकाभुवननिर्जरौकः प्रमुख्याखिल-
भुवननिकरवासिलोकाहृतस्वीयपच्छासनाम् ।
अखिलधरणिपालतामुख्यसर्वेष्टदानोद्धृत-
स्वपदसलिलजातभृङ्गाशयां नौमि गौरीं मुदा ॥ १० ॥

महिषरुधिरबीजपारम्परीचण्डमुण्डादिहृत्-
प्रसृतरुधिरवाहिनीकारणस्वीयदोर्विक्रमाम् ।
ज्वरतिवसुमतीशयक्ष्मादिसर्वामयव्रातहृत्-
स्वपदकमलसञ्जनुःसंस्मृतिं नौमि गौरीं मुदा ॥ ११ ॥

दितिजदनुजभीषणप्रेक्षणस्वीयशस्त्रावली-
प्रणतभयनिकायहृन्मुद्रिकाप्रोल्लसत्पाणिकाम् ।
विकृतिलवविहीनताभाग्यभासिस्वक्रियाशयै-
र्विरतिरहितचिन्तिताङ्घ्र्यम्बुजां नौमि गौरीं मुदा ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वचनविततिमातृकापादपद्मालयामाधव-
स्वपतिभरतबाहुभूवल्लभातातमुख्यामरैः ।
धरणिसलिलजातपाकप्रभु [सू] मालतीकेतका-
भिनवकुटजचम्पकाद्यर्चितां नौमि गौरीं मुदा ॥ १३ ॥

प्रशमरतमनस्कृतासर्वबाह्याक्षदान्त्यास्तिकी-
सकलसहनसर्वसंन्यासमुख्यस्पृशौ पण्डिताम् ।
स्वपदविनतिसक्तनैजां तरङ्गावलेः संसृति-
प्रभवनिखिलशुक्श्रमोन्मूलिनीं नौमि गौरीं मुदा ॥ १४ ॥

यममुखभयपूगतोभक्तिमत्पालनार्थं द्रुतं
यमनियममुखस्वसर्वाङ्गजालोल्लसद्योगदाम् ।
चरणकमलयुग्मषट्पादनैजाशयानुष्ठिता-
मखिलदुरिततिक्षमानीरधिं नौमि गौरीं मुदा ॥ १५ ॥

प्रणतहृदयकाङ्क्षिताशेषवस्तुव्रजश्राणन-
प्रवणचरणवार्भुवः श्रीगिरीन्द्रो भवायाः स्तुतीः ।
विगदसुदृढगात्रयुग्दीर्घजीवित्वसद्वल्लभा-
द्रविणसुतकीर्त्तिविद्याद्यभीष्टावलिः स्यादरम् ॥ १६ ॥

श्रीघस्त्राधिपप्रभवस्तोत्रम्

[हरिणी]

नागेट्तल्पाम्बुजधररतं स्वसंयमनीपुरं
श्रोश्रीकान्तक्षितिधरसुतेड्रतदरक्रन्मतिम् ।
भीमाकारं शिशिरहृदयं मनुद्वयसोदरं
वन्दे घस्त्रेट्प्रभववपुषं यमाभिधमन्वहम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इष्टालीदं विरतिसुलभं नयव्रजपारदं
ब्रह्माण्डस्थाखिलजननुतं रतं प्रणवादिमे ।
ॐ जापीष्टं स्मितजितविधुं कराहतदण्डकं
वन्दे घस्राधिपतनुभुवं यमाभिधमन्वहम् ।। २ ।।

श्रीचन्द्रकुबेरस्तुतिः

[तूणकम्]

भीतिजालभञ्जकौ भजन्निलिम्पपादपौ
हस्तधूतनीरजौ भुजङ्गभोगि [ग] कुन्तलौ
इष्टदानतत्परौ शरद्घनाभवाससौ
विप्रवंशनाथयक्षनायकौ विभावये ।। १ ।।

सत्त्वरम्यचेष्टितौ प्रणम्रसर्वकाम्यदौ
देवनम्यपादुकौ नमत्कृतान्तवारकौ ।
आनमत्कृपाम्बुधौ गिरीशसेविसेवितौ
विप्रवंशनाथयक्षनायकौ विभावये ।। २ ।।

स्वर्णमुख्यभोग्यदौ तिलोत्तमादिसेवितौ
नम्रकाङ्क्षितप्रदौ शौनकादिसंस्तुतौ ।
नीरदातृकुन्तलौ भवाम्बुराशिपारदौ
विप्रवंशनाथयक्षनायकौ विभावये ।। ३ ।।

नम्रपापनाशकौ सुन्दराननस्मितौ
पङ्कजातलोचनौ समस्तशास्त्रबोधदौ ।
विप्रचित्तवर्ष्मभूनैजसोदरादृतौ
विप्रवंशनाथयक्षनायकौ विभावये ।। ४ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीचित्सुखाचार्यस्तुतिः

[चित्रशोभा]

स्वर्णपुत्रलोकमुख्यसर्वकाम्यवस्तुजाल ।
बन्धबद्धनम्रलोकमोचनप्रवीणवाक्य ॥
चित्सुखार्य पाहि चित्सुखीप्रमुख्यसुप्रसिद्ध-
ग्रन्थरत्नराजिराजिरंजितार्थवेदशीर्ष ॥ १ ॥

[कुसुमविचित्रा]

अविरतशान्तिप्रमुखवयस्या-
परिवृतमुक्तिस्वहृदयकान्तम् ॥
इभतुरगादीप्सितदकटाक्षं
हृदि कलये देशिककुलदीपम् ॥ १ ॥

श्रीचेन्नपुरीस्थश्रीपार्थसारथिमन्दिरे श्रीपार्थसारथिपार्थस्तोत्रम्

[प्रमदानना]

भवसाध्वसापहरौ फणीन्द्रकचौ भजत्सुरपादपौ
शरदभ्रचिद्वसनौ वरव्रजदौ पदापजिताम्बुजौ ।
दिविजालिनम्यपदौ मनोज्ञगुणौ नमत्सकलप्रदौ
हृदि पार्थसारथिपार्थकावहमाश्रयामि निरन्तरम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतमृत्युभीशमनौ कृपाजलधी कृतार्थितसन्नतौ
भवपारदस्वपदौ फणीट्चिकुरौ वरप्रदसंस्मृती ।
जगदीडितस्वकृती घनेन्दुतनू सुरेड्यपराक्रमौ
हृदि पार्थसारथिपार्थकावहमाश्रयामि निरन्तरम् ॥ २ ॥

परमात्मतत्त्वविदौ सुपर्णनुतौ नताघचयापहौ
नयबोधदाङ्घ्रिनतौ शशाङ्कमुखौ वराभयपाणिकौ ।
अखिलेप्सितव्रजदौ गिरीशरतौ नतार्त्तिनिवारकौ
हृदि पार्थसारथिपार्थकावहमाश्रयामि निरन्तरम् ॥ ३ ॥

श्रीछायादेवीसञ्ज्ञादेवीभानुस्तवः

[मात्रिकं दण्डकम्]

करवरकान्तिह्लेपितपङ्कजसर्वाभिमतीन् भक्ताभीष्टदकल्पतरून्
शारदजलधरडम्बरवारकवस्त्रवृताङ्गान् भवमृतिभयमुखसंहर्तॄन् ।
वरवरनिकरश्राणनसक्तस्वहृदम्भोजान् भृङ्गभुजङ्गमनिजकेशान्
वारम्वारं छायादेवीसञ्ज्ञादेवीभानून् निजहृदि निदधेऽहम् ॥ १ ॥

कृष्णद्वैपायनमुखनतजननिकरादीप्सितकाम्यव्रातस्पृशिकर्तॄन्
कृत्स्नाजाण्डच्छायासञ्ज्ञाकान्तिप्रदतारम्यावश्यककार्यकरान् ।
कृत्तकृतान्तकृपाम्वुधिनैजकटाक्ष[क्षा]काङ्क्षकनम्यपदाम्भोजनियुगलान्
वारम्वारं छायादेवीसञ्ज्ञादेवीभानून्निजहृदि निदधेऽहम् ॥ २ ॥

चरणाम्बुजरतकाङ्क्षितवरततिदाननिषक्तान् मेनार्चितचरणाब्जान्
पारविवर्जितभवजनिनीरधिपारदनभनान् शौनकमुखमुनिविनुताङ्घ्रीन् ।
नीरधराखिलदर्पनिवारणनिपुणशिरोजान् कनकोदरमुखनिजरूपान्
वारम्वारं छायादेवीसञ्ज्ञादेवीभानून्निजहृदि निदधेऽहम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीणापाणिघटोद्भवमुखमुनिपूजितपादान् विनतजनव्रजपापहरान्
काणादादिमशास्त्रविबोधानुग्रहकर्तॄन् विनतासुतकृतसुतसारथीन् ।
एणविलोचनपङ्कजनयनान् घनकुचपङ्कजखरकिरणान्
वारम्वारं छायादेवीसञ्ज्ञादेवीभानून्निजहृदि निदधेऽहम् ।। ४ ।।

श्रीछायादेवीस्तोत्रम्

[वसन्ततिलका]

भोगोशतल्पगिरिजापतिरूपकान्तं
सावर्णिमुख्यजननीं कनकाभकान्तिम् ।
श्रद्धामरादिविनुतां हृतधीविकारां
छायाम्बिकां हृदि भजे करुणाब्धिचित्ताम् ॥ १ ॥

पुष्पालिगर्भितकचां कुसुमार्चिताङ्घ्रिं
प्रज्ञाप्रदाननिपुणां (चतुरां) कलितात्मतत्त्वाम् ।
भक्ताघपूगहरणीं निखिलामयघ्नीं
छायाम्बिकां हृदि भजे निखिलेष्टदात्रीम् ॥ २ ॥

छायासञ्ज्ञासूर्यस्तोत्रम्

[हरनर्तनम्]

रागिदुर्लभसेवनान् विरताशयलभ्यपदाम्बुजान्
निर्जरालिनमस्कृतान् प्रणमज्जराकुमृतादिहान् ।
भक्तगीर्वसुनिर्जितामरदेशिकाधिपडम्बरान्
कारुणोज्जलशेवधीन् मनुयुग्मसूदिनपान् भजे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्रिजाद्वयशङ्करामृतजायुगीहरिरूपिणो
हस्तिमुख्यरमाप्रदाननिखिलाघनाशकसंस्मृतीन् ।
दीप्तिशेवधिविग्रहाञ्छुकशौनकादिमुनीडितान्
अक्षरात्मनिजाकृधीन् मनुयुग्मसूदिनपान् भजे ॥ २ ॥

भक्तकाङ्क्षितदायकान्नतधर्ममुख्यपुमर्थदान्
पङ्कजन्युपकारकान् परमात्मतत्त्वविबोधकान् ।
मेदिनीपतिताप्रदान् वसुधाभुवर्मुखलोकपान्
सर्वरोगनिवारकान् मनुयुग्मसूदिनपान् भजे ॥ ३ ॥

आसुराशयवृत्तिहाञ्जितधीविकारक्षमीडितान्
ब्रह्ममुख्यसुराहताञ्छममुख्यसद्गुणपूगदान् ।
संसृतिश्रमशातकान् प्रणताघसन्ततिमर्षणान्
मृत्युमुख्यभयापहान् मनुयुग्मसूदिनपान्भजे ॥ ४ ॥

छायासंज्ञातुरङ्गीस्तोत्रम्

[हरिणी]

भुवनजननीः सावर्ण्यादिप्रसूजठराञ्चिता
द्विरदमुखदाः पाथोजातप्रमोददमोददाः ।
गुहमुखनुता अम्भोजोत्थप्रमुख्यसुरादृता
मनसि कलये छायासञ्ज्ञातुरङ्गतनूः सदा ॥ १ ॥

करुणाधिषणाः कस्तूर्याद्युल्लसत्स्वललाटिका
दिनपरमणीर्नम्रालीनां वितीर्णविभूतिकाः ।
प्रणवनिरता ॐ कारार्णप्रजापिजनप्रिया
मनसि कलये छायासंज्ञातुरङ्गतनूः सदा ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजगत्पतिस्तोत्रम्

[प्रमदाननम्]

मलिनाशयव्रजदुर्लभ-
स्वपदं विरागिजनेक्षितं
सुरसङ्घ-दैत्यवरार्चिताङ्घ्रि-
युगं जरात्त्र्यपमृत्युहम् ॥
धननायकामरदेशिकोच्च-
विभूतिवाक्प्रदचिन्तनं
प्रणमत्कृपाजनिमेदिनी-
हृदयं जगत्पतिमाश्रये ॥ १ ॥

गिरिराजवर्ष्मभवाग्रभू-
वपुषं करीन्द्रमुखप्रदं
प्रणताघपूगकुभूकुठार-
नतिं सरीसृपशायिनम् ॥
तनुकान्तिलेशविधूतनव्य-
घनं शुकादिमुनीडितं
पुरुषोत्तमोत्तममूर्त्तिरम्य-
तनुं जगत्पतिमाश्रये ॥ २ ॥

श्रितलोकसर्वसमीहित-
व्रजदं चतुर्भुजमण्डितं
नतचित्तदीपिततत्त्वदीप-
रुचं नराधिपताप्रदम् ॥
स्ववशस्थिताखिललोकपूग-
पदं ज्वराद्यखिलार्त्तिहं
दितिजादिदुष्टनिराकृति-
प्रवणं जगत्पतिमाश्रये ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रथपाद-शंख-वराभया-
ढ्यकरं यमिव्रजभावितं
गिरिशाम्बुजासनमुख्य-
देवनुतं शमादिवितारकम् ॥
भवजाखिलश्रमवारकाङ्घ्रि-
नुतिं क्षमानिधिचेतसं
यमभीतिहृद्यममुख्यदान-
रतं जगत्पतिमाश्रये ॥ ४ ॥

श्रीजगदम्बास्तोत्रम्

[अश्वधाटी]

खण्डान्यपङ्कजभवाण्डा सुहृत्प्रणतपण्डाप्रदाननिपुणा
उर्व्यादृता निराजनुर्व्यालविष्णूरनिर्व्याजपूर्णकरुणा ।
पीताम्वरा प्रणतवाताशनाजलधिजातास्तु भव्यततिदा ॥ १ ॥
शुण्डालवाजिरथदण्डादिदा रुचिरतुण्डावधूतसहजा
चण्डस्वरूपमतिदण्डादिदैत्यततिदण्डप्रसक्तधिषणा
शान्ताशयाखिलपकान्तामणि प्रणतचिन्तामणिस्वचरणा ॥ २ ॥
मुण्डासुहाब्धिभवखण्डावतंसदयिताण्डप्रजेशविनुता
कीलालसम्भवजनोलाम्बरानुजनिशैलप्रमुख्यविनुता
द्वेष्टादिवर्जितमनीषा मनोजनतशीर्षाभिनन्दितपदा ॥ ३ ॥
हाहार्चिता प्रचुरमोहप्रजातधनगेहाद्यनित्यनिवसत्
स्वाहादिदोषसहितेहाप्रदुष्टमतिनीहारचण्डकिरणा
श्यामा गृहद्रविणरामासुतप्रमुखकामादिहीनसुलभा ॥ ४ ॥
आद्याऽविवोधहृद्याऽऽत्मवोधमुखविद्याप्रदाननिपुणा
पादोत्थधूलिरतमोदोत्सवप्रचययादोगणालयशशी
रोगार्तिहा विहितयोगादिशास्त्रा †लूजभोगाऽहिशायिरमणी ॥५॥

† लूजभोगा 'लू' अर्थात् पर्वत से उत्पन्न भोग' शरीर है जिसका अर्थात् पार्वती ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऊरीकृतार्त्तिततिदूरीकृतिः सकलसूरीडिताऽऽत्ममहिमा
वीटीप्रिया विबुधकोटीररत्नततिकोटीनिघृष्टचरणा
बुद्धिप्रकर्षयुतऋद्धिप्रसाध्यकृतिसिद्धिप्रदानचतुरा ॥ ६ ॥

कष्टापनीतियुतमिष्टान्नभुक्तिलसदिष्टालिदा मुरहरा-
श्लिष्टादिरम्यविधिहृष्टाशया दिविजजुष्टाङ्घ्रिपद्मयुगली
भीतिव्रजापहृतिभूतिप्रदानमुखरीतिस्वकीयचरिता ॥ ७ ॥

हृत्तापहा प्रचुरवित्तव्रजाधिपतिचित्तप्रभूमुखनुता
दीनार्त्तिहा विबुधसेनाग्रणीप्रमुखनानासुराढ्यकलिता
वाणीशविष्णुमृगपाणीडिता रुचिरतैणौजिताक्षालिसुधना (?)॥८॥

फालाक्षफालशुचिकीलाप्रदग्धमुतलीलाजिताखिलजगत्
कारुण्यधिः सततातारुण्यरम्यपुरुलावण्यजन्मधरणी
मेनादिमारचितगानावलीविषयवीनासनप्रियतमा* ॥ ९ ॥

वीणाधरे तरुणशोणाधरे सततवीणाधरेडितपदे
काणादि [द?] शास्त्रधरवाणार्चिते कुसुमबाणासुदानमुदिते
एणाङ्कचूडसति शोणाब्जपादनतकाणादमुख्यनयदे ॥ १० ॥

तन्द्राविहीनमतिचन्द्रार्धभूषितमहेन्द्रादिपूज्यचरणा
पादार्चनासुलभमोदव्रजा रुचिरनादाद्युपास्यचरणा
ॐकारमन्त्रमुखझङ्कारसक्तनतहुङ्कारतर्जितयमा ॥ ११ ॥

औदार्यवृत्तिलसितौदास्यधीरुचिरसौदासमुख्यकलिता-
ऽनङ्गप्रसूतिकृदङ्गाञ्चिता हृदयरङ्गादिनाथदयिता
मोदप्रदे सकलवेदान्तगीतनिजपादाम्बुजातविभवा(महिमा)॥१२

*वीनासन = 'वीन' अर्थात् पक्षियों का राजा 'गरुड' आसन है जिसका = विष्णु ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजगदेकचक्षुःस्तोत्रम्

(विलासिनी)

प्रणतकृपार्णवं तनुगल (लस) त्सहस्रकिरणं (त्रिलोक-सुपर्व-विनुतं)
निखिलकलानिधिं पदरतव्रजेष्टवरदम् ।
तनुनयनाधिपं जितमनोभवाप्यचरणं प्रमोदततिदं
हृदि कलये समस्तजगतीविलोचनपदस्थबिम्ब (काय) किरणम् ।।१।।

प्रणमदभोष्टदं फणिपतिस्वतल्पसहजं रथेभमुखदं
यतिततिवर्त्म (मार्ग) दं त्रिभुवनीनिवासिविनुतं समृद्धिदनतिम् ।
विधिसुतपुत्रजं विभवदस्वपादनमनं विधूतशमलं
हृदि निदधे समस्तजगतोविलोचनस्थबिम्बकिरणम् ।। २ ।।

मनुयुगलोगुरुं प्रणतिकृत्कृपाजनिभुवं सरोजनयनं
सकलनयप्रदं रुचिरधीशरीरलसितं हराच्युतदृशम् ।
छविजितकुङ्कुमं सलिलभूप्रमोददकरं प्रणम्रसुखदं
मनसि दधे समस्तजगतीविलोचनस्थविम्बकिरणम् ।। ३ ।।

विषयपराङ्मुखं प्रणवगान्तरार्थदकृपं जपादिफलकं निखिलशुभप्रदं
सुतसुताधवेन्दुतनुजं (स्मितलवावेधूतशशिनं) जिताक्षसुलभम् ।
यमयमुनामनुद्वयशनैश्चरादिजनकं प्रचण्डधिषणं
मनसि दधामि सर्वजगतोविलोचनस्थविम्बकिरणम् ।। ४ ।।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीजनकतनयास्तवः

(छाया)

भवाम्भोराश्यौर्वं भ्रमरकबरीं भक्तामरोर्वीभवं
करापास्ताम्भोजं शरदृतुकधृद्वस्त्रां बरश्राणिकाम् ।
दशास्यच्छित्काम्यां रुचिरगुणगणां देवप्रणम्याङ्घ्रिकों
भजे धात्रीकन्यां जनकतनयां लावण्यपाथोनिधिम् ॥ १ ॥

कृतान्तघ्नाङ्घ्र्यर्चां रघुपतिसतीं कारुण्यपूर्णेक्षणां
कनत्स्वर्णच्छायां नतसुरसतीं मौनीन्द्रसम्पूजिताम् ।
घनन्यक्कृद्वेणीं भवभयहरां नम्रेष्टदानव्रतां
भजे धात्रीकन्यां जनकतनयां लावण्यपाथोनिधिम् ॥ २ ॥

विनम्रस्वर्ग्यालिं स्तनजितधरां सर्वाघहाङ्घ्रिस्मृतिं
कणादादीड्याङ्घ्रिं करतललसद्वीणां कृपाम्भोनिधिम् ।
वितीर्णेष्टव्रातां स्मृतिहतशुचं सिद्ध्यष्टकश्राणिकां
भजे धात्रीकन्यां जनकतनयां लावण्यपाथोनिधिम् ॥ ३ ॥

श्रीजमदग्निस्तुतिः ॥

(मञ्जुभाषिणी)

मतिशोधकाय विरतिप्रियात्मने
सुरपूजिताय हृतरुग्जरादये ।
जितशक्रजीवन [जीव] धनवाक्प्रदायिने
करुणार्णवाय जमदग्नये नमः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अहिभोगतल्पगिरिजेशरूपिणे
करिमुख्यदाय नतपापनाशिने ।
कनकप्रभाय शुकगीतकीर्त्तये
परमार्थदाय जमदग्नये नमः ॥ २ ॥

निखिलेष्टदाय पुरुषार्थदायिने
नृपतित्वदाय परतत्त्वरूपिणे ।
त्रिजगन्नुताय ज्वरमुख्यहापिने
असुरा [दनुजा] न्तकाय जमदग्नये नमः ॥ ३ ॥

अभयप्रदाय मुनिवन्दिताङ्घ्रये
भृगुपुङ्गवाय शममुख्यदायिने ।
श्रमवारकाय यममुख्यदायिने
अघमर्षणाय जमदग्नये नमः ॥ ४ ॥

श्रीजलजपदाचार्यस्तोत्रम्

(मधुमती)

त्रिदिवगजनता–प्रकलितचरण ।
अपमृतिमुखहृ–ज्जय जलजपद ॥ १ ॥

श्रितजनकरुणा–जलनिधिहृदय ।
गिरिजनिसहभू–र्जय जलजपद ॥ २ ॥

यमितनुविलसत्–फणिपतिशयन ।
रुचिजितकनक जय जलजपद ॥ ३ ॥

नुतनिजपदचित्–सुखमुखयमिपैः ।
द्विरवितगुरुप जय जलजपद ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जलरुहविलसत्पदसुरसरिता
गुरुपदनिरत,जय जलजपद ॥ ५ ॥

जितमतिविकृति-व्रजततिविनुत
करधृतवरद, जय जलजपद ॥ ६ ॥

क्षितिगुरुतनुधृच्छिवचरणरत
दिनकरवसन, जय जलजपद ॥ ७ ॥

सहनुतिपठनं कृतपदमनसाम् ।
वितरति भगवा, नभिमतमखिलम् ॥ ८ ॥

श्रीजानकीस्तुतिः

(वसन्ततिलका)

ब्रह्माण्डकोटिजननीमनिलात्मजे [जा] चर्यां
कारुण्यजन्मधरणीं धरणीतनूजाम् ।
हस्त्यश्वसैन्यमुखभक्तजनेष्टदात्रीं
श्रीजानकीं हृदि सदा कलयेऽहमम्बाम् ॥ १ ॥

ईहादिशून्यसुलभां फणिभूपतोड्यां
विद्यादिदायिविनतिं प्रमदाब्धिचन्द्रम् ।
तारावलीशसहजां सकलर्द्धिदाङ्घ्रिं
श्रीमैथिलीं हृदि सदा निदधेऽहमम्बाम् ॥ २ ॥

सुग्रीवबालिसुतजाम्बवदर्च्यपादां
वाणीशिवामुखनुतां निटिलाक्षवन्द्याम् ।
ओङ्कारमुख्यमुदितां प्रणवस्वरूपां
धात्रीसुतां हृदि सदा कलयेऽहमम्बाम् ॥ ३ ॥

योगीन्द्रपूज्यचरणां [भवभीति-हन्त्रीं]
दीनालिमूर्त्तकरुणां सुषमाढ्यकायाम् ।
गीर्वाणपूजितपदां शुभपूगदात्रीं
पृथ्वीसुतां हृदि सदा कलयेऽहमम्बाम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एणाङ्कजिष्णुवदनां स्थिरभव्यदात्रीं
बिम्बारुणाधररुचं दुरितापनेत्रीम् ।
रामोपगूढवपुषं कनकाभगात्रीं
क्षोणीसुतां हृदि सदा निदधेऽहमम्बाम् ॥ ५ ॥

श्रीजीवकाव्यस्तुतिः

(स्रग्विणी)

भक्तसर्वेष्टदौ साध्वसोन्मूलकौ ।
पाणिधृताम्बुजौ जीवकाव्यौ भजे ॥ १ ॥

शुभ्रवासोवृतौ काङ्क्षितार्थप्रदौ ।
कृत्तभीसन्तती जीवकाव्यौ भजे ॥ २ ॥

कृष्णशीर्षोद्भवौ मर्ममुख्यप्रदौ ।
संसृतेर्भञ्जकौ जीवकाव्यौ भजे ॥ ३ ॥

भक्तपापापहौ देवदैत्यार्चकौ ।
शिष्यभव्यप्रदौ जीवकाव्यौ भजे ॥ ४ ॥

इष्टदानुग्रहौ कष्टकृन्निग्रहौ ।
पुष्टनम्रव्रजौ जीवकाव्यौ भजे ॥ ५ ॥

श्रीजीवगुरुदत्तशारदास्तवः

[मञ्जुभाषिणी]

भजदिष्टदानजितकल्पभूरुहो
भवभीतिभञ्जकपदाम्बुजस्मृति ।
भ्रमराहरीशभुजगाभकुन्तलाः
कलयामि जीवगुरुदत्तशारदाः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सितरक्तशारदघनाभवाससः
करवैमवापजितनीरसम्भवाः ।
वरसन्ततिस्पृशिपरायणान्तराः
कलयामि जीवगुरुदत्तशारदाः ॥ २ ॥

पदपङ्कजप्रणतकाम्यवस्तुदाः
अहिशत्रुमुख्यसुरनम्यपादुकाः ।
शरणागतप्रवणरम्यमानसाः
कलयामि जीवगुरुदत्तशारदाः ॥ ३ ॥

स्तुवदिन्द्रहैहयनरेशशौनकाः
नमदुद्धवप्रदुतिगोपमेनकाः ।
वसुबुद्धिमुख्यसकलेष्टदायिकाः
कलयामि जीवगुरुदत्तशारदाः ॥ ४ ॥

चरणानतेष्टवरदानदीक्षिताः
शरदायकार्कघनशीर्षसम्भवाः ।
जननक्षयाकृतिसमुद्रपारदाः
कलयामि जीवगुरुदत्तशारदाः ॥ ५ ॥

कृतकृत्यतादचरणाम्बुजार्चनाः
कृतनम्रजन्ममृतिभीनिकृन्तनाः ।
करुणासुधाम्बुनिधिनैजमानसाः
कलयामि जीवगुरुदत्तशारदाः ॥ ६ ॥

विनतव्रजाभततिभस्मसात्कृतो
विनताजवाहनपदाब्जभक्तिदाः ।
कनकापहासितनुवर्णभास्कराः
कलयामि जीवगुरुदत्तशारदाः ॥ ७ ॥

कणभुक्पतञ्जलिमुखार्चिताङ्घ्रिका
ऋणरोगमुख्यनिखिलारिवारिकाः ।
तृणभाविताखिलजगत्प्रबोधदाः
कलयामि जीवगुरुदत्तशारदाः ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतकष्टजालविनिवारणप्रिया
निखिलेष्टदानरतपादसंश्रयाः ।
इदमष्टकं [प्र] पठतां मुदान्विताः
धृतमस्तकं प्रददतेऽणिमादिकम् ॥ ९ ॥

श्री जैमिन्यादिचतुष्टयस्तोत्रम्

(मात्रामत्तमयूरी)

कृपया भरितान्कृष्णद्वैपायनशिष्यान्
मुनिगणविनुतान्वेदचतुष्टयरतधिषणान् ।
वरदकटाक्षान्भवसागरनौकाः कलये
जैमिनिवैशम्पायनपैलकशुभमन्तून् ॥ १ ॥

कीरसतीर्थ्यान्रम्यामलगुणवृत्तिमतोन्
कामितकनकप्रमुखाशेषप्रदकरुणान् ।
शरदभ्रकचांस्तुहिनाभपटान्हृदि कलये
जैमिनिवैशम्पायनपैलकशुभमन्तून् ॥ २ ॥

डङ्कनगरीट् (डाकोरलक्ष्मी) स्तोत्रम्

[शिखरिणी]

भजद्व्राताभीप्टव्रजवितरणे कल्पलतिके
भवाभिख्याम्भोधेर्झटितितरणे पीतचरणे ।
भुजङ्गाम्भोधारिभ्रमरनिकरभ्रान्तिदकचे
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वराभीत्यम्भोजद्वयमुखलसन्नैजकरतः
परास्तध्वस्ताम्भःप्रभवसकलाहुङ्कृतिभरे ।
प्रणम्राशेषेष्टव्रजदचरणे कृष्णदयिते
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ २ ॥

असाध्यत्वभ्राजन्नतनिखिलकाम्यालिदपदे
सुरज्येष्ठोमेशप्रभृतिसुरनम्याङ्घ्रिकमले ।
ऋणव्रातत्यक्तस्वपतियुतरम्याब्जवसते
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ३ ॥

कृतान्तादिप्रोत्थाखिलभयचयच्छेदनपटो
कृपापारावारायितनिजमनःपार्थसिभवे ।
कृतार्थाग्रेयायीकृतपदनते कृष्णदयिते
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ४ ॥

मुहुर्मुह्यन्मेनाप्रमुखललनाविस्मयकर—
स्वकीयाशेषाङ्गोल्लसदतुललावण्यभरिते ।
कनत्स्वर्णन्यक्कृन्निजतनुरुचे कृष्णदयिते
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ५ ॥

पदाम्भोजानम्रेप्सितवरततिश्राणनचणे
दुरन्तानिष्टालीभरितभवपारप्रदपदे ।
शुकादिध्याताङ्घ्रे जलदचिकुरे पारदपदे
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ६ ॥
पदाब्जासक्ताघव्रजझटितिभेतृस्मृतिलवे
गुणालीस्वाधीनीविहितविनताजध्वजमते ।
कठोरोत्तुङ्गस्वस्तनजितधरे कृष्णदयिते
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ७ ॥

मुदा वीणापाणिप्रभृतिमुनिगीतात्मचरणे
कटाक्षैः काणादप्रमुखनयदस्वीयकरुणे ।
कृपां प्रेम्णा दीने प्रकुरु नयनापास्तहरिणे
भयध्वान्तादित्य प्रदिश करुणां डङ्कनगरीट् ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वपादाब्जद्वन्द्वस्तवनपरपद्याष्टकमिदं
समाकर्ण्य श्रद्धाप्रत्र गपठितं कष्टशमनी ।
कृपालुर्भक्तर्षिप्रथितपुरगाभीष्टनतिदा
महालक्ष्मीः सिद्धीः करणलसिता अष्ट वितरेत् ॥ ९ ॥

श्रीज्ञानेश्वरस्तवः

[आर्या]

भुजगाल्यम्बुदकेशं भक्तसुरद्रुं भवभयभेत्तारम् ।
श्रीज्ञानेश्वरमीडे वरदकराब्जं शरद्घनाभपटम् ॥ १ ॥

कनकादीप्सिततितिदं धनमुखविमुखं वनरतमुनिमान्यम् ।
श्रीज्ञानेश्वरमीडे प्रणम्रवरदं भवाम्बुधेस्तारम् ॥ २ ॥

मानसपुष्करचारं विनताघहरं विनम्रयोगिवरम् ।
श्रीज्ञानेश्वरमीडे भयघ्नवरदं समस्तशास्त्रविदम् ॥ ३ ॥

श्रीज्ञानेश्वरस्तवः

[उपजातिः]

श्रीरुक्मिणीविट्ठलवर्ष्मसम्भवं
निवृत्तिसोपानविमुक्तिसोदरम् ।
तरङ्गिणीनीरनिवासलोलं
ज्ञानेश्वरं विष्णुनवाकृतिं भजे ॥ १ ॥
निवृत्तिमार्गात् पविबोधलभ्य-
सोपानतो मुक्तिरिति प्रसिद्धयै ।
सोपानमुक्तो अनुजे निवृत्ति-
नाथोऽग्रजो यस्य बुधं तमीडे ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यतीन्द्रकायोद्भवतां स्वकीयां
निजोपनीतेर्विहितान्तरायाम् ।
ज्ञात्वा लुलायाननतः श्रुतीर्यः
संश्रावयामास बुधं तमीडे ॥ ३ ॥

आशीःप्रणामोभयकर्महीनता-
सिद्धेः कृते वैनहितां तु पत्रिकाम् ।
शून्या यथास्ते मतिलेशशून्यता
तथायमस्तीति विमुक्तिर्वर्णितः ॥ ४ ॥

योगशक्तिमहसा विभीषण-
दन्दशूकशयानिगृहीतम् ।
व्याघ्रयानमधिरुह्य समेतं
चाङ्गदेवमभितः क्षणमात्रात् ॥ ५ ॥

प्रत्युद्गमाय तरसा निजयोगशक्त्या
भित्ति जिघाय समुपागतयोगिदर्पम् ।
हत्वा जगाद तदनुश्रुतिमस्तकोक्तं
तत्त्वं परं स्वभगिनीमुखतस्तमीडे ॥ ६ ॥

श्रीझषावतारस्तुतिः

[पादाकुलकम्]

चरणसरोजप्रणतजनाली, त्रिदशधरित्रीप्रभवकटाक्षम् ।
झषतनुमीडे बहुतरदुःख–प्रदभवभीतिप्रशमनदक्षम् ॥ १ ॥

पदनतसत्यव्रतनिजनाम–द्रविडमहीरुड्वनकृतिपूर्वम् ।
त्रिभुवनधर्माधिपमनुताद–प्रथितकृपाढ्यं झषतनुमीडे ॥ २ ॥

निजपदवार्भूनतजनकाम्या–खिलवरदानप्रियहृदयाब्जम् ।
अहिमुखसंहृन्मुखसुरनम्य–स्वचरणपद्मं झषतनुमीडे ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नमदवनादिव्रतधृतिरम्य, प्रचुरगुणाल्युद्भवनिजकीर्त्तिम् ।
हयगलनीतश्रुतिततिरक्षा-कृतिविजयाढ्यं झषतनुमीडे ॥ ४ ॥

श्रितजनमृत्युप्रभृतिभयाली-प्रचयनिहन्तृस्वचरणधूलिम् ।
अवितृविहीनार्त्तिपतितदीन-प्रणतकृपाब्धिं झषतनुमीडे ॥ ५ ॥

शतमखकान्तामुखसुरनारी-स्तुतनिजपादाम्बुजविभवालिम् ।
शतधृतिशम्भुद्रुहिणजकीर-प्रमुखनुताङ्घ्रि झषतनुमीडे ॥ ६ ॥

कनकमुखार्थप्रभृतिविमोक्षा-न्वधिकसमस्तस्पृशिरतचित्तम् ।
पदविनतालीकृतदुरितघ्न-स्वचरणचित्तं झषतनुमीडे ॥ ७ ॥

कृतविनताभूककुदधिरोहा-भिनवविलासाञ्चितनवरूपम् ।
कनकमयैकस्वरुचिरशृङ्ग-प्रभृतिमनोज्ञं झषतनुमीडे ॥ ८ ॥

नयनपदाब्जप्रमुखनयाली-वितरणकार्यप्रवणकटाक्षम् ।
नतजनकष्टप्रशमनमिष्ट-प्रदपदपद्मं झषतनुमीडे ॥ ९ ॥

डङ्कपुरावतंसरमण-श्रीकृष्णचन्द्रप्रभुस्तवः

[शार्दूलविक्रीडितम्]

भक्तिस्वर्गितरुं करास्तकमलं काम्यं सुमेष्वम्बया
भीतिव्रातहरं सुवर्णवसनं नम्यं निलिम्पव्रजैः ।
भृङ्गाम्भोदकचं वरप्रदनतिं रम्याखिलस्वाङ्गकं
वन्दे डङ्कपुरावतंसरमणं श्रीकृष्णचन्द्रं प्रभुम् ॥ १ ॥

केनादीड्यपदं कृपाजलनिधिं केशानुकृन्नीरदं
दीनानुग्रहकृत्कृतार्थकलितं क्लेशाम्बुधेः पारदम् ।
मीनाक्षीसहजं कृतान्तभयहं नम्रेष्टसर्वप्रदं
वन्दे डङ्कपुरावतंसरमणं श्रीकृष्णचन्द्रं प्रभुम् ॥ २ ॥

एणाङ्कक्षयकृन्मुखं प्रणमताभीष्टव्रजश्राणकं
शोणाम्भोजपदं घनच्छविततनुं कष्टावलीकृन्तकम् ।
एणाक्षीसहितं सुवर्णमुखराशीष्टत्वदाङ्घ्रिस्मृतिं
वन्दे डङ्कपुरावतंसरमणं श्रीकृष्णचन्द्रं प्रभुम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमड्डङ्कपुराधिपलक्ष्मीदेवीलक्ष्मीकान्तस्तुतिः

[दण्डकम्]

भुजगाम्भोधरभृङ्गशिरोजौ भजदमरागौ भवभयभञ्जनदीक्षाढ्यौ
वरततिवितरणमोदितविनतावरविन्दकरौ कनकविजिष्णुच्छविवसनौ ।
हृदयङ्गमतनुमतिगुणरम्यौ श्राणितकाम्यौ पौलोमीशादिमनम्यौ
वन्दे श्रीमड्डङ्कपुराधिपलक्ष्मीदेवीलक्ष्मीकान्तौ सततमहम् ॥ १ ॥

कृपणकृपाम्बुधिहृदयाम्भोजौ कृष्णाकलितौ नम्रकृतान्तजभीतिहरौ
कनकदनमनौ कनकाब्दतनू नानालीलौ सनकसनन्दनमुखविनुतौ ।
नीरधरद्युतिवेणीरुचिरौ शरणगवरदौ चरणपराजितकञ्जातौ
वन्दे श्रीमड्डङ्कपुराधिपलक्ष्मीदेवीलक्ष्मीकान्तौ सततमहम् ॥ २ ॥

घनतरसच्चिन्मोदनकारौ विनताघहरौ विनुतातनुजन्निजवाहौ
वाणीन्यक्कृतपरभृतगर्वौ पाणिधृताब्जौ वाणीगिरिजार्चितचरणौ ।
अष्टैश्वर्यस्पर्शननिपुणौ कष्टव्रजहाविष्टव्रातदकरुणाब्धी
वन्दे श्रीमड्डङ्कपुराधिपलक्ष्मीदेवीलक्ष्मीकान्तौ सततमहम् ॥ ३ ॥

●

श्रीडङ्कपुरकमलालयास्तवः

[प्रमदाननम्]

भजदावलीसकलेप्सितस्पृशिधूतकल्पलतास्मृतिं
भवनामभीकरनीरराशिविशोषकौर्वधनञ्जयम् ।
भुजगेश्वराम्बुवितारकभ्रमरभ्रमप्रदकुन्तलां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ १ ॥

चरणानतेष्टवितारिणीं करनिर्जितामृतसम्भवां
शरदम्बुदायकडम्बरापहवस्त्रवेष्टितविग्रहाम् ।
वरदानरूपनिजैककार्यपरायणात्महृदम्बुजां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगतीत्रयातुलसुन्दरामरतातकाम्यकलेवरां
निखिलत्रिविष्टपसुन्दरीनिकुरम्बनम्यपदाम्बुजाम् ।
रमणानुकूलमतिल्वनम्रकृपादिरम्यगुणाञ्चितां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ३ ॥

कृतकृत्यताप्रदपादसंस्मृतिलेशमात्रनिजाङ्घ्रिकां
कृतपादभक्तिकृतान्तकृन्तनपण्डितैककृपालयाम् ।
कृतकृष्णचन्द्रतनूपगूहनभाग्ययोग्यवृषावलिं
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ४ ॥

पदपङ्कजानतमेनकामुखदेवतामहिलाव्रजां
निजपार्श्वयुग्मगमेनकातनुजापयोजजवल्लभाम् ।
शिवकीरनारदशौनकादिमुनिस्तुताङ्घ्रयपदानिकां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ५ ॥

बहुयत्नशोधितपारदद्युतिदर्पहृद्युतिविग्रहां
भवनीरशेवधिपारदानमुखाखिलेष्टवरप्रदाम् ।
घननीरपूरितनीरदच्छविजित्वरच्छविकुन्तलां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ६ ॥

विनतावलीकृतसर्वपातकभस्मसात्कृतिपण्डितां
विनतातनूभववाहनोरसि नित्यवासपरायणाम् ।
घनपीनतुङ्गनिरन्तरोरसिजातधूतधराधरां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ७ ॥

वरवीणिकाधरमौनितल्लजपाणिपद्मसमर्चितां
विजितैणिकाम्बकरागसम्भ्रमवीक्षिताम्बुजलोचनाम् ।
निजवेणिकाजितषट्पदां कणभुक्प्रमुख्यनयप्रदां
कलयामि डङ्कमुनीन्द्रपत्तननायिकां कमलालयाम् ॥ ८ ॥

प्रणतालिकष्टपरम्पराविनिवारणादिपुरःसरं
हृदि चिन्तितेष्टदपादपङ्कभुवः स्वभूरमणीमणेः ।
नतिपूर्वमष्टकमेतदेकरताशयं पठतां नृणाम्
अतितूर्णमष्टनिजाङ्गसंयुतयोगसिद्धिरियाद्वशम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीडाकोरलक्ष्मीनारायणस्तोत्रम्

[स्रग्धरा]

भक्ताभीष्टावलीदत्रिदशचरणपौ नीरता [ज] स्पर्धिहस्तौ
संसाराख्याम्बुराशिप्लवनिजचरणौ स्वर्णवर्णस्ववस्त्रौ ।
भृङ्गाम्भोधृद्भुजङ्गच्छविनिजचिकुरौ पारहीनप्रभावौ
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ १ ॥

पादाब्भूनम्रकाम्यव्रजदपदनती कृत्स्नविश्वाधिपालौ
गीर्वाणव्रातनम्यस्वचरणवनजौ कृत्तकातान्तिभीतौ ।
आकीटब्रह्मरम्यातुलगुणरुचिरौ वारिराशी कृपायाः
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ २ ॥

मीनार [द्य] म्भोजधिक्कृन्निजनयनरुची भक्तसक्तान्तरङ्गौ
कीनाशप्राप्तदीनप्रणतिकृदवनौ पारदौ संसृताब्धेः ।
हेमाम्भोदाभकायौ कनकनिकरदौ नीरवाहाभकेशौ
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ ३ ॥

आरूढव्योमशम्भूभुगशनकुलपौ वाणतातार्चिताङ्घ्री
नम्रव्राताघदाघत्वरितदवशुची वीणिकाचक्रपाणी ।
नानाकारोररीकृत्यवितनततती एणिकापङ्कजाक्षां [क्षौ]
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ ४ ॥

श्रीडाकोरलक्ष्मीस्तवः

[स्रग्विणी]

पुष्पबाणक्रुधालोभमोहाद्यरि-
षट्कवश्यान्तरङ्गाप्यभिन्नाङ्घ्रिकाम् ।
तद्रिपुव्रातजित्प्रीतनैजाशयां
डङ्कमौनीपुराधीश्वरीं भावये ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्ममृत्युञ्जयाखण्डनाबीश्वरां
पित्तवाग्विन्द्रसेनादिसंसेविताम् ।
भक्तिकृज्जारठोदुर्मृताद्यार्त्तिहां
डङ्कमौनीपुराधीश्वरीं भावये ॥ २ ॥

रङ्कधात्रीशमन्दस्वधीभूभृतो-
ऽप्याशु यत्पादवारिप्रभूसंस्मृतेः ।
श्रीवचोधूतयक्षेशजीवा भव-
न्त्याश्रये डङ्कमौनीपुराधीश्वरीम् ॥ ३ ॥

भूतपञ्चीकृतिस्त्रक्रियस्यापि यो
ऽभूद्विधाता तदीयादिशक्त्याकृतिम् ।
भूतमात्रानुकम्पाजनुर्मेदिनीं
डङ्कमौनीपुराधीश्वरीं भावये ॥ ४ ॥

नागकुम्भापहासिस्ववक्षोभवां
नागभृङ्गापहासिस्वशीर्षोद्भवाम् ।
नागराड्वर्ण्यभिन्नापदानाङ्घ्रिकां
डङ्कमौनीपुराधीश्वरीं भावये ॥ ५ ॥

पादनीरेरुहद्वन्द्वभृङ्गाशय-
प्राग्जनुःसाम्प्रतागामिपापापहाम् ।
स्वर्णदर्पापहद्वर्णराजत्तनुं
डङ्कमौनीपुराधीश्वरीं भावये ॥ ६ ॥

अब्जभूरुड्भवद्वीपभूतोद्भव-
कुम्भभूमुख्यमौन्यालिभूभृन्नुताम् ।
अक्षरब्रह्मवित्प्राप्यतत्त्वाकृतिं
डङ्कमौनीपुराधीश्वरीं भावये ॥ ७ ॥

कामनातः स्वपादानतानां द्रुतं
सर्वकाम्यव्रजस्पर्शदीक्षाधराम् ।
कामहीनाशयानां च मोक्षप्रदां
डङ्कमौनीपुराधीश्वरीं भावये ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्ममुख्यापवर्गान्तसर्वार्थदं-
स्वीयपाण्यम्बुसञ्जातयुग्मद्वयाम् ।
भूधरश्रोणिकां भूधरोरोजनिं
डङ्कमौनीपुराधीश्वरीं भावये ।। ९ ।।

सर्वविध्यण्डगाशेषलोकावली-
वासकृत्पाल्यमानस्वकीयाज्ञिकाम् ।
भूप्रमुख्याधिपत्वादिदाङ्घ्र्यर्चनां
डङ्कमौनीपुराधीश्वरीं भावये ।। १० ।।

ईशजीवात्मविश्वादिनानाभिदा-
ज्ञानरूपासुरक्ष्मेशसंहारिणीम् ।
राजयक्ष्मादिरुग्जालहर्तृस्मृतिं
डङ्कमौनीपुराधीश्वरीं भावये ।। ११ ।।

दुष्टसम्भीषणस्यन्दनाङ्काादियुक्-
शिष्टभीनाशकृन्मुद्रिकाधृत्कराम् ।
नैर्विकार्य्योल्लसच्चित्तसञ्चिन्तितां
डङ्कमौनीपुराधीश्वरीं भावये ।। १२ ।।

विश्वसृड्विश्वसंरक्षिविश्वापहृन्-
मुख्यविश्वामरोत्तंससङ्घादृताम् ।
हृत्स्थितिस्पाष्टयकृदा (च्चा) ब्जनुर्विष्टरां
डङ्कमौनीपुराधीश्वरीं भावये ।। १३ ।।

चित्तशान्तीन्द्रिय [न्त्यक्ष] दान्त्यास्तिकीतृप्तता-
सर्वसन्त्यागसर्वक्षमाश्राणिकाम् ।
पादपद्मानतश्रान्तिनिर्मूलिनीं
डङ्कमौनीपुराधीश्वरीं भावये ।। १४ ।।

प्राग्वृकक्रव्यभुग्रूपमृत्युप्रदा-
न्मङ्क्षु मृत्युञ्जयं योऽवति स्मादरात् ।
तन्महाशक्तिरूपामघक्षालिनीं
डङ्कमौनीपुराधीश्वरीं भावये ।। १५ ।।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीडाकोरक्षेत्रे श्रीडङ्कपुरीनिलयाषोडशीस्तुतिः

[तोटकम्]

गिरिजेशहरिस्मरपद्मजनुः-शुकनारद-संस्तुतपाद-युगीम् ।
निखिलत्रिजगज्जनताजननीं-कलये हृदि डङ्कपुरीनिलयाम् ॥ १ ॥

पदपङ्कजभक्तजनालिमनोरथपूरणसक्तहृदम्बुभुवम् ।
रथदन्तिमुखप्रदलेशकृपां कलये हृदि डङ्कपुरीनिलयाम् ॥ २ ॥

त्रिजगत्सृजिकर्तृजनिस्थलवाभंवमण्डितनाभिहृदब्जरविम् ।
मितिहेतुविहीनकृपाजलधिं कलये हृदि डङ्कपुरीनिलयाम् ॥ ३ ॥

प्रणतालिवशीकृतसर्वकलां विजितेन्द्रियलभ्यपदाम्बुजनिम् ।
नतहर्षपयोधिपयोधिजनिं निदधे हृदि डङ्कपुरीनिलयाम् ॥ ४ ॥

उडुवल्लभकोटिविजिष्णुनिजस्मितसुन्दरवक्त्रसरोजनुषम् ।
उरगाधिपसंस्तुतकीर्त्तिपदां निदधे हृदि डङ्कपुरीनिलयाम् ॥ ५ ॥

अखिलत्रिदशालिकिरीटमणिच्छविराजिविराजिपदाम्बुजनिम् ।
नतवाञ्छितदानरतात्ममतिं कलये हृदि डङ्कपुरीनिलयाम् ॥ ६ ॥

त्रिदिवालयशत्रुचयासुहर-स्वरथावयवोरसिवासरताम् ।
अखिलर्द्धिसमृद्धिवितारिनतिं निदधे हृदि डङ्कपुरीनिलयाम् ॥ ७ ॥

निजवल्लभपङ्कजभूगिरिशप्रमुखाखिलनिर्जरसेव्यपदाम् ।
नतलिप्सितवैभवसञ्चयदां कलये हृदि डङ्कपुरीनिलयाम् ॥ ८ ॥

अमितानतदीनजनालिकृपा-जनिभूत्वविभास्वरहृत्कमलाम् ।
निजपार्श्वगवाग्जननीगिरिजां कलये हृदि डङ्कपुरीनिलयाम् ॥ ९ ॥

सुषमाकरुणामृतनोरधिता-विलसद्रुचिरात्मतनूधिषणाम् ।
पदनम्रपुलोमभवाप्रमुखां कलये हृदि डङ्कपुरीनिलयाम् ॥ १० ॥

नयनाङ्घ्रिकणादनकर्दमजाहिपजैमिनिमुख्यनुतस्वपदाम् ।
हरिणाङ्कसहोदरनैजतनुं कलये हृदि डङ्कपुरीनिलयाम् ॥ ११ ॥

प्रणतेहपरोभयसर्वमुख-स्पृशितत्परपण्डितदिव्यधियम् ।
अधरानतनिर्जितबिम्बविधुं कलये हृदि डङ्कपुरीनिलयाम् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणवप्रतिपाद्यतनुं सशिखा प्रतिपादयति श्रुतिगीरपि याम् ।
प्रणवादिनिषक्तजनाप्यपदां कलये हृदि डङ्कपुरीनिलयाम् ॥ १३ ॥

चतुरास्यकलत्रसितेतरकन्धरदारविराजितपार्श्वयुगीम् ।
दिविजव्रजपूजितधूलिलवां कलये हृदि डङ्कपुरीनिलयाम् ॥ १४ ॥

नमतां जवतोऽखिलकष्टहृति-प्रवणेष्टवितारिपदाब्जनतिम् ।
[मुनिमानसवासिपदाम्बुजनिं] कलये हृदि डङ्कपुरीनिलयाम् ॥ १५ ॥

शुभतोटकवृत्तवराभिहितैर्वरतोटकवृत्तविबोधकरीम् ।
जितहाटकभाखिलवर्ष्मरुचिं कलये हृदि डङ्कपुरीनिलयाम् ॥ १६ ॥

•

श्रीत्रयोदश्यां श्रीरतिस्मरस्तवः

[प्रमाणिका]

भजन्निलिम्पपादपौ भवाम्वुराशिकुम्भजौ ।
भवोत्थभीतिभञ्जकौ भजाम्यहं रतिस्मरौ ॥ १ ॥

करावधूतपङ्कजौ शरत्पयोधराम्वरौ ।
वरप्रदानतत्परौ भजाम्यहं रतिस्मरौ ॥ २ ॥

नतालिकाम्यसर्वदौ सुरालिनम्यपादुकौ ।
कृपादिरम्यमानसौ भजाम्यहं रतिस्मरौ ॥ ३ ॥

हरिस्नुषाशरीरजौ कृतान्तभीतिमर्दकौ ।
कृपासुधामहार्णवौ भजाम्यहं रतिस्मरौ ॥ ४ ॥

वसन्तवारिराशिभूत्तिलोत्तमादिसेवितौ ।
सुवर्णनीरदप्रभौ भजाम्यहं रतिस्मरौ ॥ ५ ॥

पदानमद्वरप्रदौ भवाम्बुराशिपारदौ ।
कचावधूतनीरदौ भजाम्यहं रतिस्मरौ ॥ ६ ॥

विनम्रपापनाशकौ वृषाहिभोगिवाहनौ ।
परस्परानुरञ्जकौ भजाम्यहं रतिस्मरौ ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कराब्जशोभिवीणिकौ शशाङ्कसौहृदाञ्चितौ ।
कणादमुख्यशास्त्रदौ भजाम्यहं रतिस्मरौ ॥ ८ ॥

भजज्जनेष्टपूरकं समस्तकष्टनाशकम् ।
रतिस्मराष्टकं पठन्नवाप्नुयात्तदिष्टताम् ॥ ९ ॥

श्रीत्रयोदश्यां श्रीरत्यजस्तुतिः

अवाप्तगिरिजन्यनुग्रहभरौ जगज्जित्वरौ
भुजङ्गशयनस्नुषातनुजनौ रमातोषकौ ।
स्वकान्तिजितभर्मवार्धररुची मुनीन्द्रेडितौ
सुरासुरनमस्कृतस्वचरणौ भजे रत्यजौ ॥ १ ॥

श्रीतालाङ्कश्रीविदर्भसुताधवस्तुतिः

[हरिणी]

भजदमृतभुक्क्षोणीजातौ पदापजिताम्बुजौ
भवसलिलराट्पोतौ शुक्लान्यपीतनिजाम्बरौ ।
भुजग (भ्रमर) जलधृच्छीर्षोद्भूतौ वरप्रदपादुकौ
मनसि कलये तालाङ्कश्रीविदर्भसुताधवौ ॥ १ ॥

त्रिदशललनारत्नव्रातार्चिताङ्घ्रिसरोरुहौ
तुहिनजलदस्वीयच्छायौ घनच्छविकुन्तलौ ।
द्रुहिणतनुभूकीरादीनां भवाम्बुधिपारदौ
मनसि निदधे तालाङ्कश्रीविदर्भपजाधवौ ॥ २ ॥

प्रणतजनतापापालिघ्नौ सरोरुहलोचनौ
तनुरुचिरतायोग्यक्रीडौ नयालिवितारकौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फणिपकमलाकान्ताकारौ कृतार्थितगोपिकौ
मनसि कलये तालाङ्कश्रीविदर्भसुताधवौ ।। ३ ।।

विहितविनमत्काम्यस्पर्शौ कृतस्वकृतित्वदौ
निखिलदिविषन्नम्यस्वाङ्घ्री कृतान्तभयापहौ ।
अमितकरुणारम्यस्वान्तौ कृमीशसमेक्षणौ
मनसि निदधे तालाङ्कश्रीविदर्भपजाधवौ ।। ४ ।।

●

श्रीतिथ्यधिपस्तुतिः

[मयूरगतिः]

संसृतिसागरकुम्भभवान् भजदिष्टवितारककल्पमहीजान्
पाथसिसम्भवजिष्णुपदान् भुजगाम्वुदभृङ्गविजित्वरकेशान् ।
नम्रवरावलिदानरताञ्छरदम्वुधरच्छवितस्करवस्त्रान्
वैश्रवणादिमनीरभवप्रभवावधितिथ्यधिपानहमीडे ।। १ ।।

निर्जरभूपतिनम्यपदांश्चरणस्मरणप्रतिपादितकाम्यान्
कृत्स्नजगत्ततिरक्षणकृत्स्वकलेवरमानससद्गुणरम्यान् ।
कृच्छ्रगताङ्घ्रिविनम्रवि [नि] कायकृपाब्धिकटाक्षनिमग्नकृतान्तान्
वैश्रवणादिमनीरभवप्रभवावधितिथ्यधिपानहमीडे ।। २ ।।

शौनकवर्णितकीर्त्तिपदान् धनमुख्यवितारकपादसमर्चान्
पारविहीनकृपाजलधीन् वनवासनसक्तमुनीश्वरपूज्यान् ।
नीरदजित्वरनीलकचान् खरसंसृतिसागरपारदसेवान्
वैश्रवणादिमनीरभवप्रभवावधितिथ्यधिपानहमीडे ।। ३ ।।

दीनजनावनसक्तहृदो विनताखिलपापचयघ्नकटाक्षान्
पाणिधृताभयचिह्निमुखान् वनसम्भवदर्पहशोणनिजाङ्घ्रीन् ।
कारणवर्जितदानरतान् शरणागतरक्षणतुष्टहृदब्जान्
वैश्रवणादिमनीरभवप्रभवावधितिथ्यधिपानहमीडे ।। ४ ।।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीतिथ्यधिपस्तुतिः

[दण्डकम्]

भजदमरद्रून् करजितपद्माञ्छ्राणितकाम्यान्
कृत्स्नजगत्यधिकारधरान्
भवभयशमनाञ्छरदभ्रपटाँस्त्रिभुवननम्यान्
कृच्छ्रगतस्वानतपालान् ।
भुजगभकेशान् वरततिदातॄन् गुणमतिरम्यान्
कृपणकृपाम्भोनिधिहृदयान्
वन्दे रविमुखशिखिपर्यन्तग्रहधनदादिम-
कमलभवावधितिथ्यधिपान् ॥१॥

सनकादीड्याञ्जनकादिनुतान्नीरदचिकुरान्
वरदपदाब्जान्
मानवपूज्यान् विनताघहरान् सतताभीति-
प्रदपाणीन् ।
पादाम्बुरुहद्वयशोणान् घनकलिसागरपारद-
संस्मृतिविनतलवान्
वन्दे रविमुखशिखिपर्यन्तग्रहधनादि (नदादि) म-
कमलभवावधितिथ्यधिपान् ॥ २ ॥

श्रीतिथिपतिस्तुतिः

[शार्दूलविक्रीडितम्]

देवव्रातनुतान् मनोमलहरान् नम्रोक्तिलक्ष्मीजितः
स्वर्गीयक्षितिपान् जराकुमृतिहाँस्त्यक्तैषणाप्याङ्घ्रिकान् ।
स्पष्टेभप्रमुखान् कृपासलिलधीन् कष्टक्षमाध्रस्वरून्
श्रीमत्तिथ्यधिपान् नताघशमनान् सम्भावये सन्ततम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मोक्षान्तेप्सितदान् प्रबोधननतीन् भक्ताखिलेष्टस्पृशो
व्यासादिप्रणुतान् भुजङ्गचिकुरान् कान्तिच्छटाभास्वरान् ।
राजीभूतनतान् सुमार्चितपदान् विज्ञानविश्राणकान्
श्रीमत्तिथ्यधिपान् प्रपञ्चततिपान् सम्भावये सन्ततम् ॥ २ ॥

भक्तेष्टाभयदान् रुगालिहरणान् सर्वत्रिलोकीप्रजा-
पूज्यस्वीयपदान् यमिव्रजनुतान् नम्रालिदुर्बुद्धिहान् ।
मन्तुक्षान्तिनिधीन् शमादिगुणदान् श्रान्तिव्रजध्वंसकान्
श्रीमत्तिथ्यधिपान् यमादिवरदान् सम्भावये सन्ततम् ॥ ३ ॥

श्रीतिरुपतिवेङ्कटेशीस्तोत्रम्

[स्रग्धरा]

कामक्रोधोभमोहोद्धतिमुखधिषणामालिनी हेतुदोष-
स्वाकारारातिराजोविवशनिजमनोदुर्लभस्वाङ्घ्रिपद्माम् ।
नौमिश्री वेङ्कटेशीं विरतनिरतधीनिर्जिताम्भःप्रजात-
क्रुल्लोद्धर्तृप्रमुख्यान्तररिपुसुलभस्वीयपादारविन्दाम् ॥ १ ॥

धात्रीधृत्पक्षभेदिस्वरुधरकरवाराशिनाथादिदेव-
प्रह्लादविन्ध्यावलीशप्रमुखदितिभवोत्तंससंसेविताङ्घ्रिम् ।
नौमि श्रीवेङ्टेशीं निजचरणसरःसम्भवद्वन्द्वभक्ति-
प्राग्भारैकाश्रयस्वाशयकुमृतिजरारोगमुख्यापहर्त्रीम् ॥ २ ॥

यत्पादाम्भोजयुग्मप्रवणनिजधियो जन्ममूका दरिद्रा
अप्याशुस्वर्गलोकस्ववसतिधरणीनाथदेवव्रजार्याः ।
निःसोमस्वीयविद्यानिपुणिमकणिकानिर्मित-स्वीयकोश-
प्रौढिम्ना ह्लेपयन्ते सततमहमिमां वेङ्कटेशीं प्रपद्ये ॥ ३ ॥

स्वोत्पत्तिस्थाननीवोधरनिकरधराधीशवर्ष्मप्रजात-
स्वीयाङ्गाग्रप्रमूहृत्कमलजदिवसाध्यक्षसङ्घातकोटिम् ।
नौमि श्रीवेङ्कटेशीं जननमृतिजरासिन्धुमग्नस्वपादां-
भोजालीतास्वकीयाशयपुरुकरुणावारिराशिस्वचित्ताम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तीन्द्रास्यामरालीवदनभववपुर्वीरशंमातुलानीं
हस्तीन्द्रस्यन्दनाश्वद्विपदमुखनिजाकारलक्ष्मीप्रदात्रीम् ।
कुम्भीन्द्रक्षोणिधर्तृसमयविततिह्रुतिप्रौढवक्षः [क्षोजयुग्मां]
कुम्भीपाकप्रमुख्याशुभगतिशमनीं वेङ्कटेशीं प्रपद्ये ॥ ५ ॥

क्षीराम्भोराशिमध्याभरणतनुमहाभोगिभोगस्वतल्प-
ज्ञाताक्षौमस्ववासोव्यवहितरशनोत्सङ्गसौभाग्यकाष्ठाम् ।
नौमी श्रीवेङ्कटेशीं त्रिपुटपयनसन्तप्तचण्डांशुभानु-
स्पर्शभ्राजत्सुवर्णामृतजनुरुदराहङ्कृतिच्छित्स्ववर्णाम् ॥ ६ ॥

आस्तेऽतीत्य क्षराञ्चाक्षरमपि निखिलं यः पुमुत्तंसनाम्ना
लोकान्माख्याप्रसिद्धस्तदमलचरणस्पर्शिमन्माक्षरालीम् ।
कृष्णद्वैपायनार्यप्रभवकमलजोत्सङ्गजातादिमौनि
श्रेष्ठव्रातप्रणोतातुलनिजयशसं वेङ्कटेशीं प्रपद्ये ॥ ७ ॥

तत्तत्काम्यालिलिप्सापरवशमनसा कुर्वते ये स्वपादा-
म्भोजातार्चां तदाशाविषयसुखततिस्पर्शनैकव्रताढ्याम् ।
नौमि श्रीवेङ्कटेशीमिहपरसुखसङ्घातकाङ्क्षातिदूर-
स्वान्तभ्राजद्यताक्षप्रवरहृदयविद्योतितात्मप्रकाशाम् ॥ ८ ॥

धर्मार्थव्रातकामाखिलभवनिगडोच्छेदनस्वाख्यनाना-
वस्तूनां यौगपद्यस्पृशिकृतिलवया बाहुयुग्मद्वयाढ्याम् ।
नौमि श्रीवेङ्कटेशीं स्वचरणकमलप्रोद्भवद्वन्द्वभक्ति-
श्रद्धापूर्णावलीहृत्कमलवसतितासूचकाम्भोजवासाम् ॥ ९ ॥

निःशेषक्ष्माभुवःस्वर्मुखभुवनचयाकारविध्यण्डजाल-
राजेरस्यैक्यछत्राधिपतिहरिमुखैर्निर्जरैर्याभिसक्ता ।
नौमि श्रीवेङ्कटेशीचरणसरसिभूयुग्मभृङ्गाशयेष्ट-
क्षोणीसाम्राज्यमुख्यातुलविविधशुभस्पर्शनैकप्रवीणाम् ॥ १० ॥

भूभृद्यक्ष्मज्वरापस्मृतिमुखविरुजापूगजारठ्यदुर्मृ-
त्याद्याशेषेष्टभिन्नव्रजशमनचणस्वाङ्घ्रिपद्मप्रणामाम् ।
नौमि श्रीवेङ्कटेशीं निजपदसरसीजातसक्तान्तरङ्ग-
व्रातस्वान्तान्धकारक्षपणनिपुणताभ्राजदुग्रांशुकोटिम् ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्तक्षोभप्रमुख्याखिलविधविकृतिव्रातहेतुस्वकीय-
स्वान्तोत्थक्रोधलोभप्रमुखविरहितध्यातपादाम्बुजाताम् ।
दैत्यघ्नस्यन्दनाङ्घ्रिप्रमुखधरकराम्भोजयुग्मद्वयान्तां
भक्ताभीष्टप्रदानाभयमुखपिशुनां वेङ्कटेशीं प्रपद्ये ॥ १२ ॥

वाग्देवीवारिजातप्रभवतनुधराधारिभूपालजाता-
जानिस्वीयासुकान्तामरपतिमहिषीचक्रमुख्यैरजस्रम् ।
मल्लीपुन्नागजातीस्थलजलकमलप्रोद्भवागीपकष्ट-
स्वर्गक्ष्माजप्रसूनव्रजचितचरणां वेङ्कटेशीं प्रपद्ये ॥ १३ ॥

चेतःशान्त्यादिषक्टस्थिरतदितरभूभौमसौवर्गभोगा-
वैरागीमोक्षकाङ्क्षाप्रदनततततये श्राणयन्तीं जवेन ।
तट्पाराचात्मविद्याधिगमनविषये प्रापितेष्टाधिकारी-
भूतानां मोक्षदानस्पृशरतमनसं वेङ्कटेशीं प्रपद्ये ॥ १४ ॥

भक्तालीगण्यभिन्नप्रभवततिकृतामेयताभ्राजमान-
प्रायश्चित्तादिहैन्याञ्चितबहुविधदुष्कर्मपूगक्षमाब्धिम् ।
नौमि श्रीवेङ्कटेशीं यमनियममुखाशेषनैजाङ्गराजो-
राजद्योगप्रदानाहृदयम [शमन] मुखप्रोज्जनुःसाध्वसालीम् ॥१५॥

देव्याः श्रीवेङ्टेश्याश्चरणकमलभूयुग्मभक्तिप्रणाम-
श्रद्धापूर्वं तदीयस्तुतिममुमखिलाभीष्टदां ये पठन्ति ।
तेषां स्याद्दीर्घदृढतरतनुतासर्वविद्याधिपत्य-
श्रीमल्लक्ष्मीयुतत्वाखिलगुणविलसद्दारपुत्रादिभूतिः ॥ १६ ॥

श्रीतिरुपतिश्रीसप्तगिरीश्वरकमलस्वगृहवेङ्कट-रमणस्तुतिः

[मात्रिकं दण्डकम्]

भवनिजसंज्ञकभीकरसागरतारकनावौ भक्तव्रातसुरोर्वीजौ
चरणद्वन्द्वश्रोजितलोहितपाथोजातौ भृङ्गभुजङ्गमनिभकेशौ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणानतजनकाङ्क्षितवरततिसन्ततदाङ्घ्री शरदृतुजलधरनिभवस्त्रौ
वन्दे श्रीमत्सप्तगिरीश्वरकमलस्वगृहवेङ्कटरमणावनिशमहम् ।। १ ।।

निजपदशरणागतवत्सलतामुखगुणरम्यौ स्मृतिलवसाधितनतकाम्यौ
क्षीराम्भोनिधिवासिरमाहरिर्कालियुगमूर्त्ती विन्ध्यावलिवलिमुखनम्यौ ।
कृपणानम्रकृपाम्बुधिचेतोगाम्भीर्यातिशयोच्छिन्नकृतान्तकृताखिल-
भीतिभयौ
वन्दे श्रीमत्सप्तगिरीश्वरकमलस्वगृहवेङ्कटरमणावनिशमहम् ।। २ ।।

नारदपाराशर्यजशौनकमुखमुनिविनुतौ गीर्मेनाजार्चितपादौ
चरणानतजनकोटिप्रार्थितवरदातारौ कनकघनाभस्वशरीरौ ।
नीरदसन्निभकुन्तलमण्डितमस्तकजातौ भवजलनिधिपारदपादौ
वन्दे श्रीमत्सप्तगिरीश्वरकमलस्वगृहवेङ्कटरमणावनिशमहम् ।। ३ ।।

पद्मानतविनतातनुभवयानारूढौ विनतजनाखिलदुरितघ्नौ
वीणावादनमुरलीगायनलोलस्वान्तौ हरिणविलोचनपद्माक्षौ ।
एणाङ्काग्रे भवतनुभामौ बिम्बन्यक्कृच्छोणाधररमणीयास्यौ
वन्दे श्रीमत्सप्तगिरीश्वरकमलस्वगृहवेङ्कटरमणावनिशहम् ।। ४ ।।

श्रीतुङ्गभद्रास्तोत्रम्

[भाराक्रान्ता]

सर्वैश्वर्यव्रजवितरणीं वाराहदन्तोद्भवां
कामक्रोधप्रमुखशमनीं रागादिनिर्मूलिनीम् ।
श्रीहेरम्बाग्निजमुखनुतां वाणीरमोमाकृतिं
तुङ्गं भद्रं सपदि ददतीं श्रीतुङ्गभद्रां भजे ।। १ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीतुङ्गास्तोत्रम्

[शालिनी]

वैराग्याप्त्यां रागिहृद्दुर्लभाङ्घ्रिं
जारठ्यघ्नीं निर्जराल्यर्चिताङ्घ्रिम् ।
जीवेन्द्रन्यक्कृद्वचःश्रीप्रणम्रां
वन्दे तुङ्गां कारुणीतोयराशिम् ॥ १ ॥
लक्ष्मीकान्तोमाधवप्रापकार्चां
पापघ्नाङ्घ्रिं कुञ्जरादिप्रदात्रीम् ।
ऋष्यश्रृङ्गस्वर्णधिक्कारिवर्णां
वन्दे तुङ्गां ज्ञानभानुप्रदाम्वुम् ॥ २ ॥
नम्राभीष्टाशेषधर्मादिदात्रीं
मोक्षस्रष्ट्रीं राज्यसम्पत्स्पृगर्चाम् ।
रुङ्मृत्युघ्नीं विश्वरक्षाप्रवीणां
वन्दे तुङ्गां भीतिहृत्पादरेणुम् ॥ ३ ॥
श्रृङ्गाद्रिस्थां योगिसञ्चिन्तिताङ्घ्रिं
शान्तिश्रीदाम् ऋष्यश्रृङ्गार्चिताङ्घ्रिम् ।
क्षान्ताघालीं कृत्तनम्रश्रमालिं
वन्दे तुङ्गां योगसिद्धिप्रदात्रीम् ॥ ४ ॥

•

श्रीतुङ्गास्तोत्रम्

[नन्दनम्]

विधिविनुतामनन्तभुवनप्रजेशदन्तोद्भवां
हरिनिरतामपारकरुणाजनुर्महीमानसाम् ।
रुचिरजलामहीन्द्रशयनाब्जमौल्यापिकां
हृदयपयोजनुष्यविरतं नमामि तुङ्गामहम् ॥ १ ॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीतुङ्गास्तोत्रम्

[हरिणी]

अमृतरुचिवा: श्रीकृष्णाङ्घ्रिप्रसादवितारिका
विमलसलिला ऋष्यश्रृङ्गप्रमुख्यसमर्चिता ।
कुचजितधरा पारावारप्रजातहसन्मुखी
भवतु सततं भूत्यै तुङ्गा रमेशरदोद्भवा ॥ १ ॥

●

श्रीतुङ्गभद्रास्तवः

[पुष्पदाम]

काम्यालीस्पर्शैर्भजदमरलता शारदाभ्राभवस्त्रा
नम्या गीर्वाणैर्भवभयहरणी दूरतोऽपास्तवार्भूः ।
रम्यास्याम्भोधृद्भ्रमरफणिकचा वारिताशेषशोका
दर्भ्यार्ध्वोद्धत्यै भवतु मम शुभश्राणिका तुङ्गभद्रा ॥ १ ॥

पारावारोर्मिः कृतहरिभजना शौनकादीडिताम्भो-
धारामाहात्म्या कृतयमशमना मेनकाद्यर्च्यपादा ।
धीराग्र्यैर्गण्या कृतनतनिकरा पीनतुङ्गस्तनाढ्या
दर्भ्यार्ध्वोद्धत्यै भवतु मम शुभश्राणिका तुङ्गभद्रा ॥ २ ॥

अष्टानिष्टघ्नी गुणमणिरुचिरा वीनवाहाङ्घ्रिधूली-
हृष्टालीतुष्टा गणपमुखनुता दीनरक्षाप्रवीणा ।
इष्टालीस्रष्ट्री प्रणमनकणिका मानहीना धरत्री
दर्भ्यार्ध्वोद्धत्यै भवतु मम शुभश्राणिका तुङ्गभद्रा ॥ ३ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीतुङ्गभद्रातीरवर्त्तिश्रीशृङ्गगिरिमण्डलान्तर्गत-
श्रीशकटपुरी (वण्डगेडी) क्षेत्रे
श्रीमुरलीधरदत्तात्रेयस्तुतिः

[दोधकम्]

उद्धवहैहयमुख्यनिजान्तेवासिनिकायसमर्चितपादौ ।
सन्नतसन्ततिरक्षणदक्षौ नौम्यनिशं मुरलीधरदत्तौ ॥ १ ॥
कुण्डिनभूपतिभीष्मतनूभूमुक्तिनिजाख्यकलत्रसमेतौ ।
हस्तिमुखेप्सितदानसमर्थौ नौम्यनिशं मुरलीधरदत्तौ ॥ २ ॥
भोगिधराधरभोगविराजत्तल्पपुमुत्तममूर्त्तियुगाढ्यौ ।
नम्रकरामलकाखिलविद्यौ नौम्यनिशं मुरलीधरदत्तौ ॥ ३ ॥
पद्मसमुद्भवपद्मनिकायशत्रुकलाधरपूजितपादौ ।
पद्मविजित्वरनेमकराङ्घ्री नौम्यनिशं मुरलीधरदत्तौ ॥ ४ ॥
भूमिगनाकगभूतिसमेतसंसृतिमोचकमार्गदपादौ ।
भीष्मतनूजनिमुक्त्युपगूढौ नौम्यनिशं मुरलीधरदत्तौ ॥ ५ ॥
अङ्गसमुज्ज्वलकान्तिविधूताहङ्कृतिवारिदवासरनाथौ ।
चन्द्रकुलोद्भवचन्द्रकुलोत्थौ नौम्यनिशं मुरलीधरदत्तौ ॥ ६ ॥

●

श्रीतुङ्गभद्रातीरवर्त्तिश्रीशृङ्गगिरिमण्डलान्तर्गत-
श्रीहरिहरपुरक्षेत्रे श्रीवचनप्रसूयुगलिकास्तवः

[अश्वललितम्]

पदजितपङ्कजाङ्करमणीं कृतार्थितनतां भजत्सुरतरुं
करधृततोयजां सुरनुतां कृतान्तशमनीं भवार्त्तिहरणीम् ।
वरदपदस्मृतिं गरहरां कृपार्द्रहृदयां भुजङ्गचिकुरां
हरिहरपत्तनीयमठगां प्रणौमि वचनप्रसूयुगलिकाम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणनतेष्टदामघहरां गणाधिपतिसूरमादिविनुतां
जनिमृतिनीरधिप्रपतितप्रणम्रजनतागणोद्धृतिचणाम् ।
जलधरकुन्तलां घनकुचां सुमेषुरिपुमारतातपाद्ममुख्यवरदां
हरिहरपत्तनीयमठगां प्रणौमि वचनप्रसूयुगलिकाम् ॥ २ ॥

●

श्रीत्रिशक्तिस्त्रोत्रम्

[स्रग्विणी]

रागरोषस्पृहामोहदृप्त्याधरि-
व्रातवश्यावलीदुर्लभाङ्घ्र्यम्बुजाः ।
आन्तरारातिजिष्णुस्वेचतोबल-
श्चाप्यपादद्वयीर्नौमि गीर्माशिवाः ॥ १ ॥

शक्रवह्न्यम्बुनाथार्कवाराशिभू-
मुख्यदेवेन्द्रसेनादिदैत्यार्चिताः ।
पादपङ्केरुहद्वन्द्वषट्पञ्जरा-
दुर्मृतिघ्नस्मृतीर्नौमि गीर्माशिवाः ॥ २ ॥

यत्पदाम्भोजनत्या निजद्रव्यधी-
र्निर्जिताखण्डलस्वर्गिलोकार्यताम् ।
द्रव्यधीलेशहीना अपि द्राक्तरं
प्राप्नुवन्त्यद्भुतं नौमि गीर्माशिवाः ॥ ३ ॥

भूतपञ्चीकृतिप्राक्तनागप्रियां
भूतपत्नीं ततो भूधरप्रोद्भवाम् ।
भूतसामान्यकारुण्यवारांनिधि-
स्वीयहृद्वाभुंवो नौमि गीर्माशिवाः ॥ ४ ॥

कुम्भिकुम्भाभिमानापहारप्रभू-
कुम्भमुख्याङ्गलावण्यपाथोनिधीन् ।
कुम्भिवक्त्रादिसेव्या नतांहोऽम्बुधेः
कुम्भसञ्जन्मनो नौमि गीर्माशिवाः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूप्रमुख्याखिलोद्धृत्फणामण्डला-
शेषजिह्वाल्यवर्ण्यस्वमाहात्मिकाः ।
पारदस्वर्णघस्रेशदर्पापहृद्-
वर्ष्मरोचिर्लवा नौमि गीर्माशिवाः ॥ ६ ॥

नारदद्वीपसञ्जाततद्वर्ष्मभू-
कुम्भजातादिमौनीन्द्रसङ्घैर्नुताः ।
अक्षरब्रह्मरूपात्मत्त्वैकता-
ज्ञानदस्वार्चना नौमि गीर्माशिवाः ॥ ७ ॥

कामकाम्यानतव्रातकाङ्क्षाधिक-
स्पर्शसन्तुष्टचिन्तामृतप्रोद्भवाः ।
तादृगाशाविदूराशयानस्रसं-
सारनिर्मूलिका नौमि गीर्माशिवाः ॥ ८ ॥

धर्मतत्साधनाशेषसामग्रिका-
काममोक्षप्रदानप्रियापाङ्गिकाः ।
भूधराहङ्कृतिच्छेदकृच्छ्रोणिका-
भूधरोरोजनीर्नौमि गीर्माशिवाः ॥ ९ ॥

भूमुखाशेषलोकावलीवासकृद्-
भीतिमुख्यप्रदभ्रूविजृम्भादिकाः ।
भूमिमुख्यानताभीष्टलोकेशता-
दानतुष्टाशया नौमि गीर्माशिवाः ॥ १० ॥

ब्रह्मजीवप्रपञ्चादिनानात्वधी-
रूपदैत्याधमप्राणहृच्चिन्तनाः ।
(भक्तिमत्साध्वसव्रातहृत्काङ्क्षित-
स्पर्शकृन्मुद्रिकाराजिपाण्यम्बुजाः)
कुष्ठभूपालयक्ष्मज्वराद्यामय-
ध्वंसकाङ्घ्रिस्मृतीर्नौमि गीर्माशिवाः ॥ ११ ॥

१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शातकुम्भीपुरीनाथवैकुण्ठराड्-
राजनाद्रीशनाकादिपालादिभैः ।
निर्जरोत्तंसकैर्दिव्यपुष्पालिभिः
सन्ततं पूजिता नौमि गीर्माशिवाः ॥ १२ ॥

शान्तिदान्तिक्षमास्तिक्यसर्वस्पृहा-
त्यागमुख्यप्रदोपास्तिलेशाङ्घ्रिकाः ।
पादपद्माश्रितानां पुनर्जन्मभी-
ह्रापनैकव्रता नौमि गीर्माशिवाः ॥ १३ ॥

भक्तिभाजां यमाद्यष्टनैजाङ्गयुग्
योगतारं यमोच्चादिशक्तिप्रदाः ।
अङ्घ्रिसेवारतप्राक्तनाद्यंहसां
भस्मताप्रापिका नौमि गीर्माशिवाः ॥ १४ ॥

आश्रिताभीष्टदानव्रतानां विधि-
प्रेयसोमाद्रिजानां पठन् संस्तुतिम् ।
रोगहैन्याङ्गदार्ढ्यादियुक्श्रीयशः-
सत्फलः सत्कलत्रात्मभूभाग्भवेत् ॥ १५ ॥

●

श्रीत्रिशक्तिस्तोत्रम्

[कोकिलकम्]

मनसिजरोपलोभमुखशत्रुकदम्बवशी
विहितनिजाशयालिदुरवापपदामृतजाः ।
विजितनिजेन्द्रियव्रजमनःसुलभस्वपदां-
बुजयुगलीभंजे वचनसूकमलागिरिजाः ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सरसिजपद्मदृग्वनजशत्रुधरामरराड्-
बलिमुखदेवदैत्यनिकरार्चितपादयुगीः ।
प्रणतजरापमृत्युविविधामयपूगहृत्ति-
प्रवणहृदो भजे वचनसूकमलागिरिजाः ॥ २ ॥

अहह दरिद्रमूकनिकरा अपि यच्चरणा-
मृतजनिजन्मरेणुकणिकाकणिकास्मरणात् ।
झटिति भवन्ति नैजवसुगोर्जितपुण्यजना-
धिप [ति] गुरूर्भजे वचनसूकमलागिरिजाः ॥ ३ ॥

हिमकरतातमातृहिमदीधितिसप्रभवा-
हिमकिरणार्भकोल्लसितनैजशिरोरमणीः ।
पदशरणागताखिलशुगावलिहृत्करुणा-
मृतसलिलनिधीर्भजे वचनसूकमलागिरिजाः ॥ ४ ॥

द्विरदपदातियाजिरथकोशततिप्रमुखा-
खिलविभवप्रदायकनिजाङ्घ्रिसक्तस्मरणाः ।
चरणसरोजभक्तजनताकृतपापतति-
द्विरदहरीन्भजे वचनसूकमलागिरिजाः ॥ ५ ॥

अहिपितृतात (जनकार्यं) तातभुजगाधिपतल्पसरी-
सृपकृतकण्ठभूषणहृदम्बुजघस्रपतीन् ।
निजतनुरोचितविजितपारदभर्मदिना-
धिपनिकरा भजे वचनसूकमलागिरिजाः ॥ ६ ॥

निजमनुनामगाक्षरजपप्रमुखैः सुलभी-
विहितपरापरक्षरपरात्मरहस्यमुखाः ।
अमृतभवोद्भवोरुजपराशरपुत्रशुक-
प्रमुखनुता भजे वचनसूकमलागिरिजाः ॥ ७ ॥

गुणनिकरै (मणिभिः) (रुचिरगणै) वंशीकृतमनश्चतुरास्य-
चतुर्भुजपञ्चमुखापहृदात्मकराः (नखाः) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदनतिकृन्मनोरथततिद्रुतपूर्त्तिमुख-
व्रतरुचिरा भजे वचनसूकमलागिरिजाः ॥ ८ ॥

निरवधिसच्चिदाकृतिमनोज्ञसुखात्मकता-
प्रमुखनिजात्मबोधमुखसंस्पृशिसक्तमतीः ।
विकसितपङ्कजाततुलसीप्रमुखप्रसवा-
र्चितचरणा भजे वचनसूकमलागिरिजाः ॥ ९ ॥

क्षितितलमुख्यलोकसुतलादिसमस्त तल-
व्रजसृजिपालनादिपटुशक्तिनिजाकृतिकाः ।
अखिलचतुःसमुद्ररशनक्षितिनायकित-
स्वपदनता भजे वचनसूकमलागिरिजाः ॥ १० ॥

ज्वरनृपयक्ष्मकष्टमुखसर्वविधार्त्तिजरा-
कुमरणमुख्यवैधकुलिपिव्रजहर्तृनतीः ।
निजभुजविक्रमातिशयलेशनिराकृतदु-
र्जनवितती र्भजे वचनसूकमलागिरिजाः ॥ ११ ॥

लिखितघटेष्टयाभयगदाम्बुजघटशंखरथा-
वयवसृणीक्षुपुण्ड्रसुमराजिकराम्बुजनीः ।
विविधविकारलेशरहिताशययोगिगतति-
प्रणुतपदा भजे वचनसूकमलागिरिजाः ॥ १२ ॥

सुरपतिवीतिहोत्रयमनिर्ऋतिपाशिमरु-
त्सितकरुणाब्जमौलिविधितोयजनेत्रमुखैः ।
निजनिजकार्यपूगविधिवत्कृतिसिद्धिकृते
कलितपदा भजे वचनसूकमलागिरिजाः ॥ १३ ॥

प्रणतिकृदन्तरक्षशमबाह्यखवर्गदमो-
परतितितिक्षाप्रमुखसाधनदानरताः ।
भवजलशेवधिप्रपतितानतिकृन्निखिल-
श्रमहरणीर्भजे वचनसूकमलागिरिजाः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यमनियमासनासुयमनप्रमुखावयवा-
ष्टकयुतयोगसिद्धिदपदाम्बुजधूलिलवाः ।
अगतिनिजाङ्घ्रिपद्मशरणागतपापचया-
क्षमणरता भजे वचनसूकमलागिरिजाः ॥ १५ ॥

हृदयगभक्तिलेशविलसन्नतिमिमां पूर्व-
निजचरणाम्बुजातयुगलीप्रणुतिं पठताम् ।
निखिलसमस्तवित्सदसि गेयमहत्त्वकला
बहुधनदीर्घजीवितसुपुत्रमुखेष्टयुताः ॥ १६ ॥

•

श्रीत्रिशक्ति--त्रिमूर्तिस्तवः

[स्रग्धरा]

भक्तव्रातेष्टजालस्पृशिविधिनिपुणस्वर्गधात्रीप्रसूता
भूयो जन्मक्षयाख्यप्रसृमरभयदाम्भोधिपोताङ्घ्रिधूल्यः ।
भूयासुर्भूरिभूत्यै भ्रमरभुजगवार्वाहिनीकाशकेशा
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ १ ॥

अब्जाहङ्कारहुङ्कृन्निजकरकलिताशेषदाभीतिमुद्रा
वृष्टिक्षीणाम्बुवाहच्छविवसनयुगीवेष्टितस्वीयकायाः ।
भूयासुर्भूरिभूत्यै निजवरनिकरश्राणनासक्तचित्ता
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ २ ॥

पादाम्भोजप्रणम्रत्रिभुवनजनताकाम्यदानप्रवीणाः
पौलोमीकान्तहव्यादमुखदिविषसन्नम्यपादाम्बुजाताः ।
वाग्देवीपद्मयोनी निरुपमकरुणारम्यनैजप्रवृत्ता
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्स्नब्रह्माण्डभाण्डोदरगतनिखिलप्राणिनां प्राणभूताः
कृताशेषाङ्घ्रिपद्मप्रणतजनविपत्कारिकार्त्तान्तकृत्याः ।
वाग्देवीपद्मयोनी कृतनिजकृतितादायकस्वाङ्घ्रिचिन्ता
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ४ ॥

मेनारम्भाघृताचीमुखसुरललनासङ्घसङ्घृष्टपादा
दीनानन्यावकाङ्घ्रिप्रणतजनकृपावारिराशिस्वचित्ताः ।
वाग्देवीपद्मयोनी हिमहिमकनकाम्भोदपद्माब्जवर्णा
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ५ ॥

स्वीयाङ्घ्रयम्भोजचिन्तालवनिरतमनोऽभीष्टदाः संसृताख्ये
पारावारेनिमज्जन्निजनतवितते: पारसंस्पृशिपादाः ।
वाग्देवीपद्मयोनी सलिलधरमरुद्भोजिभृंगाभकेशा
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ६ ॥

श्रद्धाभक्त्यादिभास्वन्मतियुतविनताघावलीदग्धृदीक्षा
लोकालीसृष्टिरक्षालयकृतिपटुताः शक्तिशक्तस्वरूपाः ।
वाग्देवीपद्मयोनी सितदृशिविनताघावलीदग्धृवीक्षा
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ७ ॥

वीणाधृन्मौनिचित्तप्रभवदहनभूभ्राजितोत्सङ्गदेशाः
काणादाक्षस्वकाङ्घ्रिप्रभृतिनयगणज्ञानदातृप्रसादाः ।
वाग्देवीपद्मयोनी फणिधरणिधवागोचरस्वापदाना
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ८ ॥

अष्टैश्वर्याष्टसिद्धिप्रमुखबहुविधस्वीयपादाब्जनम्रा-
भीष्टालिस्पर्शकष्टव्रजशमनचणस्वाङ्घ्रिवार्भूपरागाः ।
वाग्देवीपद्मयोनी रुचिरगुणगणह्लादिताशेषभक्ता (लोकाः)
वाग्देवीपद्मयोनी जलधिजनिहरी पार्वतीचन्द्रमौली ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीत्रिशक्ति (त्रिमूर्त्ति) स्तवः

[दण्डकम्]

अगणितपरिमितिसंख्याहीनब्रह्माण्डव्रजकोटिश्रेणीनिकुरम्ब-
प्रजननपालनसंहृतिपण्डितमायाशक्तिविशेषविभास्वरनिजविद्भावान् ।
वीणाधरकरवाणीकृतसुमगणपतिमुखनिजतनुसम्भवलसितोत्सङ्गान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥१॥

अव्याजामितकारुण्यामृतजन्मधरित्रीशेवधिनिजहृत्पाथोजान्
निजचरणाम्भःसम्भवयुग्मप्रणतजनालीहर्षाम्भोनिधिनीरधिजान् ।
आशातिक्रान्तेष्टस्पर्शप्रमुखानुग्रहपूरोद्धृतनिजभक्तालीन्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥२॥

इभकुलवर्यस्यन्दनसैन्धवपत्तिमुखाखिलसम्पन्मण्डितराज्यरमा-
मुख्याशेषाभीष्टनिकायश्राणनपण्डितनिजचरणाब्जकृपाकणिकान् ।
इहपरलोकोभयविधकांक्षितभोगाल्यनुभवपूर्वकमुक्तिस्पर्शपटून्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥३॥

ईहाद्वेषप्रमुखाशेषमलीमसवर्जितयोगिध्येयपदाम्भोजान्
इष्टापूर्तंव्रतमुखनानाकर्माराधिततुष्टहृदम्बुजफलदातॄन् ।
ईशान् सर्वविधामितविद्यासम्पच्छक्तिप्रमुखैश्वर्यनिकायानां
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥४॥

उडुपतिगुरुसुता उडुपतिसहजाश्यालावुडुपककाङ्क्षितनिजशीर्षैः
उरगाहङ्कृतिवारकचिकुरानुरगपितामहगुरुनिजशय्यास्थानविला[खिलान्]।
सुरगादिस्वफणामणिभूषितविग्रहहारीर्विहितोरगवंशोत्तंसान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥५॥

ऊरीकृतनिजचरणाम्भोजनियुग्मजधूलिस्मृतिलवकृज्जनहृदयाम्भः-
प्रभवस्थाखिलकांक्षितपूगश्रेणीपूरणविषयात्मव्रतमुखदीक्षान् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कांक्षिस्वचरणविनताखिलसुरकोटीकोटीरोत्तमनिकरोत्प[लगन्धान्]
भ्राजन्मणिगणदीधितिरूपकदीपकमालानीराजितनिजपादाब्जान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥६॥

ॠवर्णाकृतिनिजचरणाब्जध्यानालम्बनजपमुखसाधननिकुरम्ब-
दाराविहितस्वोपास्तीनिहपरलोकाखिलभूतिव्रजसंस्रष्टॄन् ।
नारदशुकहयकन्धरलोपामुद्राकुम्भजशौनकशैलाद्यादिनुतान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥७॥

ॠतत्कामव्रातातिशयं तूर्णंश्राणितनतजनकाङ्क्षितनानर्द्धीन्
त्रिभुवनकुशलप्रापणनिजकृतिकृतआवश्यकनानाविधशक्तिविशेषान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥८॥

लृस्वाकारप्रमुखाराधनसंज्ञोच्चारणमुख्योपायफलीभूत-
स्वीयाशेषैश्वर्यव्रातत्रिदिवालयपतिधनदायकमुखसुरसन्धान् ।
व्याजविवर्जितपारविवर्जितमानविवर्जितकरुणाजन्मधराहृदयान्
वाणोपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥९॥

ॡकारादिमनिजरूपाख्यसर्वाक्षरततिनिजरूपाख्यालोकेश्वरकमला-
लक्ष्मीप्रमुखाक्षररूपालोकेड्लक्ष्मीलक्ष्मीड्ललितानामललाटाक्षान् ।
लालित्याञ्चितविलसल्लोकिन्यादिनिषेवितनिजपदकमलरुहान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥१०॥

एणाङ्काधिकशिशिरस्वान्तानेणीकमलजदर्पनिवारकनिजनयनान्
कणभुग्गौतमकपिलपतञ्जलिजैमिनिशुकगुरुकृतनयनिकरप्रदनमनान् ।
(शोणस्वाधररुच्यधरीकृतबिम्बाच्छोणाम्भोजविजिष्णुस्वकरपदान् ।)
आरुण्यश्रीधूतारर्पणसुतनिटिलाल्लावण्याकरतनुकारुण्यनिधीन्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥११॥

ऐहिकमामुष्मिकमपिभोगव्रजमयमोक्षं निजपदपङ्केरुहयुगली-
लग्नहृदम्बुजनिकराणां क्षणतस्तरुणारुणकरुणार्द्रस्वकटाक्षैः ।
ददते ये तान् पदपदपद्मानतजनतापूगमनोरथपूरणकल्पतरून्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओमिति येषामाख्यारूपध्यानोपायान् गायन्त्यनुदिनमविरत-
माम्नायान्तपुराणप्रमुखाशेषप्रामाणिकवाक्यनिकायाः ।
ऐंह्लींश्रीमितिनैजविभूत्यन्तर्गतनानाशक्तिशक्त्यपरीक्षाकृतमूर्त्ती(रूपा)न्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ।।१३।।

औदासीन्योज्ज्वलनिजवृत्तिविभावितविश्वगविषयव्रातान्तःकरण-
भ्राजद्विजिताक्षासुमनोधीसंयमिसन्ततिसुलभप्रत्यक्षीकरणाः ।
येषामङ्घ्रिसरोजयुगल्या त्रिभुवनसृष्टयवनप्रलयादिस्वविलासान्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ।।१४।।

अंगसमुद्भववीणाधृन्मुनिविग्रहवर्जितविघ्नविनाशकमुखरत्नान्
नीरक्षीरविभेदककार्त्तस्वररुचिपक्षकपुंगवपुङ्गवनिजयानान् ।
*वीणाधरकरवाणीकृतसुमगणपतिमुखनिजतनुसंभवलसितोत्संगान्
अंगसमुज्ज्वलकान्तिस्तोमविनिर्जितराकारजनीकरदिनकरकोटीन्
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ।।१५।।

अःसाधनवान्नृभिर्भुवमानीतो यदनुग्रहभवमहिमानं
मात्रद्वन्द्वध्यातायजुरुन्नीतोऽनुभवति यद्दत्तेन्दवभूतितती: ।
प्रणवध्याता सामभिरूढो भानुमतीतः पश्यति यत्पूर्णाकारं
वाणीपद्मजसरसिजनिलयासरसिजलोचनगिरिजागिरिशान् कलयेऽहम् ।।१६।।

●

श्रीत्रिशक्ति--त्रिमूर्त्तिस्तोत्रम्

[मयूरगतिः]

मानविवर्जितकोटिकदम्बककेशवनाभिसरोरुहजाण्ड-
व्रातविधापनपालनसंहृतिपण्डितताहृदयङ्गमशक्तीः ।
स्यन्दनवारणसैन्धवपत्तिमुखाखिलरीतिकसम्पद आशु-
स्वाङ्घ्रिनतावलये ददतीः कलयामि वचोजननीकमलोमाः ।। १ ।।

---

*इयं पङ्क्तिः पुनरुक्ता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्याजविवर्जितमानविहीनकृपाजलशेवधिनेजहृदब्जाः
पङ्कजसम्भवपङ्कजलोचनपङ्कजशत्रुकलाधरकान्ताः ।
नम्रजनव्रजहृद्गतसर्वमनोरथसन्ततिपूरणदीक्षा
रम्यनिजातुलहृत्पद्मा [अति] रम्यनिजातुलहृत्कमलाः ॥ २ ॥

नीरसमुद्भवसंजनु (रूरुज ?) चित्तजनुर्गणनायकमातृः
सर्वसमृद्धिसमूहसमर्पकनैजकृपामृतपूर्णकटाक्षाः ।
इन्दुपितामहमानसपङ्कजधस्रपतीन्दुसहप्रभवेन्दू-
त्तंसितनैजशिरोरमणीः [प्र] भजामि वचोजननीकमलोमाः ॥ ३ ॥

ईहितलेशविवर्जितमानससिद्धगणार्चितपादपयोजाः
पादपयोरुहनम्रजनव्रजमोदपयोधिशशाङ्कसमृद्धीः ।
सुप्रभ (दंभ) मुखाखिलसम्पदधीश्वरतोज्ज्वलभूरिकृपाढ्या
इन्दुविजित्वरशीतहृदः [प्र] भजामि वचोजननीकमलोमाः ॥ ४ ॥

वायुनिजाशनतातपितामहपन्नगवंशधराधरभोग-
स्वासनपन्नगभूषितनैजशिरोधरमुख्यसुपर्वनताङ्घ्रीः ।
पद्मजविष्णुगिरीशसतीः [प्र] भजामि वचोजननीकमलोमाः ॥ १५ ॥

स्वीकृतनैजपदामृतसम्भवयुग्मसमुद्भवधूलिलवस्मृ-
च्चित्तपयोभववर्त्तिसमस्तमनोरथपूरण [सुव्रत] दीक्षाः ।
त्वाष्ट्रपुलोममुखासुर[शासक, शास्त्रप] मुख्यसमस्तसुधाशिकिरीट-
व्रातनिघृष्टपदाम्बुभवाः [प्र] भजामि वचोजननीकमलोमाः ॥ ६ ॥
पादनमस्कृतिकर्तृनतावलयेऽनिलमानसजित्वरवेगो-
द्रेकवितीर्णसमस्तविधर्द्धिपरम्परया तदधीनितसर्वाः ।

भागवतोत्तममौनिमनोभवनिर्जरसैनिकनायकताता-
श्लिष्टमनोज्ञनिजावयवाः [प्र] भजामि वचोजननीकमलोमाः ॥ ७ ॥

भूमिगनाकगसर्वविधाखिलभूतिदमोक्षदनैजकटाक्षाः
शौनकनारदकुम्भसमुद्भवमुख्यमुनीन्द्रसमर्चितपादाः ।
चन्द्रकलाधरपङ्कजसम्भवदानवशास्तृवपुःसहजात-
स्वीयमनोहरगात्रलताः [प्र] भजामि वचोजननीकमलोमाः ॥ ८ ॥

---

*अत्र तृतीयः पादो न लब्धः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लाञ्छनहीनचरित्रविभास्वरनैजमतीलललनामणिरागो-
ल्लक्षणलक्षितरम्यललाटगतारुणतापजितारणिसूनूः।
सुन्दरताजनिभूमितनूर्विधिविष्णुललाटविलोचनलोलाः
सीमविहीनकृपाजलधीन् [प्र] भजामि वचोजननीकमलोमाः ॥ ९ ॥

एणसरोरुहमीनमनःस्थितदर्पनिकृन्तकलोचनरम्याः
काणभुजीमुखसर्वनयावलिपारगताप्रदनैजकटाक्षाः।
शोणनिजाधरकान्तिनिवारितसर्वनिजाभिमतिव्रजबिम्बाः
शोणपयोजविजिष्णुपदाः [प्र] भजामि वचोजननीकमलोमाः ॥ १० ॥

ऐहिकमौष्मिकमप्यखिलेप्सितभोगसमष्टिचयं मनुजानां
शीघ्रतरं सुलभीविदधाति यदीयपदाम्बुजयुग्मसमर्चा।
नैजपदामृतसम्भवसन्नतकृन्निकरेषु सदा दयमान-
स्वेक्षणपङ्कजनुर्जनुषः [प्र] भजामि वचोजननीकमलोमाः ॥ ११ ॥

श्रोतृसमस्तमलीमसवारकजप्तृवरप्रदयद्रुचिराख्यां
द्रष्टृमनोगतबन्धनिकायविमोक्तृयदाकृतिबोधकमन्त्रम्।
ओमितिवर्णनकृत्रिमवाक्ततयः सशिखा निगदन्ति मुहुस्ताः
ओंजपपुष्टहृदम्बुजनीः [प्र] भजामि वचोजननीकमलोमाः ॥ १२ ॥

नित्यतदन्यविवेचनसम्भवतीरविरक्तितृणीकृतविश्व-
स्वान्तसमुद्भववृत्तिसमूहमनोहरमानसशुद्धिकृतार्थाः।
योगिन आशुतरं सुलभं च यदीयपदाम्बुजनुर्युगसाक्षात्-
कारसमर्थतया विलसन्ति भजामि वचोजननीकमलोमाः ॥ १३ ॥

उद्यदहर्पतिपूर्णकलानिधिकोटिसहस्रकदम्बकजिष्णु-
स्वाङ्गलसत्सुषमातिशयाञ्चितकान्तिजिताब्जजविष्णुगिरीशाः।
हेमनिजोदरदारकनत्कनकादिनिजाकृतिहाटकरेतो-
मानसपद्मसहस्रकरान् [प्र] भजामि वचोजननीकमलोमाः ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदशम्यां तिथौ श्रीवासुकिस्तोत्रम्

[अश्वललितम्]

भुजगगणार्चितं नतकृपाजनिक्षितिहृदं फणिव्रजपतिं
रथगजमुख्यदं स्वरमणी (महिषी) मणिव्रजवृतं प्रणम्रवरदम् ।
श्रितजनहर्षदं निखिलविकृतस्वविनुतिं जिताक्षसुलभं
हृदि कलयामि सन्ततमहं गिरीशगलमालिकापदजुषं कुशलदम् ॥ १ ॥

उडुपतिधृत्परं नतजनाखिलेष्टततिदं धराध्रसुहृदं (जगद्धरसखं)
चरणरतर्द्धिदं परिचरत्कलत्र (स्वदार) निकरं सुरव्रजनुतम् ।
शुचिजविहारदं (कं) निशितधीवितारकपदं विभूतिततिदं
हृदि कलयामि सन्ततमहं गिरीशगलमालिकापदजुषं कुशलदम् ॥ २ ॥

निटिलदृगाश्रितं सुरसतीप्रगीतसुगुणं कृपाजलनिधिं
शशिशिशिराशयं नयचयस्पृशिप्रियधियं मनोहरमतिम् ।
इहपरसौख्यदं नवघन (मधुकर) च्छविस्ववपुषं (कलेवररुचिं)
मनीषिनृपतिं
हृदि निदधामि सन्ततमहं गिरीशगलमालिकापदजुषं कुशलदम् ॥ ३ ॥

प्रणवपरायणं विरतधीप्रमुख्यरुचिरं परात्मनिरतं
नियतमनोभवं प्रणतिकृत्समस्तशुभदं स्मितास्तशशिनम् ।
शितधिषणाञ्चितं हिमधरोद्भवाधवपदाम्बुजातमधुपं
हृदि निदधे निरन्तरमहं गिरीशगलमालिकापदजुषं कुशलदम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीद्वारकाशारदापीठाधिष्ठितश्रीधरणिगुरु-श्रीत्रिविक्रमार्य-नवरत्नमालिका-स्तुतिः

[रुचिरा]

मनोमलव्रजमलिनालिदुर्लभा-
न्विरागिताञ्चितसुलभाङ्घ्रिसेवनान् ।
तपोमुखद्रविणजनैर्नमस्कृतां-
स्त्रिविक्रमाभिधधरणीगुरून्भजे ॥ १ ॥

गिराश्रिया सपदिजिताङ्गिरःप्रभू-
धनाधिपीकृतनिजपत्सकृन्नतीन् ।
जरारुजाकुमरणमुख्यकृन्तनां-
स्त्रिविक्रमाभिधगुरुपान्विभावये ॥ २ ॥

कृपासुधाजलनिधिमानसाम्बुजा-
न्गिरीन्द्रजागिरिशपरायणाशयान् ।
करीश्वरप्रमुखरमाप्रदानतीं-
स्त्रिविक्रमाभिधवसुधागुरून्भजे ॥ ३ ॥

सरीसृपप्रमुखगरादिभीहरा-
ञ्छरीरभाजितपुटपाकभमंकान् ।
समस्तदुष्कृतिहृपदाम्बुजस्मृतीं-
स्त्रिविक्रमाभिधजगतीगुरून्भजे ॥ ४ ॥

सरोजनुःप्रभवचतुर्भुजावनी-
धरावनीधरतनुजाधवाकृतीन् ।
प्रकाशितश्रुतिमतमुख्यतत्त्वकां-
स्त्रिविक्रमाभिधयमिपुङ्गवान्भजे ॥ ५ ॥

नराधिपीकृतनिजपादुकार्चका-
न्धराभुवर्मुखलघुतामतिप्रदान् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्वरादिमाखिलविधरोगनाशकां-
स्त्रिविक्रमाभिधयतिभूपतीन्भजे ॥ ६ ॥

निराकृतप्रणातमनोमलीमसा-
न्करांबुभूधरवरवेणुदण्डकान् ।
परास्तधीविकृतियमिव्रजेडितां-
स्त्रिविक्रमान्हृदि कलये जगद्गुरून् ॥ ७ ॥

उमारमोदितजननीपदाम्बुज-
प्रसाददाखिलविधमन्त्रशेवधीन् ।
शमादिषड्गुणमणिसंस्पृशिप्रियां-
स्त्रिविक्रमान्मनसि दधे महोगुरून् ॥ ८ ॥

श्रभावलीहृतिपटुपादपूजना-
न्क्षमानिधिस्वहृदयनीरसंभवान् ।
यमादिभिर्जितयमभीकृतानतां-
स्त्रिविक्रमाभिधयमिभूभृतो भजे ॥ ९ ॥

श्रीद्वारकाशारदापीठाधीश्वर श्रीधात्रीगुरु श्रीत्रिविक्रमतीर्थाष्टकस्तवः

[पृथ्वी]

निजाङ्घ्रिसरसीरुहद्वयपरागधात्रीप्सिता-
खिलार्थततिदायकत्रिदशसद्मधात्रीरुहम् ।
पदाब्जनतिकृत्कृते निजकरस्थधात्रीफली-
कृताखिलनयव्रजं हृदि दधामि धात्रीगुरुम् ॥ १ ॥

पयोभवसमस्त-भाभिमतिहृत्करस्पष्टित-
प्रणम्रभयनाशकृद्वरदबोधमुद्राधरम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जपासुमदिनाधिपच्छविविजिष्णुकान्त्यञ्चिता-
म्बरावृतमनोहरस्वतनुमाश्रये सद्गुरुम् ॥ २ ॥

पदार्चकजनावलीनिखिलकाम्यवस्तुव्रज-
प्रदानरतपङ्कजप्रभवकाम्यकार्यार्चनम् ।
भजामि शरणागतप्रणतरम्यचेतोऽम्बुज-
प्रभावलवविज्जनप्रचयनम्यपादाम्बुजम् ॥ ३ ॥

जितेन्द्रियपरम्पराधिषणविष्णुतीर्थाभिध-
प्रकृष्टयमिभूमिभृत्करसरोजनुःसंभवम् ।
भजामि विनतावलीविहितपापकोटिच्छटा-
निजाकृतिमदोद्धतद्विरददारिपञ्चाननम् ॥ ४ ॥

विदर्भपतिजामनोऽम्बुजदिवाकरस्थापित-
प्रधाननिजधामगप्रवरशारदापीठकम् ।
भयानकभवार्णवप्रपतितावनादिव्रतै-
स्त्रिविक्रमनिजाभिधां सफलयन्तमीडे गुरुम् ॥ ५ ॥

सरोजसदनाधवत्रिदशपूर्वभूभामिनी-
कलानिधिशिरोमणिप्रमुखदेवताङ्घ्र्यर्चकम् ।
पदाम्बुजनमज्जनानुभवगोचरप्राप्तिम-
त्कृतान्तकृतभीमुखादिशमनं कृपाब्धिं भजे ॥ ६ ॥

मरालविनतातनूजनिवृषप्रकाण्डाकृति-
स्वकीयवरवाहनप्रभृतिसर्वदेवात्मकम् ।
सुवर्णमुखलौकिकाभ्युदययुक्तमामुष्मिका-
खिलेष्टसहितं भवाम्बुनिधिपारगं भावये ॥ ७ ॥

विरक्तिपरकाष्ठिकापिशुनवेणुदण्डोल्लस-
त्कराम्बुभवसूचिताभयवितारिचिन्मुद्रिकम् ।
सुवर्णधरणीधरप्रमुखलभ्यचामीकर-
त्रिविष्टपविलासिनीमुखविरक्तिदं संश्रये ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतं नमदभीष्टदस्वचरणाम्बुजातस्मृतेः-
समस्तनतकष्टहृस्वचरणस्य पृथ्वीगुरोः ।
पदाब्जयुगलाष्टकं पठति यस्तदीया भवे-
न्निजावयवकाष्टकोल्लसितयोगसिद्धिर्ध्रुवम् ॥ ९ ॥

●

श्रीत्रिवेणीस्तोत्रम्

[अश्वललितम्]

रघुपतिनारदादिकलितास्त्रिलोकजनतालिपावनजला-
गिरिशरमेशमुख्यनिरताः शशाङ्कवंशजादृतपदाः ।
शशधरधारिशीर्षकलिताहिनाथतनुतल्पपद्मसदना
हृदि कलयामि निर्जरनदीदिनेड्जनिसरस्वतीरनिशम् ॥ १ ॥

विभवदनेजनीरकणिका उमेश्वररमेश्वराजदयिता
निजनिजकान्तमुख्यविनुताःषडास्यमुखनन्दितातुलगुणाः ।
सितकिरणाभ्रशङ्खवपुषो विरागिसुलभात्मपादकमला
हृदि निदधामि जह्नुतनयादिनेड्जनिसरस्वतीरनिशम् ॥ २ ॥

●

श्रीत्रिवेणीस्तोत्रम्

[हरिणी]

अखिलभुवनक्लेशोच्छेत्र्यः सुपर्वसमर्चिता
अमितकरुणासिन्धुस्वान्ता नतेष्टवितारिकाः ।
इभमुखरमादानासक्ता गिरीशमुखादृताः
पशुपतिधृते भानूद्भूते सरस्वति पात माम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विजितमदनप्राप्यस्पर्शा मुदम्बुधिचन्द्रिकाः
प्रणतसकलाबोधध्वंसाः फणीन्द्रनताङ्घ्रयः ।
रघुपयदुराण्मुख्यप्रीताः प्रणम्रवरप्रदाः
पशुपतिधृते भानूद्भूते सरस्वति पात माम् ॥ २ ॥

अमरविहितस्वीयादिष्टाः समृद्धिदपादुका
धरजनिरमावाणीसख्यः प्रणम्रविभूतिदाः ।
प्रणतगणपप्रद्युम्नाद्या अजादिसुरार्चिता
पशुपतिधृते भानूद्भूते सरस्वति पात माम् ॥ ३ ॥

नयततिवचोबोधस्रष्ट्र्योऽधरारुणिमाञ्चिताः
प्रचुरसुषमभ्राजत्काया निशेशनिभाननाः ।
द्रुहिणकलिता। कृष्णाभ्यर्च्या ललाटदृगीडिताः
पशुपतिधृते भानूद्भूते सरस्वति पात माम् ॥ ४ ॥

विबुधललनारत्नोद्गीताः शुभव्रजदायिका
विरतजनताप्रीतस्वान्ता हिमाभ्रहिमप्रभाः ।
प्रणवरतधीसेव्यस्वापः कृत्तप्रणवाश्रयाः
पशुपतिधृते भानूद्भूते सरस्वति पात माम् ॥ ५ ॥

●

श्रीत्रिदशनदीकलिन्दजासरस्वतीस्तवः

[नन्दनम्]

शरदृतुनीरदाभवसना निरस्तवाभूंकराः
परतरसद्गतिप्रदपटूर्वरालिदानव्रताः ।
खरभववार्धिपारवितरत्तरङ्गपारम्परी-
स्त्रिदशनदीकलिन्दगिरिजासरस्वतीः संश्रये ॥ १ ॥

११

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवकलिताखिलार्त्तिशमनीर्भजत्सुपर्वद्रुमान्
भवकमलोद्भवादिविनुता भगीरथार्द्यचिताः ।
त्रिभुवनपावनाम्बुवहनास्त्रिकालपापापहा-
स्त्रिदशनदीकलिन्दगिरिजासरस्वतीः संश्रये ॥ २ ॥

कृतकृतान्तसाध्वसहृतीः कृतान्तहन्त्रादृताः
कृतनिजकृत्यताप्रदनुतीः कृपासुधाम्भोनिधीन् ।
कृमिमुखसर्वजन्तुसुलभीकृतस्वरावासिताः
कृतहरशीर्षसह्मयमुनासरस्वतीः संश्रये ॥ ३ ॥

स्तनयुगपीनताकठिनताधनत्ववैशिष्ट्यभाक्-
कनकविजिष्णुसुन्दरतनूर्भनःकलङ्कापहाः ।
विनतजनाघवारणहरीन् विनम्रपीयूषपाः
वनजजभाण्डजारविसुतासरस्वतीः संश्रये ॥ ४ ॥

•

श्रीदक्षिणामूर्त्यादिचतुर्युग-गुरुस्तोत्रम्

[शार्दूलविक्रीडितम्]

भक्ताभीष्टवितारिनिर्जरतरूञ्छ्रीशौनकादिस्तुता-
न्पाणिच्छव्यवधूतपाथसिभवानज्ञानविध्वंसकान् ।
गेहस्थाद्यवधूतगेहियमिपांस्तत्तद्युगारम्भका-
ञ्छ्रीमद्दक्षिणवक्त्रदत्तयदुरूपश्रीशंकरार्यान्भजे ॥ १ ॥

पादानम्रकृपादिरम्यहृदयाञ्काम्यालिसंस्पर्शका-
न्कम्याद्यब्जभवान्तमात्मधिषणागाह्या (युक्ता) लिनम्याङ्घ्रिकान् ।
कृत्स्नाजाण्डनिकायपावनपदान्कृत्ताखिलार्तिव्रजा-
ञ्छ्रीमद्दक्षिणवक्त्रदत्तयदुपश्रीशंकरार्यान्भजे ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम्रौघाखिलपापदावदहनान्विज्ञानमुद्रालस-
त्तत्तन्मुद्रिकयोल्लसन्निजकरान्कारुण्यवारान्निधीन् ।
प्रालेयाहरधीशमेघतुहिनन्यक्कृच्छरीरच्छवी-
ञ्छ्रीमद्दक्षिणवक्त्रदत्तयदुपश्रीशंकरार्यान्भजे ॥ ३ ॥

●

श्रीदक्षिणमुखप्रमुखचतुर्युगगुरुस्तवः

उडुपतिचूडभोगिशयनानिलाशिशयनोडुपनायकधरा-
न्निखिलनिलिम्पपूजितपदान्वितीर्णविनमत्समृद्धिनिकरान् ।
निजवशवर्तिमुक्तिवनितान्विभूतिनिचयप्रदाननिपुणा-
न्हृदि कलयामि दणिक्षमुखावधूतपतिकृष्णशंकरगुरून् ॥ १ ॥

सनकसनन्दनादिविनुतांश्चतुर्मुखसुपर्वपार्चितपदा-
पदनतिकृत्कृपाजनिभुवस्त्रिदृग्द्विनयनद्विदृग्विनयनान् ।
विधुधरभामभामकधरान्कणादमुखसर्वशास्त्रजलधी-
न्हृदि कलयामि दक्षिणमुखावधूतपतिकृष्णशंकरगुरून् ॥ २ ॥

विरतमनोऽम्बुजातसुलभाञ्छशाङ्कघनवार्दकाञ्चनरुचीन्
सुरललनासमर्चितपदान्नितान्तसुषमामनोहरतनून् ।
प्रणवनिजाभिधाकृतिजुषः सदा प्रणवजापिमुत्स्पृशिरतो-
न्हृदि कलयामि दक्षिणमुखावधूतपतिकृष्णशंकरगुरून् ॥ ३ ॥

●

श्रीदक्षिणास्यस्तवः

[मन्दाक्रांता]

प्रालेयाद्रिप्रजनिहृदयाम्भोभवोद्यद्दिनेशं
हस्तीन्द्रास्यानलभवतनुभ्राजदुत्सङ्गदेशम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इन्द्राग्न्यादित्रिदशकलितस्वीयपादारविन्दं
वन्दे नित्यं हृदयसरसीसंभवे दक्षिणास्यम् ॥ १ ॥

लोपामुद्राघटभवतनूमुख्यमौन्यर्चिताङ्घ्रि
मेधाप्रज्ञाक्षरपरमवित्स्पर्शिमन्त्राक्षरालिम् ।
भोगीशानस्वशयनसहप्रोद्भवाप्राणकान्तं
वन्दे नित्यं हृदयसरसीसंभवे दक्षिणास्यम् ॥ २ ॥

उर्वीपालीविहितचरणाम्भोजधूलीस्मृदाली-
स्वाज्ञापात्राखिलजनलसत्क्ष्मामुवर्मुख्यलोकम् ।
घस्राधीशामृतनिजकरस्वर्गिवक्तस्वनेत्रं
वन्दे नित्यं हृदयसरसीसंभवे दक्षिणास्यम् ॥ ३ ॥

श्रीवाग्देवीसरसिजजनुःसिन्धुवर्ष्मप्रजाता-
दैत्यारातिप्रभृतिदिविजोत्तंससंघातपूज्यम् ।
बिल्वाम्भोजस्थलकमलभूचम्पकाद्यर्चिताङ्घ्रि
वन्दे नित्यं हृदयसरसीसंभवे दक्षिणास्यम् ॥ ४ ॥

●

श्रीदक्षिणाननस्तवः

[हरनर्तनम्]

भावभीतिहरं भवाकृतिधारिणं भजदिष्टदं
शारदाभ्रपटं वरस्पृशितत्परं जलभूकरम् ।
देवनम्यपदं मनोज्ञगुणाशयं श्रितकाम्यदं
दक्षिणाननमाश्रये हृदि सन्ततं शशिशेखरम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्तमृत्युभियं कृपार्णवचेतसं कृतकृत्यता-
प्रापकस्वनतिं सुवर्णमुखप्रदं सनकार्चितम् ।
संसृताम्बुधिपारदं घनकुन्तलं मतिदायकं
दक्षिणाननमाश्रये हृदि सन्ततं गिरिजाधवम् ॥ २ ॥

नम्रदेवगुरुं नतव्रजपालकं दुरिता (वृजिना) पहं
शौनकादिनुतं गणेशगुहार्चितस्वपदाम्बुजम् ।
इष्टदानपरं स्वरूपगतुष्टिदं हृतवन्धनं
दक्षिणाननमाश्रये हृदि सन्ततं भवभूतये ॥ ३ ॥

श्रीदशदिक्पालस्तवः

[मयूरगतिः]

संसृतिदन्तिहरीन्, भ्रमराम्बुदभृङ्गकचान् भजदामरवृक्षान्
शारदमेघपटान् वरदाननिषक्तहृदः करांधक्कृतपद्मान् ।
निर्जररम्यपदान् करुणामुखरम्यगुणान् द्रुतदापितकाम्यान्
नौमि शचीड्हुतभुग्यमनिर्ऋतिपाश्यनिलाब्धिजशम्भ्वजविष्णून् ॥ १ ॥

छिन्नकृतान्तभयान् पदनम्रकृपाम्बुनिधीन् कृतकृत्यितभक्तान्
शौनकमुख्यनुतान् कनकादिमदानरतान् वनसम्भवनेत्रान् ।
पारविहीनकृपान् करभास्वदभीतिमुखान् सुरमुख्यपदस्थान्
नौमि शचीड्ढुतभुग्यमनिर्ऋतिपाश्यनिलाब्धिजशम्भ्वजविष्णून् ॥ २ ॥

दिनमुखविनप्रणुतान् धनजित्वरकेशरुचीन् विनताघनिहन्तॄन्
अष्टदरिद्रहरान् नतकष्टविनाशपरान् सकलेष्टदपूजान् ।
शोणसरोजपदान् रणनिर्जितदस्युगणान्नृणमुख्यहपादान्
नौमि शचीड्ढुतभुग्यमनिर्ऋतिपाश्यनिलाब्धिजशम्भ्वजविष्णून् ॥ ३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदशनायकस्तुतिः

[मयूरगतिः]

भृङ्गविजिष्णुकचं भजदिष्टदकल्पतरुं भवभीतिविनाशं
वीरनुताङ्घ्रियुगं शरदातृविजिष्णुकरं शरदम्बुदकेशम् ।
रम्यगुणालियुतं नतकाम्यकदम्बकदं सुरनम्यपदाब्जं
भूपतिमन्त्रिचमूपमुखं दशहायननायकमण्डलमीडे ॥ १ ॥

कृत्स्नकृपाभरितं कृतसर्वजगत्यवनं हृतनम्रकृतान्तं
हेममुखाखिलदं ममतावितभक्तजनं नमदार्त्तिकृतान्तम् ।
धीवरधारिनुतं भवमुख्यकृपादनतं भवपारदपादं
भूपतिमन्त्रिचमूपमुखं दशहायननायकमण्डलमीडे ॥ २ ॥

मानवमङ्गलदं विनताखिलपापहरं विनताजमुखेड्यं
वाणमुखास्त्रधरं प्रणतर्णमुखापहरं मरणादिहतुष्टिम् ।
इष्टवितारिजपं नतकष्टविनाशकरं निहृताष्टदरिद्रं
भूपतिमन्त्रिचमूपमुखं दशहायननायकमण्डलमीडे ॥ ३ ॥

●

श्रीदशावतार(बुद्ध)स्तोत्रम्

[मेघविस्फूर्जिता]

कनत्स्वर्णक्षोणीसदनरमणीवर्ष्मजातप्रमुख्या-
दिहामुत्रावाप्याद्विमुखहृदयैर्लभ्यपादारविन्दम् ।
अनेकेहाश्रेणीविवशमनसां दुर्लभस्वाङ्घ्रिपद्मं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १ ॥

सुरेशाम्भोधीशाहरिन[1]रजनीनायकस्वाश्रयाश-
त्रिलोकीप्राणात्मप्रभृतिविनुतस्वाङ्घ्रिपाथःप्रजातम् ।

---

१. सूर्य ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जरादुर्मृत्यादिप्रशमनपटुस्वीयपादप्रसादं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ २ ॥

नितान्तं दारिद्र्यातिशयधिषणाजाड्यभाजोऽपितूर्णं
यदङ्घ्र्यम्भोजातस्मृतिलववशात् स्वीयलक्ष्मीवचोभ्याम् ।
कुबेरस्वर्गार्यौ विदधति सदा ह्रीविनम्रोत्तमाङ्गौ
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ३ ॥

सुधाश्युर्वीधर्तृप्रजनितवपुःक्षोणिभृत्क्षोणिभृज्जा-
सहोद्भूतस्वाङ्गं प्रचुरकरुणोद्रेकतो जन्तुमात्रे ।
कृपामुख्यादर्शायितनवतनुभ्राजमानस्वमूर्त्तिं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ४ ॥

पदाम्भोजातालिस्वमतिनिकरागण्यभिन्नस्वजन्म-
व्रजेष्वज्ञानाद्यान्यकृषत महांहांसि तन्मूलनाशम् ।
ततश्चद्राक्तेषां भवजलनिधेः कर्णधारावतंसं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ५ ॥

वपुर्लावण्यश्रीनृपतनुजतासर्वविद्याधनाली-
प्रमुख्याढ्यस्तादृक्सकलविभवभ्राजमानस्वकान्ताम् ।
समृद्धं राज्यं यस्तृणलघुतया भावयन्नोज्झदेनं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्मसिन्धुम् ॥ ६ ॥

श्रुतिव्रातव्यासद्रुहिणतनुभूव्यासजाताश्वघोष-
प्रमुख्यैः सामोदं निगदितलवस्वीयचारित्रलेशम् ।
भुजङ्गक्षोणीभृन्निखिलरसनावर्ण्यभिन्नापदानं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ७ ॥

मुमुक्षासन्तोषप्रजनितसुखव्रातकाङ्क्षालिहैन्य-
सकामानम्राणामपि सकलसंश्राणकाङ्घ्र्यब्जचिन्तम् ।
क्षरालीतद्भिन्नप्रकृतिपरमः पूरुषोत्तंससञ्ज्ञः
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ८ ॥

प्रगीतो गीतायां मुरमुखरिपोर्योऽभवत्तत्स्वरूपं
स्फुरत्स्वीयस्वान्तप्रणतहृदयोज्ज्वालितज्ञानदीपम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुमर्थव्रातद्राग्वितरणरतस्वीयहृत्तोयजातं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ९ ॥

प्रफुल्लाम्भोजातस्थलसलिलभूकेतकीकुन्दमल्ली-
बृहज्जातीमुख्यैः सुरभिकुसुमैः सन्ततं पूज्यपादम् ।
समस्तब्रह्माण्डव्रजपरिवृढोपात्तनम्यस्वरूपं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १० ॥

समस्ताभ्यो दिग्भ्यो निजपदयुगीमेत्य भक्तिप्रणम्रै-
र्धरित्रीशैर्विद्वन्मुकुटमणिभिः पामरैश्चार्चिताङ्घ्रिम् ।
ज्वरापस्मृत्यर्शःक्षयमुखरुजाव्रातविध्वंसकार्चं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ ११ ॥

अमेयां मायालीं दुरधिगमताभ्राजमानां नितान्तं
य आसीद्विस्तृण्वञ्जनमनसि तन्मारसञ्ज्ञासुरघ्नम् ।
कराम्भोजभ्राजन्नमदभयदब्रह्मविज्ञानमुद्रं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १२ ॥

अनङ्गक्षोभाय प्रकृतिविकृतिव्रातलेशातिदूर-
स्वचेतोयोगीन्द्रैरनिशकलितस्वीयपादाम्बुजातम् ।
सरोभूभूशम्भुप्रमुखदिविषत्संस्तुतस्वोपदेशं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १३ ॥

भवाम्भोधौ मग्नाञ्झटिति तत उद्धृत्य कारुण्यसिन्धु-
र्य आत्मानन्दाब्धौ श्रितजनततीर्मज्जयन् स्वोपदेशैः ।
स्पृहाशान्तिव्रातप्रमुखमददाच्छ्रान्तिजालप्रणाशं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १४ ॥

भजत्पाषण्डादिप्रमुखनिखिलापत्तिहृत्त्वं यदीयं
सुरेशश्रीनारायणकवचतो विश्वकर्मा पुराह ।
नतैनःक्षान्त्यब्धिं यमभयहरं संयमश्राणकाङ्घ्रिं
भजे मायादेवीप्रभववपुषं मूर्त्तिकारुण्यसिन्धुम् ॥ १५ ॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदिनपस्तवः

[विषमवृत्तम्]

दिनपं हिरण्यपरिहासिरुचितनु [रुचिं रुचितनु] तनूरहादकम्।
आश्रितदिविजभूमिरुहं भवभीतिभञ्जकनमस्कृतं भजे ॥ १ ॥

दिनपं शरद्धनतुषारतुहिनकिरणाभवाससम् ।
नम्रवरततिदानरतं कमलप्रमोदकरपाणिमाश्रये ॥ २ ॥

दिनपं जगत्त्रयनिवासिजननिकरनम्यपादुकम् ।
स्पष्टनततिकाम्यचयं करुणादिरम्यहृदयाम्बुजं भजे ॥ ३ ॥

दिनपं सहोद्भवरमेशशतमखमुखामरव्रजम् ।
भक्तनिकरकृतान्तमुखाखिलसाध्वसापहकृपाम्बुधिं श्रये ॥ ४ ॥

दिनपं कनत्कनकमुख्यविनतसकलेष्टदायिनम् ।
स्वर्गनिवसतिकृल्ललनामुनिसङ्घगीतचरणाम्बुजं भजे ॥ ५ ॥

दिनपं जगन्निकरपोषिनिजकरमनूरुसारथिम् ।
ऐहिकमुखसमस्तशुभपद्ममाश्रये भवपयोधिपारदम् ॥ ६ ॥

दिनपं नमस्करणमुख्यसुलभकृतितुष्टचेतसम् ।
नौमि हृदि विनतातनुजध्वजरूपिणं विनतपापकृन्तनम् ॥ ७ ॥

दिनपं मृगाङ्कधरणीसुतसुरगुरुसुहृत्स्वमानसम् ।
गौतममुखनयव्रजदं विनतेष्टदाभयदपाणिमाश्रये ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदिनकरश्रीहिमकरस्तुतिः

गुरुकविविनुतसमर्च्यौ करधृतगिरिनयनाब्जे ।
कमलजकुलसखिशत्रू दिनकर हिमकर पातम् ॥ १ ॥

घटभवमुखनुतपादौ रघुपतियदुपतिपूर्वौ ।
करततिकृतजनपोषौ दिनकर हिमकर पातम् ॥ २ ॥

करहृतभुवनतमिस्रौ त्रिभुवननयनपदस्थौ ।
पिशुनितदनुजनिधौत्यौ दिनकर हिमकर पातम् ॥ ३ ॥

श्रीदिनमणिकुलमणिस्तवः

पवनजरविसुतपद्मप्रभवजमुखकलिताङ्घ्रिम् ।
त्रिभुवनजनततिपालं दिनमणिकुलमणिमीडे ॥ १ ॥

निजपदसरसिजनम्रे-प्सितवरततिदकटाक्षम् ।
शरणगजनकरुणाब्धिं दिनमणिकुलमणिमीडे ॥ २ ॥

क्षितिजनिनिजतनुप्रीतिस्मृतभवदिनपतिपूगम् ।
रथमुखसकलदपादं दिनमणिकुलमणिमीडे ॥ ३ ॥

स्वचरणनिपतितहर्षा-मृतनिधिजलनिधिजातम् ।
यतिजनसुलभपदाब्जं दिनमणिकुलमणिमीडे ॥ ४ ॥

स्वशयनविधृतसुमित्रा-तनुजनिरमभवरूपम् ।
अधिपतिमखिलकलानां दिनमणिकुलमणिमीडे ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरचितपदयुगभक्तव्रजवरवितरणदीक्षम् ।
विधुधरकृतचरणार्चं दिनमणिकुलमणिमीडे ॥ ६ ॥

अतितरजवकृतपाद-प्रपतितजननिखिलर्द्धिम् ।
सुरगणविनुतपदाब्जं दिनमणिकुलमणिमीडे ॥ ७ ॥

अगणितविभववनिकाग्रस्पृशिरतचरणसरोजम् ।
जनकजतनुपरिरब्धं दिनमणिकुलमणिमीडे ॥ ८ ॥

सरसिजभवनगिरीशामरपतिमुखरचितार्चम् ।
कुशलवजनकशरीरं दिनमणिकुलमणिमीडे ॥ ९ ॥

अविरतकृतनिजसंज्ञा-जपनुतनिटिलहुताशम् ।
सकरुणहृदयपयोजं दिनमणिकुलमणिमीडे ॥ १० ॥

तनुमतिमुखनिजसर्वा-वयवगसुषममनोज्ञम् ।
गिरिजनिमुखनुतकान्तं दिनमणिकुलमणिमीडे ॥ ११ ॥

अधिगतनिखिलनयाली-कृतनिजपदरतलोकम् ।
स्वहसितहसितनिशेशं दिनमणिकुलमणिमीडे ॥ १२ ॥

धरणिगदिविभवभोगव्रजमुखसकलदपादम् ।
निजपदरुचिजितपद्मं दिनमणिकुलमणिमीडे ॥ १३ ॥

श्रुतिशिखरमुखरगीत-प्रवणगपरमरहस्यम् ।
निजमनुजपपरितुष्टं दिनमणिकुलमणिमीडे ॥ १४ ॥

निरुपमनिजतनुकान्ति-प्रशमितजलधरदर्पम् ।
विनियतमतिसुलभाङ्घ्रि दिनमणिकुलमणिमीडे ॥ १५ ॥

कृतनिजपदनतिपूगा-खिलशुभवितरणसक्तम् ।
यममुखभयचयनाशं दिनमणिकुलमणिमीडे ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदिनाधिपधनाधिपादिस्तोत्रम्

[वसन्ततिलका]

स्वस्वाधिकारमनुरुध्य यथाधिकारं
संस्पर्शितेभमुखमुख्यसुरप्रसादान् ।
तत्तद्दिनेश्वरतिथीश्वरकृत्यसक्तान्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ १ ॥

कारुण्यपूरितकटाक्षवितारिचेष्टा-
नम्रालिसम्मदविबोधपयोधिसोमान् ।
विद्याप्रदानतुलितानतनागराजान्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ २ ॥

भक्तेष्टदायकशशाङ्कधराच्युताजान्
नाकेशवित्तविधिवोधमुखप्रदातॄन् ।
ब्रह्मादिदेवसुखदुःखनिकायहेतून्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ ३ ॥

हर्म्याङ्गनामणिसुतादिसुखप्रदातॄन्
स्वर्गाङ्गनानिकरगीतनिजापदानान् ।
फालस्थलेखविनिमायकशक्तिदातॄन्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ ४ ॥

कामक्रुधादिरिपुजित्सुलभाङ्घ्रिपद्माञ्
छास्त्रालिबोधकुमुदोडुनिकायनाथान् ।
ॐकारयुक्तनिजमन्त्रकदम्बपूज्यान्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ ५ ॥

शारीरदार्ढ्यमतितैक्ष्ण्यमुखप्रदातॄ-
श्चित्तान्धकारहरकान्तिनखाञ्चिताङ्घ्रीन् ।
मोक्षैहिकार्थमुखसर्वसुखप्रदातॄन्
वन्दे दिनाधिपधनाधिपमुख्यनाथान् ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री दिनेशरजनीधवस्तवः

[नन्वनम्]

भ्रमरकचौ नतेष्टवरदौ भवाब्धिकुम्भोद्भवौ
शुभततिदौ पयोभवकरौ शरत्पयोधृत्पटौ ।
रुचिरमती रुगादिशमनौ सुरालिनम्याङ्घ्रिकौ
हृदि कलये दिनधिपनिशापती अजस्रं मुदा ॥ १ ॥

पुरुकरणौ रमेशनयने कृतान्तभीकृन्तनौ
धनमुखदौ ग्रहक्षितिपती कृतान्तसौम्यार्भकौ ।
[कनककरोज्ज्वलाभकिरणौ नमज्जनानन्दनौ]
हृदि कलये दिनेशरजनीधवावजस्रं मुदा ॥ २ ॥

रुचिरकृती नताघहरणौ गरुत्मदीडीडितौ
नलिनदृशौ प्रणुन्नतमसौ नयावलीश्राणकौ ।
विपदपहौ प्रणम्रशुभदौ समस्तसम्पत्तिदौ
हृदि कलये दिनेश्वरनिशाधवावजस्रं मुदा ॥ ३ ॥

●

श्रीद्वारकालक्ष्मीनारायणस्तोत्रम्

स्ववशगमतिजितचित्तोद्भवमुखरिपुसुलभाङ्घ्रे ।
अव कुशपुरपतिलक्ष्मीमुरहर तदितरदूर ॥ १ ॥

अविरतजननजरारुङ्मृतिमुखशमननिषक्त ।
अव कुशपुरपतिलक्ष्मीमुरहर हरिवलपूज्य ॥ २ ॥

सुरगुरुधनपतिजिष्णुस्ववचनधनततिदार्च्य ।
अव कुशपुरपतिलक्ष्मीमुरहर निरुपमशक्ते ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदनतजनकरुणाम्भोनिधिनिजहृदयसरोज ।
अव कुशपुरपतिलक्ष्मीमुरहर सहजनिदुर्ग ॥ ४ ॥

श्रितजनकृतनिखिलाभोगोव्रजजलनिधिघटजात ।
अव कुशपुरपतिलक्ष्मीमुरहर गजमुखदयित ॥ ५ ॥

तनुरुचिलवजितजाम्बूनदनवजलनिधिदर्प ।
अव कुशपुरपतिलक्ष्मीमुरहर फणिपतितल्प ॥ ६ ॥

सुरमुनिशुकमुखगीतस्वविभवचरणसरोज ।
अव कुशपुरपतिलक्ष्मीमुरहर परमपदार्थ ॥ ७ ॥

अरिदरमुखशरहस्ताम्बुजधृतवरद भयघ्न ।
अव कुशपुरपतिजिष्णुमुरहर सुरकरपूज ॥ ८ ॥

स्वकरुणकुसुमसवित्रीसुरुचिरतनुपरिरब्ध ।
अव कुशपुरपतिजिष्णुमुरहर विशदिततत्त्व ॥ ९ ॥

निरवधिजलनिधिनीवी क्षितिपतिपदकमलाले ।
अव कुशपुरपतिजिष्णुमुरहर भुवनततीश ॥ १० ॥

अगणितसुररिपुपूगान्तकरथपदधरहस्त ।
अव कुशपुरपतिजिष्णुमुरहर हृतनमदार्त्ते ॥ ११ ॥

जितमतिविकृतिनिकायीकृतपदरतनिकुरुम्ब ।
अव कुशपुरपतिजिष्णुमुरहर सरसिजनेत्र ॥ १२ ॥

कमलजभवविधिफालोद्भवहरिमुखकलिताङ्घ्रे ।
अव कुशपुरपतिजिष्णुमुरहर सुमशरतात ॥ १३ ॥

स्मृतिलवहृतनिजसर्वं श्रमततिपदवनजात ।
अव कुशपुरपतिजिष्णुमुरहर शमसुखदायिन् ॥ १४ ॥

परिमितिविरहितमन्तुव्रजसहनिरुपमचित्त ।
अव कुशपुरपतिजिष्णुमुरहर यममुखभीघ्न ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीद्वारका (मूलद्वार) शारदापीठाधिष्ठित-
श्रीमदग्निमूर्धगुरुस्तुतिः

[प्रमदाननम्]

धरणीपुराभिधराज्यमध्यगतोङ्गतीरसमुल्लस-
द्वरमूलबागलुशारदामठवैभवादिमकारणम् ।
कलयेऽग्निमूर्धगुरूत्तमं शुचिकीलिकाधरशीर्षता-
प्रभवाग्निमूर्धनिजाभिधानविचित्रतानुगुणप्रथम् ॥ १ ॥

निजविश्वरूपविभूतिबोधनभक्तलोककृपालुता-
मुखरम्यसद्गुणमालिकोल्लसदात्महृत्सरसीरुहम् ।
कलयेऽग्निमूर्धगुरूत्तमं यदुवंशशेखरशारदा-
रजनीशशेखरमुख्यनाकिमणिप्रसादभरास्पदम् ॥ २ ॥

निजपादनीरजभूरजोलवचिन्तकव्रजकाङ्क्षिता-
खिलमङ्गलव्रजसंस्पृशिव्रतलज्जितामरभूरुहम् ।
कलयेऽग्निमूर्धगुरूत्तमं कमलासनाम्बुजलोचना-
म्बुजशात्रवीयकलाधरप्रमुखाखिलामररूपिणम् ॥ ३ ॥

●

श्रीद्वारका (मूलद्वार) शारदापीठपारम्परीणश्रीपरमगुरु-
श्रीसदानन्दतीर्थगुरुस्तोत्रम्

[शिखरिणी]

रतस्वान्तान्वेदे भवभयहरान्माधवकला-
निधिस्वोत्तंसाङ्घ्रिप्रवणहृदयान्भक्तमणिभिः ।
वृतान्कृष्णानन्दप्रमुखयतिभिर्भानुभपटा-
न्सदानन्दान्वन्दे गुरुवरगुरून्दीनकरुणान् ॥ १ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीद्वारका (मूलद्वार) शारदापीठपारम्परीण-
श्रीकृष्णानन्दतीर्थगुरुस्तोत्रम्

[अनुष्टुप्]

भवसाध्वसहर्तारं
भाग्यवाराशिवार्धिजम् ।
भजत्कल्पमहीजातं
कृष्णानन्दगुरुं भजे ॥ १ ॥

खररश्मिलसद्वस्त्रं
वरदानरताशयम् ।
पद्मजिष्णुकरद्वन्द्वं
कृष्णानन्दगुरुं भजे ॥ २ ॥

नम्यशिष्टजनैर्नम्र-
काम्यदाननिजव्रतम् ।
सौम्यचित्तसरोजातं
कृष्णानन्दगुरुं भजे ॥ ३ ॥

कृतान्तभीहरं दीन-
कृपापीयूषनीरधिम् ।
कृष्णापूजारतस्वान्तं
कृष्णानन्दगुरुं भजे ॥ ४ ॥

पारदं भववाराशे-
र्मारदर्पनिकृन्तनम् ।
वरराशिदपादाब्जं
कृष्णानन्दगुरुं भजे ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनताखिलशिष्टालि
मानातीतमहत्त्वदम् ।
विनताशेषपापघ्नं
कृष्णानन्दगुरुं भजे ॥ ६ ॥

शास्त्रालिदपदाब्जार्चं
कलिहारिपदस्मृतिम् ।
कलिहन्तृपदार्चनं
(एणाङ्कहासिहासाढ्यं)
कृष्णानन्दगुरुं भजे ॥ ७ ॥

मूलबागलुविभ्राज(मूलद्वारपुरभ्राज-)
च्छारदामठधिष्ठितम् ।
मूलाज्ञानहरस्वाङ्घ्रि
कृष्णानन्दगुरुं भजे ॥ ८ ॥

कष्टसङ्घातसंहर्ता-
भीष्टपूगप्रदो गुरुः ।
अष्टकं पठतां तूर्ण-
मष्टसिद्धिप्रदो भवेत् ॥ ९ ॥

●

श्रीद्वारकाशारदापीठपारम्परीणश्रीपरमगुरु-श्रीविष्णुस्वामिस्तुतिः

[विद्युन्माला]

त्रैलोक्यस्थाशेषात्मस्थो
योगीन्द्रालीपूज्यस्वाङ्घ्रिः ।
कारुण्याब्धिस्वीयस्वान्तो
जीयात्पायाद्विष्णुस्वामी ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मातङ्गादिश्रीसंधात-
स्पर्शप्रौढस्वेक्षालेशः ।
मुक्त्याख्यस्त्रीरत्नप्रेष्ठो
जीयात्पायाद्विष्णुस्वामी ॥ २ ॥

वैराग्याढ्यप्रीतस्वान्तो
भक्तानन्दाम्भोराशीन्दुः ।
सच्चिन्मोदब्रह्माकारो
जीयात्पायाद्विष्णुस्वामी ॥ ३ ॥

तौल्यज्ञानप्रेक्ष्यग्राव-
स्वर्गिव्रातेट्कोटीरादिः ।
नभ्रश्रीन्यग्जातस्वर्गी-
ड्जीयात्पायाद्विष्णुस्वामी ॥ ४ ॥

श्रीशोमानाथाकारस्थः
कारुण्यस्योत्पत्तिक्षोणी ।
अन्तेवासिक्षोण्याचार्यो
जीयात्पायाद्विष्णुस्वामी ॥ ५ ॥

क्ष्माधृज्जाङ्घ्र्यं भोजाताली
भूंतिस्प्रष्टृस्वाङ्घ्र्यब्जार्चो ।
विश्वात्मत्वश्रीसंयुक्तो
जीयात्पायाद्विष्णुस्वामी ॥ ६ ॥

साभ्याढ्येक्षाराजिस्वान्तो
वैराग्येक्षासन्तुष्टात्मा ।
चन्द्राहंकारच्छिद्धासो
जीयात्पायाद्विष्णुस्वामी ॥ ७ ॥

शास्त्रव्रातप्रज्ञासिद्धो
भौमस्वर्गात्मानन्दस्पृक् ।
औदासीन्यस्वीयद्रव्यो
जीयात्पायाद्विष्णुस्वामी ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आरोग्यर्द्धी तेजोवृद्धी
आनन्दादिर्यत्पूजातः ।
हस्तस्थाः स्युर्धात्र्यास्तूर्णं
जीयात्पायाद्विष्णुस्वामी ॥ ९ ॥

श्रीद्वारकाशारदापीठपारम्परीणश्रीपरमगुरु-श्रीविष्णुतीर्थभगवत्स्तवः

[कनकप्रभा, महारथः]

अभयप्रदाङ्घ्रिनमनं समस्तदं
वरदायकं परगुरुं विरागिपम् ।
हृदयङ्गमात्महृदयं यमीश्वरं
हृदि विष्णुतीर्थभगवन्तमाश्रये ॥ १ ॥

करुणानिधिं हरिरतं हृतान्तकं
कनकादिदं यमिनुताङ्घ्रिपङ्कजम् ।
अरुणाम्बरं प्रणतहृन्मलापहं
हृदि विष्णुतीर्थभगवन्तमाश्रये ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीद्वारकाशारदापीठपारम्परीण-श्रीपरमगुरु-श्रीविष्णुस्वामिस्तुतिः

[हरिणी]

जितमनसि भूमुख्याप्याङ्घ्रिः सरागसुदुर्लभो
नतजनजरादुर्मृत्युघ्नो धरागुरुदेशिकः ।
धिषणवनपन्यक्कृद्वाणी रमीकृतसन्नतः
सततमवताद्विष्णुस्वामी कृपाम्बुनिधिर्मम ।। १ ।।

भुजगशयनक्षोणीधारिप्रजन्मधवाकृतिः
करिमुखरमादानासक्तो नमद्दुरितालिहृत् ।
यमिमणिशिरो भूषारत्नं परा क्षरतत्परो
हृदि विलसताद्विष्णुस्वामी कनत्कनकच्छविः ।। २ ।।

विकृतिकणिकाहीनस्वान्तो वराभयदायको
विबुधनिकरस्तव्यस्वाङ्घ्रिः शमादिवितारकः ।
श्रमविततिहृद्वीक्षालेशः क्षमामृतशेवधि-
र्हृदि विहरताद्विष्णुस्वामी यमप्रमुखप्रदः ।। ३ ।।

श्रीद्वारकाशारदापीठपारम्परीणश्रीपरमगुरु-श्रीविष्णुतीर्थभगवत्स्तुतिः

[अश्वललितम्]

सनकसनन्दनादियमिराट्समानशमतत्त्वबोधरुचिरा-
वनभवसंभवाम्बुभवदृक्सरोजरिपुशेखराकृतिधरान् ।
नतजनपापदावदहनान्यतीन्द्रमधुसूदनार्यकरजान्
परमगुरून्भजामि सततं जिताक्षमणिविष्णुतीर्थचरणान् ।। १ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतफलकृष्णपादनमनान्कृतान्तशमनान्कृपार्द्रहृदया-
न्धरणिगुरुत्रिविक्रमगुरुप्रमुख्यविनुतान्यमिक्षितिपतीन् ।
कनकविजिष्णुकान्तिललनाललामकनकादिपाशविमुखान्
परमगुरून्भजामि सततं जिताक्षमणिविष्णुतीर्थचरणान् ॥ २ ॥

प्रणतसमस्तकष्टहृतिभागभीष्टनिकरप्रदायकनतिः
श्रुतिततिशीर्षतत्त्वहृदय(सदय)प्रकाशकलितात्मबोधहृदयः ।
अणिममुखाष्टसिद्धिझटितिप्रदाननिपुणप्रसीदकणिकः
परमगुरुः प्रपातु सततं जिताक्षमणिविष्णुतीर्थभगवान् ॥ ३ ॥

श्रीद्वारकालक्ष्मीस्तुतिः

[शार्दूलविक्रीडितम्]

शश्वत्स्थायिविनश्वरार्थविभिदासंशीलनाप्ताखिल-
भोग्यव्रातविरागसम्पदमलस्वान्ताप्यपादाम्बुजाम् ।
रागद्वेषमुखान्तरारिजितधीलभ्येतरस्वाङ्घ्रिकां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ १ ॥

पीयूषाशनदेशिकद्रविणपाहङ्कारहुङ्कृतता-
भ्राजन्नैजवचोविलासकमलोद्रेकत्वमाप्नोत्यरम् ।
यत्पादाब्जसकृन्नतेरपि जनुर्मौक्त्यादिदारिद्र्यवान्
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ २ ॥

स्वर्णक्ष्माधरजाधराधिपसुतापूर्वोद्भवानुष्ठिता-
नन्तामन्दतुलादिवर्जिततपःसाम्राज्यफाल्याञ्चिताम् ।
संसारानलतप्तसन्ततसुधाधाराधराङ्घ्रिस्मृति -
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वीक्षामात्रलवापनीतचरणाम्भोजातभृङ्गायित-
स्वान्तव्रातजनुश्चयार्दितमहापापोपपापावलिम् ।
नागेट्स्यन्दनवाजिकोशपृतनामुख्याखिलश्रीप्रदां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ४ ॥

प्रोद्यद्घस्रमहीशदीधितिततिस्पर्शातिदेदीपित-
तप्तस्वर्णपयोजगर्भनिखिलाहङ्कारहुङ्कारिकात् ।
नागाधीश्वरनैजतल्पहृदयाम्भोजातचण्डच्छविं
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ५ ॥

पार्थाय स्वधवेन बोधितमभूत्सर्वोत्तमं वस्तु यद्-
ब्रह्माख्यं क्षरतोऽक्षरादपि परं तत्प्रापकाख्याक्षराम् ।
कृष्णादीपसमुद्भवाब्दववपुर्गीतस्वमाहात्म्यकां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ६ ॥

आम्नायालितदीयशीर्षगदितान् धर्मादिमोक्षान्तिमान्
सर्वार्थान् युगपत्प्रदातुमिव सञ्जातां चतुर्भिर्भुजैः ।
आशीर्वादसमीहकानतततेः सर्वेप्सितप्रापिकां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ७ ॥

एकच्छत्रलसत्स्वशासनमहाच्छायान्यगासादिता-
शेषक्षोणिभुवः स्वरादिसकलत्रैलोक्यवर्तिप्रजाम् ।
फुल्लाब्जोत्पलपङ्कजन्मतुलसीमल्लीमुखैरर्चितां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ८ ॥

कुष्ठापस्मृतिसन्निपातधरणोपालीययक्ष्मज्वर-
मूर्च्छोन्मादमुखाखिलामयचयोच्छेदप्रवीणस्मृतिम् ।
नम्रालीहृदयान्धकारजनकब्रह्मात्मभेदापहां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ९ ॥

भोजक्ष्मापतिपूतनाकुवलयापीडावनीसञ्जनुः-
कारूषाधिपडिम्भपालधरधुन्मुख्यासुहृत्प्रेयसीम् ।
क्षोणीनायकताप्रमुख्यविनमत्सर्वेष्टदानव्रतां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बाह्याशेषपदार्थजालतृणवत्तुच्छत्वविज्ञानते
निर्धूताखिलकामनाशयततिध्यातस्वपादाम्बुजाम् ।
शङ्खस्यन्दनपद्भयघ्नवरदभ्राजत्करामभोरुहां
श्रीमद्द्वारतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ ११ ॥

अम्भोभूनवमल्लिकाम्रकलिकानीलोत्पलाशोकद्रु–[?]
पाण्यग्रेभवतातशात्रवशिरोरत्नांशुराजत्पदाम् ।
वाणीशैलसुताप्रमुख्यमहिलागीतापदानां मुहुः
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ १२ ॥

भूयोऽनन्तभवाख्यसंसृतिमहावाराशिमग्नस्वपात्-
पाथोजाश्रितदीनलोकनिखिलभ्रान्तिव्रजोन्मूलिनीम् ।
चेतःशान्तिबहिःस्वदान्त्यकुशलक्षान्तिप्रमुख्यप्रदां
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ १३ ॥

भक्तात्यै यममुख्यसाध्वसततेरुच्छेदनार्थं द्रुतं
सानन्दं यममुख्यभूमिविलसद्योगाधिपत्यप्रदाम् ।
हेरम्बाद्यनिवार्यविघ्नदमहापापेभपञ्चाननं
श्रीमद्द्वारवतीपुरीपरिवृढां सम्भावये सन्ततम् ॥ १४ ॥

श्रीद्वारकाधीश्वरशारदाचन्द्रमौलीश्वरस्तुतिः

[शार्दूलविक्रीडितम्]

भक्ताभीष्टकदम्बदापनविधिप्रक्लेपितस्वद्रुमान्
संसाराम्बुधिवाडवायितनिजाङ्घ्र्यम्भोजयुग्मार्चनान् ।
भृङ्गव्योमभवाशिनीरदकचाँश्छ्रीशारदापीठगान्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम्राभीतिदमुद्रिकामुखलसद्धस्तावधूताम्बुजान्
वस्त्रान्यक्कृतशारदामृतधरव्रताताखिलाहङ्कृतीन् ।
पादाम्भोजनतेप्सितस्पृशिरताञ्छ्रीशारदापीठगान्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ २ ॥

क्षीराम्भोनिधिजाब्जयोनिगिरिजाकाम्याङ्गलावण्ययुग्-
दीनानन्यगतिप्रणम्रकरुणारम्यस्वधोवृत्तिकान् ।
जन्मादिप्रमुखारिमुख्यदिविषन्नम्यस्वपादाम्बुजान्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ३ ॥

श्रीकृष्णोभयभारतीक्षितिगुरुस्वाकारलीलावलीन्
कृत्ताशेषकृतान्तमुख्यभयभीप्राग्भारपारम्परीन् ।
कृत्स्नानम्रकृपाम्बुराशितहृदः हृद्यान् सुपारम्परीन्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ४ ॥

श्रीसच्चित्सुखतत्त्वपङ्कजजनुः श्रीजानकीधृत्करान्
श्रीकीलालजराभुवारुभवभूश्रीशौनकादीडितान् ।
श्रीभैमीघरफालनेत्रसहजाश्रीमेनकाजापतीन्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ५ ॥

नीरश्राणकपारदाम्बुधिभवन्यक्कृत्स्ववर्ष्मच्छवीन्
संसाराम्बुधिपारदायकपदाम्भोजातधूलीस्मृतीन् ।
वेणीनिर्जितनीरदातृनिकराञ्छ्रीचन्द्रचूडान् भजे
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ६ ॥

लीलाजाण्डकपीनवक्षसिजनुः कीनाशविध्वंसकान्
सौभाग्यार्जितवाहनत्वविनतापुत्राच्छवर्होक्षपान् ।
पापव्रातविमोचिताङ्घ्रिविनताञ्छ्रीचन्द्रचूडान् भजे
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ७ ॥

पादाम्भोजरजोलवस्मृतिकृतान् काणादपातञ्जल-
मीमांसाश्रुतिशीर्षमुख्यनयदानेणाङ्कधिक्कृन्मुखान् ।
पाण्यम्भःप्रभवोल्लसन्मुरलिकावीणाडमर्वादिमान्
नौमि द्वारवतीश्वराजरमणीचन्द्रार्धचूडान् भजे ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कष्टव्रातनिकृन्तनैकनिपुणा सर्वेष्टविश्राणकाः
तुष्टस्वान्तगभक्तितः प्रपठतां पद्याष्टकं निश्चिम् ।
साष्टाङ्गं प्रतिपादयेयुरखिलं सिद्धचष्टकं सत्वरं
श्रीमद्द्वारवतीश्वराजरमणीश्रीचन्द्रचूडा मुदा ॥ ९ ॥

श्रीद्वारकाधीश्वर(डाकोर)स्तुतिः

[वंशपत्रललितम्]

पादपयोजपूजकजनामरधरणिजनि
संसृतिमुख्यभीदनिकरद्रुत(क्षण)शमनपटुम् ।
षट्पदवायुभोजिजलधृच्छविचिकुरभरं
द्वारवतीपुरीशमनिशं शरणमहमये (हृदि मम निदधे) ॥१॥

हस्तगभस्तिधूतजलजन्यभिमतवितति
स्वर्णविजिष्णुवर्णविलसत्पटवृतवपुषम् ।
हस्तलसद्रथाङ्गजलजन्यमृतभवयुगं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ २ ॥

मन्मथसूप्रकाम्यरुचिरावयवरुचियुजं
निर्जरकोटिनम्यनिजपत्कमलजयुगलम् ।
दीनदयादिरम्यसुगुणव्रजलसितमतिं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ३ ॥

कृत्तकृतान्तभीतिशमलाखिलचरणनतं
कृत्स्नचराचरत्रिभुवनीशुभततिनिरतम् ।
कृच्छ्रतरापदि स्थितनतावनविधिनिपुणं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हेमसमस्तदर्पहररुग्विलसिततनुयुग्-
भीष्मसुताप्रमुख्यललनामणिगणरमणम् ।
पद्मजशम्भुनारदमुखस्तुतनिजचरणं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ५ ॥

सन्नतगोपिकाहृदयहृत्स्वललितविहृति
संसृतिशारदातुलवचोऽवितनतविजयम् ।
पूरितराधिकाकृतवृषव्रजफलविभवं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ६ ॥

भूधरतुङ्गपीनकठिनस्तनघटविलसद्-
वारसहस्रपूगयुगपद्रतिकृति निपुणम् ।
वेदमयाहिशात्रवधृतं नतदुरितहरं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ७ ॥

चुम्बितवेणुकाधरसुधाकलितसकलशुग्-
भञ्जनगोपिकामणिगणनयततिदनतिम् ।
धिक्कृतदारसोदरमुखं जितनलिनदृशं
द्वारवतीपुरीशमनिशं शरणमहमये ॥ ८ ॥

अनमदिष्टदाननिरतिव्रतधरचरणः
संस्कृतिकष्टकृन्तनचणस्मृतिपदगरजाः ।
नैजपदाष्टकं प्रपठतां वितरति भगवान्
सावयवाष्टकाक्षमतिनिग्रहविधिमखिलम् ॥ ९ ॥

श्रीद्वारकाशारदाशिवस्तुतिः

[शार्दूलविक्रीडितम्]

रागद्वेषमुखान्धकारनिकरग्रीष्मार्ककोटिस्मृतीन्
वैराग्याढ्यमनोऽम्बुजातिसुलभस्वीयाङ्घ्रिपाथोजनीन् ।
वृत्रारातिविरोचनार्यकलितद्वष्मोद्भवार्यर्चितान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादाब्जानतपापपूगविपिनप्लोषैकसक्तानलान्
भोगीन्द्रासनभोगिजिष्णुकवरीभोगीश्वरालङ्कृतान् ।
स्वीयाङ्गच्छविनिर्जिताम्बुदकनङ्कर्मक्षपानायकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ २ ॥

स्वीयश्रीविभवालिवाक्कतिझरीलेशावधूताखिलान्
हुङ्कारीकृतयक्षनायकसुराचार्यत्वमुख्यप्रदान् ।
पादाम्भोभवयुग्मसन्नतजरादुर्मृत्युरोगादिहान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ३ ॥

ब्रह्मोत्सङ्गसमुत्थशौनकहयग्रीवादिसम्पूजितान्
मन्त्राल्यक्षरतः क्षराक्षरपरब्रह्मप्रबोधप्रदान् ।
काम्यालीप्सुपदाब्जनम्रजनताकाङ्क्षाधिकश्राणकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ४ ॥

धर्मादिप्रभवालिमुक्त्यवधिकाशेषार्थदायिस्मृतीन्
भक्तालीहृदयाम्बुजातकुहरभ्राजत्स्वपादाम्बुजान् ।
तत्रस्थान्तरसर्वसन्तमसहृज्ज्ञानप्रभोद्दीपकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ५ ॥

क्षोणीनायकतामुखेप्सितवरस्पर्शोद्धृताङ्घ्रिश्रितान्
स्वीयाज्ञापरिपालकक्षितिभुव:स्वर्गादिलोकव्रजान् ।
कुष्ठोर्वीपतियक्ष्ममुख्यनिखिलव्याध्यादिनिर्मूलकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ६ ॥

अज्ञानाभिधदानवाधमहृतिप्रौढस्वपादस्मृतीन्
हस्ताम्भोजलसद्रथावयवयुग्रन्थाजगव्यादिकान् ।
चित्तक्षोभलवातिदूरधिषणध्याताङ्घ्रिपङ्केजनीन्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ७ ॥

क्षीराम्भोनिधिलोडनोद्भववपुर्विश्वम्भराधृत्सुता-
पौलोमीमुखलाख[नाक]लोकललनोत्तंसालिगीताङ्घ्रिकान् ।
शान्तिक्षान्तिदमोऽस्तिकत्वनिखिलन्यासादिसंस्पर्शकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारुण्यामृततोयराशिलहरीराजत्कटाक्षान् सदा
क्षोणीधर्तृधरक्षमाधरकुचाकैलासभूधृद्धवान् ।
कुम्भीन्द्रावककुम्भिकुम्भजिदुरोभूकुम्भवक्त्रार्यकान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ ९ ॥

संसारप्रभवाखिलश्रमचयोच्छेदक्षमाङ्घ्रिस्मृतीन्
स्वाङ्घ्रिव्याजसरोजभृङ्गजनतामन्तुक्षमासागरान् ।
भक्तानां यममुख्यभीतिहृयमाद्यष्टाङ्गयोगप्रदान्
श्रीमद्द्वारवतीशपाद्मरमणीचन्द्रार्धचूडान् भजे ॥ १० ॥

श्रीद्वारकाधीशवाणीशङ्करस्तुतिः

[कुसुमविचित्रा]

अवितपदाम्भोजनिनतकोटीन् मनसिजवीणाधरगुहसेव्यान् ।
गुरुकरुणाम्भोनिधिनिजचित्तान् मुरहरवाणीशशिधृत ईडे ॥ १ ॥

पदविनताल्यै कृतगजवाजिप्रमुखसमस्तेप्सितवरदानान् ।
हृदयगभैमीविधिगिरिजातान् मुरहरवाणीशशिधृत ईडे ॥ २ ॥

विमलहृदम्भोरुहततिलभ्यान् नतजनतामुद्जलधिनिशेशान् ।
निरुपमविद्यीकृतनिजभक्तान् मुरहरवाणीशशिधृत ईडे ॥ ३ ॥

उरगपवर्ण्यस्वचरणशक्तीन् उडुपतिहासिस्वशिशिरहासान् ।
प्रणतवरालीवितरणसक्तान् मुरहरवाणीशशिधृत ईडे ॥ ४ ॥

अखिलसुरालीनुतनिजपादान् नतहृदयाशाद्रुतकृतपूर्तीन् ।
प्रियकमलावार्जजधरकन्यान् मुरहरवाणीशशिधृत ईडे ॥ ५ ॥

विभवसमष्टिप्रदपदचिन्तांस्तनुजमनोभूभृगुगुहमुख्यान् ।
क्षितिगुरुराजार्जितपदपद्मान् मुरहरवाणीशशिधृत ईडे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपुलकृपाशां भुवनधरित्री धात्रीः साङ्ख्याभृतजनिभूमीः ।
तनुमतिमुख्याखिलसुषमाढ्यान् मुरहरवाणीशशिधृत ईडे ॥ ७ ॥

धृतहरवीणाहरिणकिशोरान् नयचयपण्डाप्रदनिजभक्तीन् ।
पदजितशोणामृतभवदर्पान् मुरहरवाणीशशिधृत ईडे ॥ ८ ॥

इहपरसर्वप्रमददपादाम्बुश्रुतिततिगीतप्रणवनिजाख्यान् ।
निजनिजमन्त्रप्रवणकृपाब्धीन् मुरहरवाणीशशिधृत ईडे ॥ ९ ॥

स्ववशगचेतःसुलभपदाब्जाँस्तनुरुचिधूताङ्ककनकचन्द्रान् ।
अन्तकभयहाम्बुभततिदातॄन् मुरहरवाणीशशिधृत ईडे ॥ १० ॥

●

श्रीद्वारकालक्ष्मीवासुदेवस्तुतिः

[स्रग्धरा]

रागद्वेषप्रलोभप्रमुखमतिमलोद्रेकपूरप्रपूर्ण-
स्वान्तैः स्वप्नेऽप्यचिन्त्यस्वचरणसरसीजातयुग्मप्रसादौ ।
तत्तादृग्दोषहीनस्वमतिसुलभपत्पाथसिमध्य [स्पष्ट] जातौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १ ॥

त्वाष्ट्र क्षोणीध्रजम्भप्रमुखरिपुजलाधीशगीर्वाणवक्त्रा-
हर्नाथाम्भोधिजातानिलमुखविबुधव्रातसम्पूजिताङ्घ्री ।
पादाम्भोजालिचेतःकुमृतिजरठतामुख्यकृत्यौप्रकामं
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ २ ॥

अत्यन्ताकिञ्चनत्वातुलजडममिताालक्षिता अप्यहो यत्
पादाम्भोजातधूलीस्मृतिनतिकणिकामुख्यकृत्या प्रकामम् ।
स्वश्रीविद्याविधूतामरपतिधिषणीभावमाशु प्रयान्ति
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रालेयस्वीयरश्मित्रिदशहयसुधामुख्यसौन्दर्ययुक्तौ
प्रालेयक्षोणिधर्तृप्रभवनिजवपुः पूर्वसञ्जातकायौ ।
संसाराम्भोधिमग्नप्रणतजनकृपासागरस्वीयचित्तौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ४ ॥

हस्तभ्राजन्नताली हृदयसरसिसञ्जातकाङ्क्षानिशायि-
हस्तिव्राताश्वपूगप्रमुखवितरणव्यञ्जनप्रौढमुद्रौ ।
हस्ताम्भोजार्थिधात्रीनिभवदवशदं बोधयन्तौ स्वरूपं
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ५ ॥

दुग्धाम्भोराशिमध्यस्फुरदतुलमहादिव्यपाथः प्रजात-
व्योमप्रोद्भूतभोजीश्वरविपुलतनू धिष्ठितस्वीयदेहौ ।
अम्भःसञ्जातगर्भाम्बुधररुचितिरस्कुर्वदात्माङ्गवर्णौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ६ ॥

वेदे लोके च सिद्धं क्षरतदितरतः स्वोत्तमत्वं यदीयं
तद्विश्वालोसविन्नीश्वरविपुलतनू धिष्ठितस्वीयदेहौ ।
कीराजोत्सङ्गजातप्रमुखमुनिवरस्तूयमानापदानौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धरयाम्यात्मरूपौ ॥ ७ ॥

नानाकाम्याभिलाषाविवशमतितया संश्रितस्वीयपादा-
म्भोजानामीप्सितार्थस्पृशिमुखनियमव्रातदोक्षाधराङ्घ्री ।
तादृक्काङ्क्षाविहीनव्रजहृदयसमुद्दोपितज्ञानदीपौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ८ ॥

आम्नायाल्युक्तधर्मप्रमुखगृहवसद्योग्यताढ्यत्रिवर्ग-
श्रुत्यन्तप्रोक्तमोक्षस्पृशिकृत इव यौ दोर्द्वयं द्वन्द्वभाजौ ।
चेतोऽभूकुण्डलिन्योः स्ववसतिपिशुनाम्भोजसर्पासनस्थौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वक्षोणीभुवः स्वर्मुखभुवनचतुर्दश्यनुल्लङ्घ्यनैज-
नैरङ्कुश्योज्ज्वलाज्ञानुसरणनिरताशेषलोकप्रजाली ।
क्षोणीपालत्वमुख्येप्सितवितरणतः सार्थितानम्रभक्तौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १० ॥

नम्रालीसर्वभीतिप्रशमननियमाबद्धहुङ्कारमात्रौ
छिन्नक्षोणीशयक्ष्मज्वरमुखनिखिलव्याधिपूगौ कृपाब्धी ।
पादाब्जासक्तचित्ताचरितदुरितहापाङ्गलेशप्रपातौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ ११ ॥

पुष्पेषुक्रोधलोभप्रमुखमतिविकृत्यावलीदूरचेतो-
व्रातध्यातस्वकीयातुलचरणसरोजातधूलीकणाली ।
हस्ताम्भोजालिराजद्रथचरणगदामुख्यशस्त्रप्रकाण्डौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १२ ॥

वाणीकीलालजातप्रभवनिजतनुक्ष्माधरक्ष्माधराङ्ग-
प्रोद्भूतात्रेयचूडामरपतिदयितावज्रहस्तादिदेवैः ।
प्रह्लादवैरोचनिभ्यां विविधसुमचयैः पूजितस्वाङ्घ्रिपादौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १३ ॥

शान्ताशेषस्वचेतोविकृतिनिकरतावश्यसर्वेन्द्रियाली
सर्वार्त्यालीतितिक्षाप्रमुखगुणमणिव्रातसंस्पर्शिकाङ्घ्री ।
श्रान्तीसङ्घातनाशौ स्वहृदयविनतात्संसृतिच्छेदतुष्टौ
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १४ ॥

भक्तालीव्याजहीनप्रसृमरकरुणासिन्धुनैजान्तरङ्गौ
क्षान्तैतत्सह्यभिन्नामितविविधमहापातकोपापपूगौ ।
नम्रालीसर्वभीतिव्रजशमनकृते योगसिद्धिप्रदाङ्घ्री
श्रीलक्ष्मीवासुदेवौ हृदयसरसिजे धारयाम्यात्मरूपौ ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीद्वारकाक्षेत्रे श्रीकुशस्थलनायकषोडशीस्तोत्रम्

[द्रुतविलम्बितम्]

मितिविवर्जितकोटिसहस्रवार्भवभवाण्डततेर्जननीगुरू ।
विधुधराम्बुजसम्भवसेवितौ हृदि करोमि कुशस्थलनायकौ ॥ १ ॥

रथमतङ्गजसैन्धवसैनिक-प्रभृतिसम्पदभीक्षणदसंस्मृतौ ।
विनतपूगमनोरथपूरकौ हृदि भजामि कुशस्थलनायकौ ॥ २ ॥

अवधिहीननतावलिकारुणी-सलिलशेवधिमानसपङ्कजौ ।
प्रणमदिष्टसमस्तपदार्थदौ हृदि धरामि कुशस्थलनायकौ ॥ ३ ॥

श्रितसमूहसमीहितसाधनव्रतनिबद्धनिजाखिलचेष्टितौ ।
सुरकिरीटनिघृष्टपदाम्बुजौ हृदि दधामि कुशस्थलनायकौ ॥ ४ ॥

विजितकामरुडाद्यरिसन्ततेः सुलभनैजपदाम्बुसमुद्भवौ ।
पदनमद्गरुडाहिकुलाधिपौ हृदि दधामि कुशस्थलनायकौ ॥ ५ ॥

चरणभक्तजनप्रमदावली-जलधिपूर्णतुषारकरायितौ ।
प्रणततारकसर्वकलाधिपौ हृदि दधामि कुशस्थलनायकौ ॥ ६ ॥

जलसमुत्थनिजालयधिष्ठित-भुजगभूपतिभोगनिजासनौ ।
उडुपशेखरपूजितपादुकौ हृदि दधामि कुशस्थलनायकौ ॥ ७ ॥

स्ववशवर्त्तिसमस्तसमृद्धित-स्वपदपाथसिसम्भवसंस्मृतौ ।
झटितितारितसंसृतिसागरौ हृदि दधामि कुशस्थलनायकौ ॥ ८ ॥

त्रिभुवनाप्यसमस्तविभूतियुत्-सकलबन्धविमोक्षवितारकौ ।
विधितनूजशुकादिसमर्चितौ हृदि दधामि कुशस्थलनायकौ ॥ ९ ॥

द्रुहिणचन्द्रशिरोमणिनाकराट्-प्रमुखनिर्जरवर्यंततोडितौ ।
अमितदीननमत्करुणार्णवौ हृदि दधामि कुशस्थलनायकौ ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निटिललोचनलोचनपङ्कसम्भवसहस्रकरायितवीक्षणौ ।
पदनताखिलनिर्जरदम्पती हृदि दधामि कुशस्थलनायकौ ॥ ११ ॥

अतुलमङ्गलविग्रहलावणी-मतिविलासजनिक्षितिताञ्चितौ ।
भगणराट्सहस्रञ्जनिभामकौ हृदि दधामि कुशस्थलनायकौ ॥ १२ ॥

नयनपादकणादपतञ्जलि-प्रमुखशास्त्रनिकायवितारकौ ।
विजितबिम्बनिजाधरबिम्बकौ हृदि दधामि कुशस्थलनायकौ ॥ १३ ॥

इह परत्र सुखं सुलभीभवेद् यदमलाङ्घ्रिसरोजसमर्चनात् ।
विषयसक्तिविहीनजनप्रियौ हृदि दधामि कुशस्थलनायकौ ॥ १४ ॥

प्रणवमुख्यमनुव्रजसाधका-चरितचिन्तनमुख्यफलप्रदौ ।
प्रणवबोध्यपरात्मनिजाकृती हृदि दधामि कुशस्थलनायकौ ॥ १५ ॥

तनुसमुज्ज्वलदिव्यमहः पूरा-जितसुवर्णपयोधरडम्बरौ ।
अखिलकष्टहभव्यदपादुकौ हृदि दधामि कुशस्थलनायकौ ॥ १६ ॥

श्रीदेवसेनिकास्तवः

[रञ्जिता]

भक्तकामदां करजिताम्बुजां भवभयापहां शुभ्रवाससम् ।
अभ्रकुन्तलां नतवरप्रदां देवसेनिकां संश्रये सदा ॥ १ ॥

काम्यसर्वदां नम्यपादुकां रम्यमानसां षण्मुखप्रियाम् ।
वारितान्तिकां नतकृपाम्बुधिं देवसेनिकां संश्रये सदा ॥ २ ॥

मेनकार्चितां शौनकस्तुतां कनकभास्वरां शक्रपुत्रिकाम् ।
भवकधीपृहां भृङ्गवेणिकां देवसेनिकां संश्रये सदा ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनतपापहां विनतनिर्जरां जितधरस्तनीं वल्लकीधराम् ।
सकलशास्त्रदां जलधिभूमुखीं देवसेनिकां संश्रये सदा ॥ ४ ॥

श्रीद्वारकेशश्रीलक्ष्मीनारायणस्तवः

[स्रग्धरा]

भक्ताभीष्टावलीदत्रिदशचरणपौ नीरजस्पर्द्धिहस्तौ
संसाराख्याम्बुराशिप्लवनिजचरणौ स्वर्णवर्णस्ववस्त्रौ ।
भृङ्गाम्भोधृद्भुजङ्गच्छविजितचिकुरौ पारहीनप्रभावौ
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ १ ॥

पादाब्भूनम्रकाम्यव्रजदपदनतौ विश्वविश्वादिपालौ
गीर्वाणव्रातनम्यस्वचरणवनजौ कृत्तकार्त्तान्तभीती ।
आकीटब्रह्मरम्यातुलगुणरुचिरौ वारिराशी कृपाया
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ २ ॥

मीनाम्भोजातधिक्कृन्निजनयनरुची भक्तसक्तान्तरङ्गौ
कीनाशप्रासदीनप्रणतजनभवाम्भोधिपारप्रदाङ्घ्री ।
हेमाम्भोदाभकायौ कनकनिकरदौ नीरवाहाभकेशौ
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ ३ ॥

आरूढव्योमसम्भूभुगशनकुलपौ वाणतातार्चिताङ्घ्री
नम्रव्रातावदावत्त्वरितदवशुची वीणिकाचक्रपाणी ।
नानाकारोररीकृत्यवितनततती एणिकापङ्कजाक्षौ
लक्ष्मीनारायणौ श्रीप्रदपदनमनौ द्वारकेशौ भजेऽहम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीधन्वन्तरिस्तवः

[मणिमाला]

नैजाङ्घ्रिपयोभूनम्रावलिसर्वा-
भीष्टव्रजदानोद्धूतामरवृक्षम् ।
पादाम्बुजचिन्ताच्छिन्ना (कृत्ता) खिलभूयो-
जन्मादिभयालिं धन्वन्तरिमीडे ॥ १ ॥

काशीपतिसञ्ज्ञाकारारचितायु-
र्वेदोक्तचिकित्सापद्धत्युपदेश (व्याप्ताखिलभूमि)म् ।
पादाब्जनमस्कृद्रक्षाशुभचिन्ता-
रम्याखिलवृत्तिं धन्वन्तरिमीडे ॥ २ ॥

श्रीसुश्रुतमुख्यग्रन्थावलिशिक्षा-
नुग्राहकपादाम्भोजस्मृतिलेशम् ।
ब्रह्माब्जकलाधृच्छक्रादिसुराली-
नम्याङ्घ्रिसरोजं धन्वन्तरिमीडे ॥ ३ ॥

कृत्ताङ्घ्रिनतालीरोगक्षयमृत्युप्रो-
द्भावितभीतिं शुङ्मुख्याखिलकष्टम् ।
कष्टाम्बुधिमग्नक्लिष्टाङ्घ्रिनताली-
कारुण्यपयोधिं धन्वन्तरिमीडे ॥ ४ ॥

पाथःस्पृशिकतृव्योमोद्भवभोक्तृ-
न्यक्कृच्छविराजच्छीर्षप्रभवालिम् ।
अम्भोजनिसर्वाहङ्कारनिहन्तृ-
स्वीयाङ्घ्रिकरादिं धन्वन्तरिमीडे ॥ ५ ॥

भक्तावलिचेतःकाङ्क्षापदताभाग्-
भुक्तिव्रजमुक्तिश्राण्यङ्घ्रिजधूलिम् ।
पादार्चकविद्यारण्याभिधसर्व-
क्षोणीगुरुमुख्यं धन्वन्तरिमीडे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्त्तस्वरकान्तावर्ष्मोद्भवगेह-
भ्राजत्सुखमुख्याशेषार्थसमेत(शेषेप्सितयुक्त)म् ।
संसारकरालाम्भोधेरतितूर्णं
पादस्पृशिदक्षं धन्वन्तरिमीडे ॥ ७ ॥

प्राचीनमवालीसाहस्रकृताघ-
श्रेणीयुगपद्धृत्स्वानुग्रहलेशम् ।
भोग्यन्वयशत्रुक्षोणीपतिपृष्ठ-
भ्राजिष्णुशरीरं धन्वन्तरिमीडे ॥ ८ ॥

भक्ताभयसर्वाभीष्टप्रदमुद्रा-
पद्मामृतकुम्भभ्राजत्करजालम् ।
अक्षाङ्घ्रिकणादव्यासादिनयाली-
पाण्डित्यदपूजं धन्वन्तरिमीडे ॥ ९ ॥

श्रीधन्वन्तरिस्तवः

[शार्दूलविक्रीडितम्]

स्तुन्वन्तश्चरणाम्बुजन्ममनुजाश्चिन्वन्ति यस्यामृतं
मन्वन्तर्गतवर्णवर्गं(यं)मननैर्मन्वन्तरस्थायिताम् ।
तन्वन्तस्तनुदार्ढ्ययोगमतुलं धुन्वन्ति मृत्युं(मोहं)तत-
स्तन्वन्ते परमां प्रयन्ति (प्रयान्ति) पदवीं धन्वन्तरिं तं भजे ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनर्मदास्तोत्रम्

[हरनर्तनम्]

आदितेयनुतामसंयमिदुर्लभां कुमृत्युमुखापहां [कुमृतिक्षयां]
*प्रणतार्थगीर्धुतशक्रगुरुयमिपूजितां प्रमदप्रदाम् ।
कुम्भिराण्मुखदां कृपाम्वुधिचेतसं विधुवर्ष्मजां
शर्मदां कलये नताघनिवारिणीं हृदि नर्मदाम् ॥ १ ॥

क्षोणिदेशिकदेशिकादिसमर्चितां कनकप्रभां
मोक्षदानरतां स्फुटीकृततत्त्विकां प्रणतेष्टदाम् ।
भूपतामुखदां सुमालिसमर्चितां परमार्थदां
शर्मदां कलये वरास्यजगत्त्रयीं हृदि नर्मदाम् ॥ २ ॥

निर्विकारनुतां हृताखिलरुग्ज्वरां मतिदोषहां
संसृतिश्रमहां समस्तसुरेडितां शममुख्यदाम् ।
पापपूगपरां वराभयदायिनीं वनभूदृशं
शर्मदां कलये यमादिसमस्तदां हृदि नर्मदाम् ॥ ३ ॥

श्रीनरनारायणस्तोत्रम्

[वियोगिनी]

विनताघहरं नमत्सुरं कनकादीप्सितदं भयच्छिदम् ।
शरदब्दसुवर्णवाससं नरनारायणमाश्रयेऽनिशम् ॥ १ ॥

श्रितकल्पतरुं भवापहं घनभृङ्गाहिकचं सितासितम् ।
हृतभक्तशुचं कृपाम्बुधिं नरनारायणमाश्रयेऽनिशम् ॥ २ ॥

प्रणतेप्सितदं सुरार्चितं रमणीयात्मगुणं परात्परम् ।
शुकनारदमुख्यसंस्तुतं नरनारायणमाश्रयेऽनिशम् ॥ ३ ॥

---

* अस्मिन् पादे छन्दोभङ्गः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यममुख्यधनं स्मिताननं नतकाङ्क्षाधिकदं वरप्रदम् ।
भवपारदपादपङ्कजं नरनारायणमाश्रयेऽनिशम् ॥ ४ ॥

●

श्रीनरनारायणस्तोत्रम्

[हरिणी]

मतिविजयदौ वैराग्याप्यस्वपादपयोरुहौ
सुरततिनुतौ नम्रालीनां जराकुमृतापहौ ।
धनपतिसुराचार्यंन्यक्कृत्सूक्तिपदानतौ
सदयहृदयौ हृत्पाथोजे भजे नरकेशवौ ॥ १ ॥

मनुकुलजनुर्वंशोत्तंसाहितल्पनिजाकृतौ
हृतनमदघौ मातङ्गाश्वप्रमुख्यरमाप्रदौ ।
सिततदितरौ मार्कण्डेयप्रमुख्यसमर्चितौ
परमपददौ हृत्पाथोजे भजे नरमाधवौ ॥ २ ॥

अखिलफलदौ चातुर्वर्ग्यप्रदायिचतुर्भुजौ
विमलधिषणौ (मतिदौ) क्षोणीनाथप्रमुख्यपदप्रदौ ।
त्रिभुवनपती (हृतनतशुचौ) सर्वक्लेशप्रशामकसंस्मृती
अभयवरदौ हृत्पाथोजे भजामि नराच्युतौ ॥ ३ ॥

प्रशममुखदौ योगिध्येयस्वपादवनोद्भवौ
वृजिनसहनौ ब्रह्मोमेशामरेशमुखार्चितौ ।
यमभयहरौ संसारोत्थाखिलश्रमवारकौ
यमनियमदौ हृत्पाथोजे दधामि नराच्युतौ ॥ ४ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनरहरिस्तवः

[नर्कुटकम्]

निजचरणाम्बुसम्भवरजःकणिकानतिकृन्-
निखिलमनोरथस्पृशिपरामरभूमिरुहम् ।
भजदसुरार्भकोदितमृतं विदधानमरं
भुजगमहीशभोगशयनं कलये नृहरिम् ॥ १ ॥

पदसरसीरुहद्वयनमज्जनताहृदय-
स्थितसकलेष्टपूरणविधिप्रवणात्महृदम् ।
जनिमृतिचक्ररूपभवभीप्रमुखार्तिततति-
प्रशमनपण्डिताङ्घ्रिविनुतिं कलये नृहरिम् ॥ २ ॥

अवयवलावणीवशजिताखिलसृष्टिजगद्-
गतनरमातृकाम्यरुचिरोज्ज्वलकायरुचम् ।
कमलजशङ्करत्रिदिवराड्दहनाम्बुपति-
प्रमुखसुपर्वनम्यचरणं कलये नृहरिम् ॥ ३ ॥

निजपदसन्नतासुरजनुःपृथुकप्रणय-
स्फुटमतिरीतिरम्यधिषणाहृदयङ्गमतम् ।
असुरपशातकुम्भकशिपुच्छिदिकार्यकृते
कलितनवाकृतिं मुररिपुं कलये नृहरिम् ॥ ४ ॥

स्मृतिकणिकाप्रभाववशतत्क्षणनमद्-
विततिकृतान्तसाध्वसमुखाखिलदुष्टचयम् ।
अगतिकदीननम्रजनतानिखिलांशलसच्-
छुभततिकृत्कृपामृतनिधिं कलये नृहरिम् ॥ ५ ॥

अमरकमन्त्रिमुख्यरचिताश्रयभुग्विवश-
क्षितिगुरुशङ्करार्यभगवन्नुतपादयुगम् ।
पुनरपि पद्मपादभगवद्वशवर्तितया
प्रतिहृतभूमिगुर्वसुहृतिं कलये नृहरिम् ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कनकमुखाखिलेप्सितवरव्रजदानकृति-
प्रवणपदाम्बुजातयुगलीजनिधूलिलवम् ।
त्रिभुवनवर्त्तिसर्वजनताकुशलादिकृते-
विरचितसर्वकार्यनिकरं कलये नृहरिम् ॥ ७ ॥

दशशतरश्मिसूतभाक्सहजाकृतिधृ-
च्छ्रुतिततिनैजवाहनधृतस्वमनोज्ञतनुम् ।
विनतसमस्तलोकदुरितोद्धरणैककृति-
प्रियनिजपादनीरजनुषं कलये नृहरिम् ॥ ८ ॥

नयनपदाम्बुजातजणमुक्कपिलादिनय-
प्रचयदनैजदिव्यचरणाम्बुजनुःकरुणम् ।
करजनिदारितक्षितिधराधिककर्कशता-
लसितहिरण्यतल्पविपुलोरसमाकलये ॥ ९ ॥

श्रीनवखेटस्तवः

[चित्रमाला]

हस्तश्रीधिक्कृताम्भोभवततिरुचीभक्तदेवक्षमाजा
वृष्टिक्षोणाम्बुमेघच्छविनिजपटाभीतिजालप्रभेत्रीः ।
पादाम्भोजातनम्रप्रवरवरदाभृङ्गहुङ्कारिकेशाः
छायासञ्ज्ञातुरङ्गीर्दिनपरमणीः सन्ततं सन्नतोऽस्मि ॥ १ ॥

त्रैलोक्यावास्यशेषस्वचरणनमत्काम्यदानव्रताढ्याः
कृत्तस्वादभूक्तान्तोद्भवभयभरारम्यचित्तप्रवृत्तीः ।
भक्तिभ्राजत्कृपाब्धीन्निखिलजगतीनम्यपादारविन्दाः
छायासञ्ज्ञातुरङ्गीर्दिनपरमणीः सन्ततं सन्नतोऽस्मि ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अङ्घ्र्यब्जानम्रसर्वेप्सितदचरणा रामकृष्णार्चिताङ्घ्रीः
संसाराम्भोधिपारप्रदपदनतीर्लोककल्याणनिष्ठाः ।
अम्भोधृद्भोगिभृङ्गघतिनिजकचाः स्वर्णमुख्यप्रदात्रीः
छायासञ्ज्ञातुरङ्गीर्दिनपरमणीः सन्ततं सन्नतोऽस्मि ॥ ३ ॥

पाणिभ्राजद्द्वयघ्नप्रभृतिरुचिरा भक्तपापापनेत्रीः
कृष्णच्छायविभास्वन्निजतनुलतास्ताक्ष्यसूतत्वहृष्टाः ।
एणस्पर्धिस्वकीयेक्षणवनभवाः पीनवक्षाः प्रजाताः
छायासञ्ज्ञातुरङ्गीर्दिनपरमणीः सन्ततं सन्नतोऽस्मि ॥ ४ ॥

●

श्रीनवनायकस्तवः

[आर्या]

राजानं घस्त्रेशं मन्त्रिचमूनायकं काव्यम् ।
नीरससस्यपमिन्दुं धान्याधिपतिं शनैश्चरणम् ॥ १ ॥

मेघार्धेशं धिषणं रसनाथं चन्द्रवर्ष्मभवम् ।
पशुपालं यममीडे श्रीरुधिरोद्गारिहायनपान् ॥ २ ॥

अर्कमघीशं मन्त्रिचमूपं भृगुनाथं
नीरससस्याधीशमथेन्दुं रसपज्ञम् ।
धान्यपमार्किं मेघार्धेशं त्रिदशगुरुं
यममथपशुपं वत्सरनाथान् कलयेऽहम् ॥ ३ ॥

[मालिनी]

नृपतिमिनममात्यानीकपं काव्यमर्ध-
जलदपममरार्थं सस्यपालं शशाङ्कम् ।
रसपतिमुडुपोत्थं भाण्डजं धान्यनाथं
यममथपशुपालं नीरसेशं भजेऽब्जम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वत्सरेश्वरं रविं चमूपमन्त्रिणं कविं
सस्यनीरसाधिपं विधुं रसाधिपं बुधम् ।
धान्यनाथमर्कजं पयोधरार्धपं गुरुं
भावयामि सन्ततं हृदा यमं पशुप्रभुम् ॥ ५ ॥

दिनेश्वरं शरद्भवं कविं चमूपमन्त्रिणं
विधुं च सस्यनीरसाधिपं बुधं रसाधिपम् ।
इनात्मजं च धान्यपं गुरुं पयोध्रनायकं (पयोधरार्धपं प्रभुं)
यमं पशुप्रभुं मुदा विभावयामि सर्वदा ॥ ६ ॥

दिनेशमधिपं ततः सचिवसैन्यपं भार्गवं
क्षपेशमथसस्यनीरसपतिं शनिं धान्यपम् ।
रसाधिपतिमब्जजं धिषणमर्धमेघाधिपं
भजामि पशुपं यमं रुधिरवामिवर्ष्मप्रभून् ॥ ७ ॥

रविं वर्षाध्यक्षं सचिवचमुपतिं दानवगुरुं
शशाङ्कं सस्येशं त्रिदशपगुरुमर्धाम्बुदपतिम् ।
शनिं धान्याधीशं तुहिनकिरणसूनुं रसपतिं
भजेऽहं पश्वीशं यममथ शशिनं नीरसपतिम् ॥ ८ ॥

धात्रीशामात्यौ दिनपतिकवी वाहिनीशं कवीन्द्रं
सस्याधीशानं जलनिधिजनिं नीरसेशं च चन्द्र(शशाङ्क)म् ।
धान्यानामीशं रवितनुभवं जीवमर्धाब्दनाथं
पश्वाल्यध्यक्षं यममथरसाधीश्वरं सौम्यमीडे ॥ ९ ॥

राजदिनेशं मन्त्रिकवीशं सैन्यपकाव्यं
सस्यपचन्द्रं धान्यपसौरिं (मन्दं) मेघपजीवम् ।
अर्धेशगुरुं रसपेन्द्रसुतं नीरसपाब्जं
पशुपालयमं हृदये कलये वत्सरनाथा(हायनपाला)न् ॥ १० ॥

नृपतिदिनपमन्त्रिदैत्यार्चितानीकनीभार्गवान्
धनपधिषणसस्यपाम्भोजनुर्नीरसाम्भोधिजान् ।
रसपशशिजधान्यपार्कात्मजार्धाधिपेन्द्रार्चितान्
पशुपतियममाश्रये सन्ततं वत्सराधीश्वरान् ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजघस्रपमन्त्रिभार्गवसैन्यनायकभार्गवान्
सस्यपोडुपधान्यपार्कजमेघनाथसुरार्चितान् ।
अर्धपार्यरसेश्वरेन्दुजनीरसाधिपमाधिपाम्
पश्वधीशयमं दधे हृदि नव्यहायन(वत्सर)नायकान् ॥ १२ ॥

रविं राजानं सचिवपूतनिकानायकं दैत्यपूज्यं
विधुं सस्येशं सलिलदपतिगुरुं वारिवाहाधिनाथम् ।
शनिं धान्येशं रसविततपतिं वार्धिजातात्मजातं
पशूनां पालं यममथ कलये नीरसेशं शशाङ्कम् ॥ १३ ॥

वर्षाधीशमिनं ततोऽस्य सचिवं सेनापतिं भार्गवं
सस्याधीश्वरमब्धिजातवपुषं धान्याधिपं भास्करिम् ।
अर्घेशं च जलाधिपं च धिषणं सौम्यं रसाधीश्वरं
सोमं नीरसपं यमं पशुपतिं संवत्सरेशान् भजे ॥ १४ ॥

●

श्रीनारायणस्तवः

[पृथ्वी]

त्रिलोकजनकं मनोभवगुरुं कृपाम्भोनिधिं
नतेष्टवरदं गजप्रमुखदं कलाधीश्वरम् ।
यतीन्द्रविनुतं नमज्जनसमस्तपापापहं
पदाब्जनतवत्सलं हृदि दधामि नारायणम् ॥ १ ॥

भुजङ्गशयनं दिनेड्विधुदृशं रमावल्लभं
मुदम्बुधिविधुं दनूद्भवरिपुं शिवाजार्चितम् ।
निलिम्पविनुतं नतद्रविणदं नयालीप्रदं
पदाब्जरतवत्सलं हृदि भजामि नारायणम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपारकरुणं शुभप्रचयदं सुरस्त्रीडितं
मनोज्ञवपुषं सदा स्मितमुखं जयव्रातदम् ।
सरोजचरणं परात्परपरं मनूद्धारितं
पदप्रणतवत्सलं हृदि दधे जगन्नायकम् ॥ ३ ॥

जपादिसुलभं यमिव्रजनुतं पयोजेक्षणं
घनच्छवितनुं मधुप्रभृतिसूदनं श्रीधवम् ।
अनन्तभवसागरप्रपतितालिपोतायितं
पदाश्रितजनाश्रयं हृदि भजे जगन्नायकम् ॥ ४ ॥

•

श्रीनिर्ऋतिस्तुतिः

[मेघविस्फूर्जिता]

सरागाप्यान्याङ्घ्रि विरतसुलभं देवताकोटिगण्यं
जरादुर्मृत्युघ्नं नतघनवचोदूतशक्रामरार्थम् ।
कृपावाराराशिं हरपदरतं हस्तमुख्यप्रदार्च्यं
नतांहोराशिघ्नं हृदयकमले निर्ऋतिं भावयेऽहम् ॥ १ ॥

अनन्तश्रेयोदं भ्रमररुचिकं ध्यानसाध्याभिचारं
विवेकस्पृक्पूज्यं निखिलवरदं दीर्घदोर्दण्डयुक्तम् ।
सुमालि पूज्याङ्घ्रि विशदितपरं श्राणितक्षोणिपत्वं
वशस्थत्रैलोक्यं हृदयकमले निर्ऋतिं भावयेऽहम् ॥ २ ॥

दितिकुलजनिं भीतिहृद्भासिपाणीं (पाणिराजद्भयघ्नं)
जिताक्षालिं ध्येयं त्रिदिववसतिव्रातकोटिप्रविष्टम् ।
शमादिस्पृक्पादं श्रमततिहरं क्षान्तनम्रालिपापं
यमादिस्रष्टारं हृदयकमले निर्ऋतिं भावयेऽहम् ॥ ३ ॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनिर्ऋतिस्तवः

[मरालिका]

भक्तसङ्घ्र(ङ्घ)हृत्काङ्क्षितावलीश्राणनव्रतस्वर्गभूरुहम् ।
जन्ममृत्युभीमूलकारणाज्ञानकृन्तकं निर्ऋतिं भजे ॥ १ ॥

भ्रमरमारुतस्वाशनाम्बुधृत्कज्जलच्छविस्वीयकुन्तलम् ।
अभयमुद्रिकावरदमुद्रिकाधरकराम्बुजं निर्ऋतिं भजे ॥ २ ॥

तुहिनदीधितित्रिदशवारणक्षीरकुन्दसङ्काशवाससम् ।
प्रणतवाञ्छिताशेषवरचयश्राणनव्रतं निर्ऋतिं भजे ॥ ३ ॥

अदितिदित्तनुं तनुसमुद्भवव्रातनम्यपसम्भवम् ।
श्रद्धयानिशं चरणमीयुषां सर्वकाम्यदं निर्ऋतिं भजे ॥ ४ ॥

पादभक्तिकल्लोकभव्यकृच्चित्तवृत्तिसन्ततिमनोहरम् ।
क्षीरसागरप्रोद्भवाधवच्छविकलेवरं निर्ऋतिं भजे ॥ ५ ॥

अङ्घ्रिसन्नतव्रातमृत्युभीनाशदीक्षितानुग्रहेक्षणम् ।
कष्टसन्ततिप्रोत्थनिर्विद दीनवत्सलं निर्ऋतिं भजे ॥ ६ ॥

इन्द्रहव्यवाट्चण्डरश्मिभूवरुणमुख्यदिङ्नाथमध्यगम् ।
नम्रकामितस्वर्णमुख्यदस्वाङ्घ्रिपूजनं निर्ऋतिं भजे ॥ ७ ॥

संसृतवाक्यवाराशिमध्यगक्लिष्टसन्नमत्पारदस्मृतिम् ।
अखिलपूर्वसाम्प्रतिकजन्मभूपापमोचकं निर्ऋतिं भजे ॥ ८ ॥

अभिचरत्कृते व्यासजोदितस्वीयजनभूविजयनिश्चयम् ।
सर्वदेवतोपासनाङ्गकस्वीयपूजनं निर्ऋतिं भजे ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनृसिंहप्रह्लादस्तुतिः

[शिखरिणी]

दिनेशानाम्भोधृन्निभनिजकचौ सर्ववरदौ
सहस्रांशुक्षीराम्बुधिभवपटौ संसृतिहरौ ।
भजे भक्तेष्टस्पृक्स्वचचरणपौ नीरजकरौ
नृसिंहप्रह्लादौ दिविजदितिभूमस्तकमणी ॥ १ ॥

विनम्रालीकाम्यप्रदपदयुगौ लौहितसुतौ
सुपर्वालीनम्यस्वपदकमलौ क्लृप्तशमनौ ।
भजे नित्यं रम्यावतुलगुणकारुण्यजलधी
नृसिंहप्रह्लादौ दिविजदितिभूमस्तकमणी ॥ २ ॥

घृताचीमेनेड्यौ विनुतविभवौ भूरिकरुणौ
भवाम्भोधेः पोतौ शुकविधिजनुर्गीतचरणौ ।
भजे घस्रेशानाम्बुदसुचिकुरौ स्वर्णततिदौ
नृसिंहप्रह्लादौ दिविजदितिभूमस्तकमणी ॥ ३ ॥

नमत्पापघ्नाङ्घ्रिस्मरणकणिकौ भीतिशमनौ
वलिध्यातस्वीयानुपमचरणौ शास्त्रचयदौ ।
भजे शोणाङ्केन्दुच्छविनिजमुखौ कष्टदलनौ
नृसिंहप्रह्लादौ दिविजदितिभूमस्तकमणी ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनृसिंहस्तुतिः

[पृथ्वी]

मनःप्रभवतत्सहोद्भवसमूहरूपान्तरा-
यैर्जिष्णुमतिदुर्लभस्वपदपाथसीसम्भवम् ।
विवेकिमतिसूतसंयमितमानसप्रग्रहा-
दृताप्यनिजपादवार्जनियुगं नृसिंहं भजे ॥ १ ॥

पुलोमतनुसम्भवापतिमुखामराह्लादतत्-
सुतात्मजमुखासुरव्रजसमर्चिताङ्घ्र्यम्बुजम् ।
प्रणम्रजनताजराकुमरणादिसर्वार्तिह—
स्वकीयचरणाम्बुजस्मृतिलवं नृसिंहं भजे ॥ २ ॥

अकिञ्चनजनावलीक्षितिपजन्यमूका अपि
प्रणत्यभिमुखाशयीभवनतोऽङ्घ्रिपाथोजयोः ।
भवन्ति निजसम्पदा [सम्भवा] वचनवैखरीनिर्जिता-
स्त्रिविष्टपधवाङ्गिरसतनूभवा नृसिंहं भजे ॥ ३ ॥

सरस्वतिभवाभिधे भवांभिधे महार्णवे
पतनात्तदन्तर्गानुभूतिचयतः शुचार्दितम् ।
नतानुकम्पार्णवं महीधरप्रभवपूर्वज-
स्वकीयतनुनूतनाकृतिधरं नृसिंहं भजे ॥ ४ ॥

द्विपालितुरगावलीरथसमूहसेनाव्रज-
प्रभूतधनरूपमास्पृशिसमुद्धृतस्वानतम् ।
निजाङ्घ्रिसरसीरुहभ्रमरमानसानुष्ठिता-
खिलाघगजसन्ततेमृगंपतिं नृसिंहं भजे ॥ ५ ॥

सरीसृपवसुन्धराधवसमस्तजिह्वा विना-
त्यतीतनिजपादवाःप्रभवशक्तिलेशोदितम् ।
निजाननसमुज्ज्वलच्छविलवावधूतस्फुरत्-
सहस्रकिरणाल्यहङ्कृतिभरं नृसिंहं भजे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरोचनकलेवरप्रजनकाब्जजातोरुभू-
शुकोद्धवपराशरप्रभवमुख्यसम्पूजितम् ।
स्वमन्त्रलसदक्षरव्रजजपार्थसञ्चिन्तन-
प्रमुख्यसुलभीकृताक्षरपदं नृसिंहं भजे ॥ ७ ॥

सकामपदसन्नतव्रजमनोरथालीद्रुत-
प्रपूर्त्तिमुखसुन्दरव्रतचयातिहृद्याशयम् ।
स्वपादपयसीप्रभूप्रभवधूलिसत्काशये
प्रकाशितपरापरस्वहृदयं नृसिंहं भजे ॥ ८ ॥

रथाङ्गमुखभीषणायुधततिस्फुरद्द्वादश-
स्वबाहुनखदारितक्षितिधराभदैत्योरसम् ।
प्रफुल्लवनसम्भवप्रभवरम्यपुष्पावली-
स्वकान्ततुलसीमुखार्चितपदं नृसिंहं भजे ॥ ९ ॥

अलङ्घ्यनिजशासनस्थितसमस्तलोकावली-
तलव्रजनिवासकृन्मितिविहीनसर्वप्रजम् ।
चतुःसरिदधीश्वरस्वरशनक्षितीशीकृत-
स्वकीयपदपङ्कभूनतिपरं नृसिंहं भजे ॥ १० ॥

नतव्रजशरीरगत्रिविधधातुवैषम्यस-
म्भवज्वरमुखार्त्तिसंयुतभवज्वराद्यौषधम् ।
किशोररक्षाकृते विदीर्णहृदयासुरक्षितिपर्ति
विधानविहितासुरक्षितिपहं नृसिंहं भजे ॥ ११ ॥

असाधुजनभीकरायुधलसत्करालीधृत-
प्रणम्रजनभीहरेप्सितवितारिमुद्राद्वयम् ।
विकारलववर्जितस्वहृदयामृतप्रोद्भव-
प्रगीतमहिमस्वपद्वनजनिं नृसिंहं भजे ॥ १२ ॥

समस्तवचनप्रसूतुहिणपर्वताधीशजा-
शशाङ्कशिशुशेखरप्रमुखदेवतामण्डलैः ।
अजामितमनारतं प्रकलिताङ्घ्रिवर्ष्मोद्भवा-
पदान्वितनिजाङ्घ्रिवाभंवयुगं नृसिंहं भजे ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कटाक्षलवसाधितप्रणतितत्पराल्याशयं
प्रशान्तिबहिरिन्द्रियव्रजदमाद्यभीष्टावली ।
भवार्तिततितत्पहृत्प्रणतशोकपारम्परी-
निकृन्तनपरायणस्वचरणं नृसिंहं भजे ॥ १४ ॥

यमादिनिखिलाङ्गसन्ततिविराजियोगस्पृशि-
प्रमुख्यनिहतानमद्यममुखप्रमूसाध्वसम् ।
कृपामृततरङ्गितस्वहृदयाम्बुधिक्षान्तपत्
प्रणामविहिताखिलाघनिकरं नृसिंहं भजे ॥ १५ ॥

अनामयचिरायुषी सकलविच्छिरोरत्नतां
सुसूनुसुकलत्रते मितिविहीनलक्ष्मीततिम् ।
अदभ्रकरुणार्णवो नरहरिर्ददाति द्रुतं
प्रणामलवपूर्वकं प्रपठतामिमां स्वस्तुतिम् ॥ १६ ॥

श्रीश्रीनृसिंहप्रह्लादस्तुतिः

[मेघविस्फूर्जिता]

सरागद्वेषाद्याशयजनततेरत्यन्तदूराङ्घ्रिकान्
विरागस्वान्तालीसुलभचरणाम्भोजातयुग्मेक्षणान् ।
सुराधीशाम्भोधिप्रमुखबलिमुख्यैर्देवासुरैरादृतान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ १ ॥

वराका मूकाश्च प्रणतिलवतो यत्पादयोर्निश्चितं
गिरा जीवं राया धनपतिमपि द्राग्घ्रोमतः कुर्वते ।
जरादुर्मृत्यादिप्रशमनरतस्वीयाङ्घ्रिपाथोजनीन्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृपापारावारायितनिजमनोव्याजामृतप्रोद्भवान्
गिरीन्द्रन्यक्कृत्स्वोरसिजनुरुरोधीनिश्चलत्वाञ्चितान् ।
करीशोत्तंसाश्वप्रवरपृतनाकोशादिसम्पत्प्रदान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ३ ॥

स्वपादाब्जद्वन्द्वप्रणतजनतासर्वाघनिर्मूलिकान्
झरीं श्रीस्वर्धुन्याः शिरसि दधता सम्भावितान् सादरम् ।
जपाद्याशुप्रीताञ्छ्रवणनयनक्षोणीशवर्ण्याङ्घ्रिकान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ४ ॥

शरीरश्रीधूताभिमतिकनकाम्भोधर्तूकीलालदान्
शुकाजोत्सङ्गोत्थप्रमुखमुनिसङ्गीतमाहात्म्यकान् ।
पिकाम्भोराश्यर्णोविलसितवपुर्धिक्कारिकण्ठस्वरान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ५ ॥

सकामानम्राणामखिलहृदयाभीष्टालिसंस्पर्शकान्
विकास्यम्भोजातप्रमुखकुसुमैः सम्पूजिताङ्घ्र्यम्बुजान् ।
विकामानम्राणां दलितहृदयग्रन्थीररं कुर्वतो
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ६ ॥

नराधीशानत्वप्रमुखनिखिलश्रीपूगदानप्रियान्
स्वरादित्रैलोक्यस्ववसतिजनव्राताच्र्यपादाम्बुजान् ।
ज्वरार्शःकुष्ठापस्मृतिमुखरुजाचक्षुःश्रवःपक्षिपान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ७ ॥

परार्त्तिस्पर्शादिप्रियमतितया ह्रीनीकृतस्वानतान्
कराम्भोजभ्राजन्निखिलभयहृत्काङ्क्षाधिकश्राणकान् ।
विकारन्यस्वान्तप्रकलितपदाम्भोजातधूलीलवान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ८ ॥

उमाकान्तब्रह्माचलरिपुजलाधीशानमुख्यामरैः
सुमालीस्वेष्वङ्गोद्भवबलिगुरुप्रोत्पादकप्राक्तनून् ।
शमाक्षालीदान्तिप्रमुखसगुणव्रातप्रदानप्रियान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रमालीमूलच्छिन्निजपटुरजोलेशैर्जगत्पावनान्
क्षमापाथोराशीनपदनतिकृते धर्मादिसर्वार्थदान् ।
यमादिप्रोद्भूताखिलभयहृतिप्रौढान् यमादिप्रदान्
भजे श्रीमल्लक्ष्मीनरमृगपतिप्रह्लादकान् सन्ततम् ॥ १० ॥

श्रीनृसिंहस्तुतिः

[स्रग्धरा]

सङ्ख्याहीनाब्जजाण्डव्रजगतजनताकोटिकोटिव्रजाली-
व्रातालीसृष्टिरक्षालयमुखकृतिकृच्छक्तिमायाधिनाथम् ।
श्रीवारांराशिजातासरसिजसुजनुःपार्वतीप्राणकान्त-
श्रीप्रह्लादामरेशप्रमुखनतपदं श्रीनृसिंहं प्रपद्ये ॥ १ ॥

अव्याजापारमानप्रमुखविरहितस्वस्वभावप्रवृत्त-
कारुण्यौघालिजन्मक्षितिनिजहृदयस्वाभिधानाम्बुजातम् ।
नैजाङ्घ्र्यम्भःप्रजातद्वितयभवरजोलेशचिन्तारनाली-
सर्वाशाव्रातपूर्त्तिव्रतधरमनसं श्रीनृसिंहं भजेऽहम् ॥ २ ॥

मातङ्गस्यन्दनाश्वप्रवरचयचमूमुख्यसर्वाङ्गराजत्
साम्राज्यश्रीप्रमुख्याखिलवरनिकरस्पष्टकारुण्यलेशम् ।
पीयूषार्थं सुरादिप्रमथितपयसोराशिसञ्जातदिव्य-
स्वाङ्गश्रीमाकलत्राद्दृतनृहरितनुं भावये श्रीनृसिंहम् ॥ ३ ॥

अङ्गोद्भूतक्रुधेहामदमुखनिखिलारातिनिर्जेतृताभाग्-
योगोपास्त्यादिराजद्यमिजनसुलभस्वीयपादारविन्दम् ।
पादाम्भोजातयुग्मप्रणतजनमनःशश्वदानन्दपूग-
पारावारीयराकासितनिकररणं संश्रये श्रीनृसिंहम् ॥ ४ ॥

सद्यःसञ्जातडिम्भप्रमुखललितधीसुग्रहार्थावलीतः
प्रारभ्याध्यात्मविद्यावधिसकलकलापारदृश्वात्मभक्तम् ।
भक्ताधीनीकृतलाक्षस्वचरणकपिलाहीट्कणाज्जैमिनिश्री-
वेदव्यासोक्तशास्त्रव्रजमहमनिशं श्रीनृसिंहं प्रपद्ये ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्भःसञ्जातसम्भूनिजतनुनयनप्रोद्भवस्वाङ्गनात्रा-
म्भोजोत्थस्वीयकायामृतमुखसहजाचित्तपद्माहरोशम् ।
क्षीराम्भोराशिमध्यस्फुरदहिकुलराड्दिव्यभोगाग्र्यतल्पा-
सीनाङ्गस्वीकृतश्रीनरहरिवपुषं श्रीनृसिंहं भजेऽहम् ॥ ६ ॥

श्रीमत्प्रह्लादवर्त्मप्रजनकहननानेहनैजाट्टहास-
त्रस्ताशेषामरालीमुकुटतटमणिव्रातसङ्घृष्टपादम् ।
पादाम्भोजातभक्तप्रचयहृदयगाशेषकाङ्क्षातिशायि-
तूर्णं संप्राणितर्द्धिव्रजनिजकरुणं श्रीनृसिंहं प्रपद्ये ॥ ७ ॥

ब्रह्माण्डालीसहस्रव्रजततिजनतासक्तशक्तस्वमाय-
श्रीलक्ष्मीस्वान्तपाथोरुहदिवसपतिस्वीकृतोग्रस्वरूपम् ।
वैकुण्ठादिस्वधाम्नोस्त्रिदिवसुतलयो भूतयो याः प्रसिद्धा-
स्ताः सर्वा द्राग्ददानं पदनततये भावये श्रीनृसिंहम् ॥ ८ ॥

स्त्रीयाङ्घ्र्यम्भोजवीक्षानयनसफलताश्रीसहस्राक्षपञ्च-
दृग्द्वन्द्वाष्टस्वदृक्षण्निजनयनयुगीदृक्सहस्रत्रयाढ्यम् ।
लोकालीसर्गरक्षाप्रलयकृतिचणस्वीयशक्तित्रिशक्ति-
शक्तिव्रातप्रमादप्रचयदनमनं संश्रये श्रीनृसिंहम् ॥ ९ ॥

मानव्याजस्वसोमावधिमुखरहितस्वीयकारुण्यपारा-
वाराद्रपाङ्गलीलाप्रपतनकणिकापालिताशेषलोकम् ।
प्रह्लादप्राणरक्षाद्रुहिणनिटिलदृङ्मुख्यनम्रामराली-
श्रीप्रह्लादोभयस्पृग्विविधगुणतनुं संश्रये श्रीनृसिंहम् ॥ १० ॥

पाथोजातोत्थजायाजलनिधितनयाक्षोणिधृत्कायजाता-
पौलोमीमेनकादित्रिदिवजललनागीतपादापदानम् ।
लावण्योद्रेकराजन्निजतनुविनमद्व्रातकारुण्यसिन्धु-
स्त्रीयस्वान्ताब्धिजाहृत्कमलदिनपतिं भावये श्रीनृसिंहम् ॥ ११ ॥

स्वीयाक्षिस्वर्गिपेयप्रचयमयकरश्राद्धदेवाश्विकर्ण-
सावर्ण्यङ्क्षमेशप्रमुखतनुजनुःकारणस्वाश्रयाशम् ।
सानन्दोरीकृताङ्घ्रिप्रवणनिजहृदम्भोजलोकावलीष्ट-
व्रातद्राक्पूर्त्तिमुख्यव्रतविततिमहं भावये श्रीनृसिंहम् ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शोणस्वास्योत्तमाङ्गप्रभवपदयुगीपीतवस्त्रासिताङ्ग-
च्छायानिर्धूतघस्रेड्दिनपतिकमलस्वर्णपाथोजपूगम् ।
ऐहिक्यामुष्मिकी च प्रवरसुखततिर्हस्तगा द्राग् यदीय-
पादाम्भोजातरेणुस्मृतिनतिमुखतः श्रीनृसिंहं भजेऽहम् ॥ १३ ॥

ओमित्याख्या यदीया यदमलचरणाम्भोजसाक्षान्निरीक्षा-
सौलभ्यस्यैकहेतुः श्रुतिततिसहितैर्गीयते वेदशीर्षैः ।
ॐकारध्यानमुख्यप्रवणनिजमनःसंयमस्वेन्द्रियाली-
स्वान्तव्रातप्रसादोन्मुखनिजधिषणं संश्रये श्रीनृसिंहम् ॥ १४ ॥

औदासीन्याढ्यचित्ताः फलमुखविषये ये स्वधर्मैकसक्ता
राजन्ते मङ्क्षु तेषामतिसुलभतरस्वाङ्घ्रिपद्मप्रसादम् ।
उद्दण्डद्वेषरागान् प्रति विहितमहागर्जनस्वानभिन्न-
ब्रह्माण्डालीकटाहव्रजमहमनिशं संश्रये श्रीनृसिंहम् ॥ १५ ॥

पादाम्भोजन्मधूलीलवरतहृदयव्रातकष्टावलीशुक्-
पापाज्ञानान्धकारप्रचयहृतिचणाहर्पतिस्वप्रसादम् ।
त्रैलोक्ये यानि यानि क्रतुमुखसुकृतैः सम्भवेयुः शुभानि
भूयांस्येभ्यो ददानं निजनतिततये भावये श्रीनृसिंहम् ॥ १६ ॥

श्रीनूतनशंकरगुरुस्तुतिः

पादपद्मभक्तिकल्लोकनिर्जराङ्घ्रिपा-
न्संसृताम्बुराशिसंमग्नदीनतारकान् ।
भृङ्गभोगिनीरधृद्वर्णशोर्षजान्भजे
शंकरार्यनूतनस्वाकृतीन्सदा गुरून् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तनिर्जिताखिलाम्भोजडम्बरव्रजा-
न्भक्तलोककाङ्क्षिताशेषकाम्यदायकान् ।
आश्रयत्कृतान्तभीमुख्यमञ्जनव्रतान्-
[भावयामि सद्गुणव्रातरम्यमानसान्]
शंकरार्यनूतनस्वाकृतीञ्जगद्गुरुन् ॥ २ ॥

गौतमादिनामतः सर्वशास्त्रचालकान्
पादनम्रपापभूरुड्दवानलस्मृतीन् ।
अत्रिमौनिनेत्रभूहासिहासभाङ्मुखान्
दीनसंश्रितव्रजाभीष्टपूरकान्भजे ॥ ३ ॥

स्वर्णमुख्यभोग्यदान्मोक्षमूर्तिकान्भजे
कृत्स्नलोकपालनोद्युक्तचेतसो भजे ।
मानहीनतोल्लसन्नैजधीकृपाम्बुधीन्
नम्रसर्ववाञ्छितस्पर्शकस्मृतीन्भजे ॥ ४ ॥

[रुचिरा]

शिवप्रदान्गजहयमुख्यदायकान्
भवापहान्रुचिजिततप्तहाटकान् ।
यमीडितान्परमपुमर्थदायकान्
नतेष्टदान्नृहरिमहीगुरून् भजे ॥ १ ॥

हृनैनसो विशदिततत्त्वमर्मकान्
सरोजभूसरसिजदृक्शिवाकृतीन् ।
विभूतिदान्भुवनलघुत्वबोधकान्
रुजापहान् नृहरिमहीगुरून् भजे ॥ २ ॥

कुधीहरान्मतिविकृतिव्रजांतकान्(च्छिदः)
जितस्मरा(तेंद्रिया)न् च्छममुख्यदायकान् ।
श्रमापहान्दुरित (वृजिन)क्षमानिधीन
यमादिदान् नृहरिमहीगुरून् भजे ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनूतनद्वारका(डाकोर)क्षेत्रे श्रीडङ्कपुराधिपतिस्तोत्रम्

[दोधकम्]

अब्धिभवारमणं जगदीशं सर्वसुपर्वनुतं करुणाब्धिम्।
वारणमुख्यविभूतिदपूजं डङ्कपुराधिपतिं कलयेऽहम् ॥ १ ॥

हर्षसुधाब्धिविधुं यतितुष्टं पन्नगतल्पमलङ्कृतविद्यम् ।
भक्तजनेप्सितदं शशिभामं डङ्कपुराधिपतिं कलयेऽहम् ॥ २ ॥

ऋद्धिदपादनतिं सुरसेव्यं सर्वसमृद्धिपतिं कमलेशम् ।
शङ्करपद्मभवप्रभुखेड्यं डङ्कपुराधिपतिं कलयेऽहम् ॥ ३ ॥

सुन्दरवर्ष्मंमनोधिषणाढ्यं चन्द्रविजिष्णुमुखं कमलाक्षम् ।
मोक्षवितारिपदं स्मरतातं डङ्कपुराधिपतिं कलयेऽहम् ॥ ४ ॥

ॐ मनुमुख्यसमर्थितरूपं शश्वदभीप्सितदं निहतार्त्तिम् ।
पद्मभवाण्डपतिं यमिपूज्यं डङ्कपुराधिपतिं कलयेऽहम् ॥ ५ ॥

संहृतकंसमुखासुरपूगं कायसमुज्ज्वलकान्तिजिताभ्रम् ।
कष्टहमङ्गलदायिकटाक्षं डङ्कपुराधिपतिं कलयेऽहम् ॥ ६ ॥

श्रीमदब्जाङ्घ्रिप्रमुखचतुष्टयस्तवः

[शार्दूलविक्रीडितम्]

भक्ताघौघनिवारणैकनिपुणान्पाणिस्फुरन्मुद्रिकान्
संसारोद्भवसर्वभीतिशमनान्काषायभास्यम्बरान् ।
वन्देऽब्जाङ्घ्रिसुरेशतोटकगुरूनन्हस्तस्थधात्रीगुरुनन्
आचार्येन्द्रपदाब्जभृङ्गधिषणान्प्रज्ञाप्रभाभास्वरान् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पक्षप्रदोषसमये श्रीस्मर-श्रीस्मरनिषूदन-श्रीशारदास्तोत्रम्

[वसन्ततिलका]

भक्तामरक्षितिभुवो भवसागरौर्वान्
भृङ्गाभनैजचिकुरा मुखनिर्जिताब्जाः ।
सर्वेष्टदा वसनधिक्कृतशारदाब्दा
वन्दे स्मरस्मरनिषूदनशारदाम्बाः ॥ १ ॥

काम्या रतिक्षितिधरात्मभवाब्जजातै-
र्नम्या अशेषजगतीत्रयवर्त्तिलोकैः ।
रम्याः स्वकीयतनुवृद्धिगुणावलीभि-
र्नौमि स्मरस्मरनिषूदनशारदाम्बाः ॥ २ ॥

कृष्णेडिताः प्रसभकृत्तकृतान्तभीतीः
कृत्स्नानतव्रजकृपाभरितस्वचित्ताः ।
मेनादिसंस्तुतपदाः कनकाभगात्रीः
स्तौमि स्मरस्मरनिषूदनशारदाम्बाः ॥ ३ ॥

पादाब्जभक्तवरदाभवपारदात्री-
र्नीरप्रदच्छविकचा विनताघहन्त्रीः ।
पीयूषभोजिविनुता विनतादिसेव्या
नौमि स्मरस्मरनिषूदनशारदाम्बाः ॥ ४ ॥

कष्टालिभञ्जनरता निखिलेष्टदाङ्घ्रीः
शिष्टालिपूजितपदाः पदधिक्कृताब्जाः ।
स्वाङ्घ्रिप्रदोषनमनापहृतप्रदोषा
वन्दे स्मरस्मरनिषूदनशारदाम्बाः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीपद्मपादभगवत्स्तुतिः

[अश्वललितम्]

नरहरिमूर्तिधृत्पदनतप्रकाम्यचयदायिनिर्जरतरो
त्रिभुवनदण्डधृद्गुरुपतिस्तुताङ्घ्रिकमलाश्रिताघहरण ।
गुरुरिपुनाशकृत्कनकदात्रिकसरिदाहृताङ्घ्रिकमल
जय जय पद्मपाद भगवंस्त्रिलोकगुरुपीठभूषणमणे ॥१॥

●

श्रीपरमकवित्वभूतिस्तोत्रम्

[नर्कुटकम्]

सदयहृदं नतेष्टवरदं क्षितिमामुखदं
निखिलविदं जिताक्षसुलभं कलितप्रमदम् ।
श्रितशुभदं निलिम्पकलितं द्रविणव्रजदं
परमकवित्वभूतिमनिशं हृदये कलये ॥ १ ॥

अमलधियं विभूतिदपदं विधिमुख्यनुतं
नयततिदं कृपाजलनिधिं स्मितधूतविधुम् ।
तुहिनरुचिं मनोहरतनुं स्थिरमञ्जुलदं
परमकवित्वभूतिमुमान.पदमाकलये ॥ २ ॥

प्रणवपरं पयोजनिदृशं जितधीमनसं
कलितशुभं मलीमसहरं विमलात्महृदम् ।
तनुदृढतामनोविमलताप्रतिभामुखदं
परमकवित्वमूर्त्तिमनिशं भृगुपं कलये ॥ ३ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परमशिवसच्चिदानन्दस्तोत्रम्

[पृथ्वी]

विरागिसुलभाङ्घ्रिकांस्तदितरैरवाप्येतरान्
ज्वरादिविनिवारकान् यमिकदम्बसम्पूजितान् ।
प्रणम्रधनवाग्जितद्रविणनाथवाचस्पतीन्
भजामि परयुक्शिवान् प्रणतकारुणीनीरधीन् ॥ १ ॥

पदाब्जनतपापहान् गिरिसुतादिशक्त्यर्चकान्
जपादिलघुमोदितान् करिमुखाखिलश्रीप्रदान् ।
जिताक्षततिसंस्तुतान् कनकजिष्णुकायद्युतीन्
भजामि परयुक्शिवान् शमदमादिविश्राणकान् ॥ २ ॥

विबोधदलसत्करान् श्रितनतेष्टपूगप्रदान्
तृणीकृतजगत्त्रयान् परमतत्त्वसम्बोधकान् ।
हृतप्रणतदुर्मतीन् नृपतितातिप्रमुख्यप्रदान्
भजामि परयुक्शिवान् कुमृतिरोगजारठ्यहान् ॥ ३ ॥

विकारलववर्जितानभयकाङ्क्षितस्पर्शकान्
उमाधवसरोजभूभुजगभोगितल्पाकृतीन् ।
कृतान्तमुखभीतिहान् श्रमनिकायनिर्मूलकान्
भजामि परयुक्शिवान् प्रणतमन्तुसोढ्रुत्तमान् ॥ ४ ॥

●

पूर्वाश्रमीयवेदान्तगुरु-
श्रीपरमशिवसच्चिदानन्दस्तुतिः

[अश्वललितम्]

प्रणवरहस्यदान्प्रणवयुङ्मनुव्रजरतानुदासिहृदयान्
स्मितजितसिन्धुजान्मदनजिच्छरीरसुषमानशेषशुभदान् ।
तुहिनधराधरान्तरनिशं निवासनिरतान्कुशाग्रधिषणान्
परशिवसच्चिदादिमसुखान्भजामि हृदि सरस्वतीकुलमणीन् ॥१॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीपरशुरामस्तोत्रम्

नैजपादपङ्कभूभक्तिमज्जनव्रज
शेषकाङ्क्षितार्थदस्वर्गभूमिसम्भवम् ।
संसृताभिधानभीघोरसङ्कटावली-
पूर्णसिन्धुतारकं जामदग्न्यमाश्रये ॥ १ ॥

नम्रलोककाङ्क्षितश्राणिभीतिभारहृन्-
मुद्रिकाद्वयोल्लसत्पाणिपङ्कजन्मना ।
क्षोणिपाललिङ्गधृद्दस्युधूर्त्तनाशकृत्
सत्कुठारिकाधरं जामदग्न्यमाश्रये ॥ २ ॥

कज्जलान्धकारषट्पादवह्निसूतभुग्-
दारिदायकद्युतिस्वीयमस्तकोद्भवम् ।
शीतरश्मिशारदाम्भोदकुन्तदेवता-
वारणाभवाससं जामदग्न्यमाश्रये ॥ ३ ॥

पादनीरभूनमत्काम्यसर्वलौकिका-
मुष्मिकार्थसन्तर्ति श्राणनाप्तहृन्मुदम् ।
पद्मभूशशाङ्कधृच्छक्रमुख्यदेवता-
पूजितात्मपादुकं जामदग्न्यमाश्रये ॥ ४ ॥

संश्रितार्त्तरक्षणाशेषवाञ्छितावली-
दानमुख्यसद्गुणव्रातरम्यचेष्टितम् ।
दुष्टराजकृन्तनस्वीयकार्यसिद्धये
स्वीकृतास्यजाकृतिं वारिराशिजाधवम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतसुरचलनं समस्तदार्चं
शुकमुनिराड्जनकं भवाब्धिपोतम् ।
घननिभवपुषं वलक्षकेशं
हृदि कलयामि पराशरात्मजातम् ॥ ३ ॥

नमदघहरणं नयप्रवीणं
पदनतपक्षिपतिं श्रुतान्तसक्तम् ।
विरचितमहापुराणजालं
हृदि कलयामि पराशरात्मजातम् ॥ ४ ॥

श्रीपवनस्तवः

भजदावलीहृदयेष्टगतस्पृशिधूतकल्पलतिकाङ्घ्रियुगम् ।
अनिलं भजामि भवमृत्युमुखाखिलसाध्वसप्रहृतिसक्तमतिम् ॥ १ ॥

पवनाशनभ्रमरवारिधरप्रमुखाभिमानहरशौर्यभवम् ।
अभयेष्टदानलसदात्मकरच्छविनिर्जिताब्जमनिलं कलये ॥ २ ॥

शरदम्बुवाहदधिकुन्दहिमद्युतिवस्त्रवेष्टितनिजावयवम् ।
चरणाम्बुजातनतवर्गवरव्रजदानतुष्टमनिलं कलये ॥ ३ ॥

निजपादनीरभवसन्नतहृत्कमलस्थकाम्यचयदानपटुम् ।
पवनं भजामि विनयेन जगत्त्रितयप्रणम्यचरणाम्बुजनिम् ॥ ४ ॥

शरणागतार्त्तजनवत्सलताचणवृत्तिरम्यनिजधीलसितम् ।
शरणं व्रजामि हरिसाह्यकृतेजनिताञ्जनासुतपृथातनयम् ॥ ५ ॥

कलिताङ्घ्रिसंश्रितकृतान्तभयप्रमुखाखिलार्त्ति [वि] ततिप्रशमम् ।
मरुतं श्रयामि चरणाब्जरजः स्मृतिकर्तृलोककरुणाम्बुनिधिम् ॥ ६ ॥

सरसीजसम्भवसुधाशनराट्प्रभृतिस्तुतात्मपदमम्बरजम् ।
मतिनिर्जयोद्यमपरर्षियतिप्रमुखप्रसादकरमाकलये ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनिशं रुजादिलवहैन्यलसत्कनकाभगाग्रमुखभव्यततिम् ।
वितरन्तमेमि शरणं कनकप्रमुखाखिलेष्टसहितं मरुतम् ॥ ८ ॥

भवनीरधिप्रपतितानतिकृज्जनपारदाननिरतस्वधियम् ।
गणनाविहीनजनुरालिकृताखिलपापहं हृदि दधे मरुतम् ॥ ९ ॥

परनिर्गुणत्वगुणचालकतानिजशक्तिकारितजगत्त्रियम् ।
विधिवीश[1]वाहनशिवप्रमुखाकृतिमूलहेतुसलिलं कलये ॥ १० ॥

वरदानभीतिहरचिह्नलसन्निजदिव्यपाणिकमलप्रभवम् ।
कणभुग्दृगङ्घ्रि[2]कपिलादिनयव्रजदानसक्तमनिलं कलये ॥ ११ ॥

श्रीपङ्कजासनपङ्कजेक्षणापङ्कजारिधरप्रियास्तुतिः

[हरनर्तनम्]

भक्तकाङ्क्षितदाननिर्जितनिर्जरक्षितिसम्भवान्
भीकरार्दितसंसृतानिधनीरराशिघटोद्भवान् ।
भावयामि भुजङ्गभृङ्गपयोदजित्वरकुन्तलाः
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ १ ॥

शारदामृतदालिडम्बरशातकाम्बरभासुरा
धीरपूजितपादुका निजपाणिनिर्जितनीरजाः ।
क्रूररोगदरिद्रताहृतिभुख्यहेतुनतीर्भजे
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ २ ॥

अङ्घ्रिपङ्कजसन्नताखिलकाम्यदानपरायणाः ।
नैजनैजधवादिमोददरम्यसद्गुणसुन्दरीः ।
आश्रयामि सुधाशिसन्ततिनम्यदिव्यपदाम्बुजाः
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ३ ॥

---

१. विष्णु । २. अक्षपाद ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्तनम्रकृतान्तसाध्वसमुख्यदुःख [द] कारणाः
कृष्णनैजकचालिनिर्जितकृष्णसर्पपयोधराः ।
कृष्टवल्लभचेतसो हृदि भावयामि कृपाम्बुधीन्
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ४ ॥

मेनकादिसमर्चिताद्रुहिणोद्भवाम्बुनिधिप्रभू-
मेनकातनुसम्भवस्वकलेवराः कनकच्छवीः ।
शौनकादिमुनिव्रजेडितपादनीरभवा भजे
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ५ ॥

संश्रये पदसंनमद्भवभीकराम्बुधिपारदा
नैजसुन्दरवर्ष्मसन्ततभापराजितपारदाः ।
नीरदाभकचा निजांशुकधूतशारदनीरदाः
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ६ ॥

भावये विनताघनाशचणा मरालकवाहन-
प्रोल्लसद्विनताजवाहनपुङ्गवोत्तमवाहनाः ।
पीवरस्तनतुङ्गताकठिनत्वलज्जितभूधराः
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ७ ॥

एणिकाभिमतिप्रहापकनैजलोचनलावणी-
वीणिकाञ्चितपाणिमौनिमुखार्चिताङ्घ्रिसरोरुहाः ।
पाणिकान्तिपराजिताम्बुसमुद्भवाः समुपाश्रये
पङ्कजासनपङ्कजेक्षणपङ्कजारिधरप्रियाः ॥ ८ ॥

कष्टनाशकृतां द्रुतं स्मृतिलेशमात्रवलाशया-
दिष्टसन्ततिपूरणैकपरायणात्मधियां पठन् ।
अष्टकं विधिविष्णुशंम्भुहृदम्बुजातदिवाकृता-
मष्टनैजावयवसंयुतयागसिद्धिमवाप्नुयात् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमत्पाथोजाङ्घ्रिस्तोत्रम्

(विद्युन्माला)

सर्वाजाण्डाव्रातालीस्था-
शेषब्रह्मज्ञानिस्तव्यम् ॥
वश्यश्रीमन्मापुंसिहं
वन्दे श्रीमत्पाथोजाङ्घ्रिम् ॥ १ ॥

सद्योमातङ्गादिश्रीयु-
ग्राज्यश्राणिस्वेक्षालेशम् ॥
प्रालेयक्ष्माभृज्जाग्रेजं
वन्दे श्रीमत्पाथोजाङ्घ्रिम् ॥ २ ॥

व्योमप्राङ्भुक्क्षोणीभू-
भोगिस्वसुर्नव्याकारम् ॥
कृत्ताचार्यप्राणापायं
वन्दे श्रीमत्पाथोजाङ्घ्रिम् ॥ ३ ॥

गीर्वाणालीरक्षाकारि-
श्रीदेवीधृन्नूत्नाकारम् ॥
भूतिव्रातस्पृक्पादाब्जं
वन्दे श्रीमत्पाथोजाङ्घ्रिम् ॥ ४ ॥

त्र्यक्षाकारश्रीमद्विश्वा-
चार्याभ्यर्णे वास्युत्तंसम् ॥
वैराग्यादिक्षोणीक्षेत्रं
वन्दे श्रीमत्पाथोजाङ्घ्रिम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीपुष्कलाम्बास्तवः

[कनकप्रभा]

भजदिष्टदा भयहरा फणीट्कचा
जलभूकरा सितवरप्रदा सुरनुता मनोहरा।
ममभूतये भवतु पुष्कलाम्बिका ॥ १ ॥

हरिस्नुषा मृतिहरा कृपानिधिः
दिविजार्चिता मुनिनुता कनकप्रभा।
वरदायिनो भव समुद्रपदा ॥ २ ॥

विनताघहा भगवती घनस्तनी
अभयप्रदा निखिलमृगेक्षणा।
नतकष्टदेष्टवरदा सुखप्रदा ॥ ३ ॥

श्रीपूर्णाम्बास्तवः

[प्रहर्षिणी]

संसाराम्बुधिघटजं भजत्सुरागं
हस्तन्यक्कृतनलिनां भुजङ्गवेणीम्।
विण्णर्वीशप्रभवसतीं वरप्रदात्रीं
पूर्णाम्बां हृदि निदधामि भूतिदात्रीम् ॥ १ ॥

नम्याङ्घ्रिपदयुगनम्रकाम्यदात्रीं
वासोनिर्जितशरदम्बुदां गुणाढ्याम्।
कारुण्याम्बुधिहृदयां कृतान्तशास्त्रीं
पूर्णाम्बां हृदि निदधामि भूतिदात्रीम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मौनीन्द्रस्तुतचरणां तिलोत्तमार्च्यां
नम्रालीप्सितवरदां सुवर्णवर्णाम् ।
अम्भोधिच्छविचिकुरां भवाब्धिनौकां
पूर्णाम्बां हृदि निदधामि भूतिदात्रीम् ॥ ३ ॥

पादाब्जप्रणतसुरां नताघहर्त्रीम्
उत्तुङ्गस्तनभरविनमत्स्वमध्याम् ।
साद्गुण्यप्रमुदितवल्लभां मनोज्ञां
पूर्णाम्बां हृदि निदधामि भूतिदात्रीम् ॥ ४ ॥

अम्भोजद्युतिनयनां सुरम्यगात्रीं
कायश्रीविजितदिनेशहस्तकान्तिम् ।
इष्टालीप्रदनमनामनिष्टहर्त्रीं
पूर्णाम्बां हृदि निदधामि भूतिदात्रीम् ॥ ५ ॥

श्रीपूर्णास्तवः

[शालिनी]

रागादिघ्नीं रागहीनाप्यपादां गीर्वाणार्च्यां रोगदुष्पङ्कघ्नताघ्नीम् ।
नम्रश्रीर्गीर्धूतशक्रामरार्च्यां कारुण्याब्धिं सादरं नौमि पूर्णाम् ॥ १ ॥

गौरीनाथश्रीधरप्रापकार्चां भूत्यालीदां नम्रपापेभसिंहम् ।
स्वर्णच्छायां शक्रवर्यार्चिताम्बुं मोक्षस्रष्ट्रीं सादरं नौमि पूर्णाम् ॥ २ ॥

धर्मार्थादिश्राणकस्वाङ्घ्रिपूजां राज्यश्रीदां ज्ञानविज्ञानदात्रीम् ।
विश्वाकारां वार्धकीव्याधिहर्त्रीं भीजालघ्नीं सादरं नौमि पूर्णाम् ॥३॥

योगिध्यातां कालटीक्षेत्रभूषां शङ्कृन्मूर्त्तिं शान्तिमुख्यप्रदात्रीम् ।
आयासघ्नीं क्षान्तनम्राघपूगां योगस्रष्ट्रीं सादरं नौमि पूर्णाम् ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीपूर्णाम्बापुष्कलाम्बास्तुतिः

[इन्द्रवंशा]

रागादिमालिन्यनिदानदूषित-
स्वान्तावलीदुर्लभपादपङ्कजे ।
वैराग्यमुख्याञ्चितलभ्यवीक्षणे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १ ॥

[उपजातिः]

बिडौजआत्माश्रयभोजिपाशधृ-
न्निर्ऋत्यहर्नाथमुखामरार्चिते ।
जारठ्यदुर्मृत्युजरादिनाशिके
पूर्णाम्बिकापुष्कलमातृके भजे ॥ २ ॥

यत्पादपाथोभवयुग्मसन्नता
अकिञ्चना जन्मजडा अपि द्रुतम् ।
जयन्ति यक्षेशगुरू धनोक्तितः
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ३ ॥

वसुन्धराधारकवंशशेखर-
वर्ष्मप्रजाताग्रजवल्लभस्नुषे ।
प्रणम्रदीनालिकृपासुधाम्बुधी
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ४ ॥

हस्त्याननाग्निप्रभवादिसंस्तुते
हस्त्यादिसम्पत्प्रदपादसंस्तुते ।
भक्ताघभस्मीकरणाशुशुक्षणे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ५ ॥

सरीसृपेट्तल्पसरीसृपेशधृद्-
दिव्याङ्गसञ्जातमनोऽब्जभास्करौ ।
शरीररोचिर्जिततप्तकाञ्चने
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वैपायनार्यप्रमुखर्षितल्लज-
व्रजस्तुतस्वीयपदाम्बुसम्भवे ।
स्वध्यानमुख्यात्मपरात्मसंविदौ
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ७ ॥

नानापदार्थाप्तिकृते पदाश्रित-
व्राताखिलेष्टव्रजपूर्तिदीक्षिते ।
चतुर्भुजत्र्यम्बकजप्रमोददे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ८ ॥

नम्रालिहृत्पद्मविकासने न तन्-
मध्यस्थिताशेषतमोनिवारणे ।
सहस्ररश्मिव्रतपादपल्लवे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ९ ॥

निरङ्कुशस्वामिलशासनस्थित-
स्वरादिसर्वत्रिजगत्प्रभुप्रिये ।
क्षमापतित्वप्रमुखप्रदार्चने
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १० ॥

मूर्च्छाज्वरापस्मृतिकुष्ठभूमिमृद्-
यक्ष्मादिसर्वामयनाशकस्मृती ।
निराकृतानेकदनूद्भवाधमे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ ११ ॥

करामृतप्रोद्भवयुग्मसंस्फुरद्-
भयघ्नमुद्रेप्सितदानमुद्रिके ।
विकारशून्यैर्यमिभिर्विचिन्तिते
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १२ ॥

श्रीभारती श्रीदनुजारिवल्लभा (वरुणालयोद्भवा)
श्रीपार्वतीस्तव्यचरित्ररञ्जिते ।
जातीसरोजादिसुमालिपूजिते
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रशान्तचेतोऽखिलवृत्तिमुख्यसद्-
गुणप्रदानप्रवणस्वपूजने ।
अपाङ्गपातापहृतानतश्रमे
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १४ ॥

यमादिमाष्टावयवाढ्ययोगदे
यमादिभीसन्ततिशातकस्मृती ।
नम्राघसङ्घातमहाक्षमार्णवौ
पूर्णाम्बिकापुष्कलमातृके भजे ॥ १५ ॥

श्रीपार्थस्तवः

[स्वागता]

कृष्णचन्द्रसहसञ्जनिकाम्य-
स्वीयसुन्दरकलेवर रम्य ।
पार्थ पाहि ललनामणिकृष्णा-
चित्तपङ्कजसहस्रखरांशो ॥ १ ॥

चन्द्रकाव्यशरदभ्रतुषार-
भ्राजमानपटवेष्टितकाय ।
फाल्गुनाव नमदिष्टवराली-
दानमात्रपरितुष्टहृदब्ज ॥ २ ॥

नैजपादशरणागतभीशुक्-
कृन्तनव्रत धराशयधर्म्य ।
अर्जुनाव निखिलामरनम्य-
स्वङ्गजातातुलपराक्रमसौम्य ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नैजकार्मुकमुखाच्छरवृष्टेः
पाणियुग्मयुगपत्कृतमोक्ष ।
वैनतेयनिजवाहनसौत्य
प्रेमभाग्यपद पाहि पृथाज ॥ ४ ॥

मर्कटध्वजलसन्निजदिव्य
स्यन्दनेरकखगेड्ध्वज पाहि ।
शौनकादिमुनिवर्णितनैज-
स्वच्छकीर्त्तिचण फाल्गुन पाहि ॥ ५ ॥

अर्जुनाव गिरिजाशशिमौलि-
प्रीतिलब्धपुरुपाशुपतास्त्र ।
अभ्रवर्णकनकाभसहोत्था-
दुग्धवर्णरमणात्र पृथाज ॥ ६ ॥

पाण्डुरङ्गस्तुतिः

[पृथ्वी]

सरागजनदुर्लभं विरतिपूर्णचित्तार्चितं
सुरावलिनमस्कृतं ज्वरमुखामयोन्मूलकम् ।
गिरा च रमया जितामरमहीशजीवत्वदं
कृपापरवशाशयं मनसि पाण्डुरङ्गं भजे ॥ १ ॥

गिरीन्द्रतनयाग्रजं पदविनम्रपापापहं
करीन्द्रमुखदायकं जपमुखाशुसन्तोषितम् ।
शरीररुचिनिर्जितामृतधरं शुकादीडितं
सरीसृपधवासनं मनसि पाण्डुरङ्गं भजे ॥ २ ॥

श्रितेप्सिततिप्रदं करधृतादिचक्रादिकं
प्रकाशितपरार्थकं निखिललोकपूगाधिपम् ।
नृपत्वमुखदायकं विधिहरेन्द्रमुख्यार्चितं
जराकुमृतिरुग्धरं मनसि पाण्डुरङ्गं भजे ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भयघ्नवरदाञ्चितं विकृतिहीनचित्तार्चितं
शमादिगुणदायकं निहतदुष्टदैत्यव्रजम् ।
परिश्रमहरानतिं यमभयाधिविध्वंसकं
नमद्वृजिनमर्षकं मनसि पाण्डुरङ्गं भजे ॥ ४ ॥

श्रीपाण्डुरङ्गस्तवः

[वसन्तमालिका]

निजपादपयोजनुर्नमस्कृन्निकरेष्टप्रदकल्पभूमिजातम् ।
अतिभीकरसंसृताभिधाम्भोनिधिपोतं कलयामि पाण्डुरङ्गम् ॥ १ ॥

गगनोद्भवभोजिषट्पदाम्भःपदनीकाशनिजोत्तमाङ्गजातम् ।
करकान्तिविनिर्जिताम्बुजाताखिलदर्पं कलयामि पाण्डुरङ्गम् ॥२॥

शरदम्बुदशङ्खचन्द्रमच्छविजिष्णुद्युतिवस्त्रवेष्टिताङ्गम् ।
पदनम्रवरव्रजप्रदानप्रियचित्तं कलयामि पाण्डुरङ्गम् ॥ ३ ॥

तनुकान्तिमनोज्ञतादिसम्पज्जनिसद्मस्मरमातृकाम्यमूर्त्तिम् ।
जगतीत्रयधातृशम्भुमुख्यामरनम्यं कलयामि पाण्डुरङ्गम् ॥ ४ ॥

पदपङ्कजनम्रलोककाङ्क्षाधिकदानव्रतरम्यचित्तपद्मम् ।
शरणागतमृत्युमुख्यहृत्स्मरणाङ्घ्रिं कलयामि पाण्डुरङ्गम् ॥५॥

बहुकष्टपरम्परानुभूतिश्रमदीनानतिकृत्कृपासुधाब्धिम् ।
धरणीगुरुशङ्करार्यमुख्य-प्रणताङ्घ्रिं कलयामि पाण्डुरङ्गम् ॥ ६ ॥

कनकप्रमुखाखिलेष्टलब्ध्यै चरणाब्जाश्रितकाम्यकाङ्घ्रिपद्मम् ।
भवनीरधिपारलब्धये यमिवन्द्यं कलयामि पाण्डुरङ्गम् ॥ ७ ॥

विनताघहृतिव्रताढ्यपादाम्बुजधूलीलवसंस्मृतादिलेशम् ।
विनतातनुजातवाहरूपान्तररम्यं कलयामि पाण्डुरङ्गम् ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणताभयदानकाङ्क्षितार्थस्पृशिमुद्राविलसत्करांम्बुजातम् ।
कणभुङ्नयनाङ्घ्रिमुख्यशास्त्रव्रजदाङ्घ्रिं कलयामि पाण्डुरङ्गम् ॥९॥

पदसन्नतकष्टनाशपूर्वं विहिताभीष्टसमस्तवस्तुदानम् ।
वदनाधरधूतवारिराश्युद्भवबिम्बं कलयामि पाण्डुरङ्गम् ॥ १० ॥

●

श्रीपुत्तिगस्तुतिः

[स्रग्धरा]

श्रीऋक्षेशानयुक्ताभिधनगरलसत्पुत्तिकापीठभूषा-
रत्नश्रीमत्सुधीन्द्रामलकरकमलोद्भूतनैजान्त्यजन्मा ।
श्रीऋक्षेशानपुत्रीसहचरचरणाम्भोजयुग्मप्रसादाच्-
छ्रीसुज्ञानेन्द्रतीर्थो निखिलजनततेरेधतां ह्लादकारी ॥ १ ॥

●

श्रीनर्मदास्तवः

[पञ्चचामरम्]

भवाजमुख्यसेवितां भवाब्धिकुम्भसम्भवं
भुजङ्गभृङ्गकुन्तलां पयोजजित्करद्वयीम् ।
पटावधूतशारदाम्बुदां वरालिदायिकां
भजत्समस्तशर्मदां सदा भजामि नर्मदाम् ॥ १ ॥

प्रणम्रकाम्यजालदां विशिष्टरम्यबुद्धिदां
निलिम्पनम्यपादुकां पवित्रवारिभास्वराम् ।
कृतान्तभीतिकृत्तिकां कृपापयःपयोनिधिं
कृतार्थताप्रदामतां सदा भजामि नर्मदाम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुपर्वभामिनीडितां क्वनत्सुवर्णवर्णिकां
मुनीन्द्रमण्डलीनुतां नतेष्टदानपण्डिताम् ।
भवाम्बुराशिपारदां फणीट्कचां सुवर्णदां
कृतार्थताप्रदामतां सदा भजामि नर्मदाम् ॥ ३ ॥

गरुत्मदादिसेवितां नमत्समस्तपापहां
धरावरेड्घनस्तनीं कणादमुख्यशास्त्रदाम् ।
प्रणामतोषिताशयां मृगाङ्कवर्ष्मसम्भवां
कृतार्थताप्रदामतां सदा भजामि नर्मदाम् ॥ ४ ॥

सदाष्टकं विधूद्भवापदानगीतशंसकं
स्वकष्टजालनाशनेच्छुतावशंवदः पठन् ।
अभीष्टपूगमाप्नुवन् समस्तकष्टमोचित-
स्ततोऽष्टसिद्धिभाग्भवेद्विसंशयं निरन्तरम् ॥ ५ ॥

श्रीपूर्णास्तवः

[आर्या]

भक्तजनव्रजकाङ्क्षितभाग्यश्राणनवधूतकल्पलताम् ।
भवमुख्याखिलसाध्वसभञ्जननिपुणां भजे पूर्णाम् ॥ १ ॥

भ्रमरभुजङ्गपयोदभ्रान्तिश्राणकनिजोत्तमाङ्गरुहम् ।
करकान्तिधूतडम्बरसरसीजनुषं भजे पूर्णाम् ॥ २ ॥

शारदपाथोदायकनीकाशपटावृतावयवाम् ।
शरणागतजनकाङ्क्षित-वरदानरतां भजे पूर्णाम् ॥ ३ ॥

पदपद्मानतकाम्याशेषपदार्थप्रदायिनीकरुणाम् ।
त्रैविष्टपवरनम्यातुलनिजचरणां भजे पूर्णाम् ॥ ४ ॥

कृष्णपदाब्जजद्वन्द्वश्रापकयावननिजाम्बुसंस्पर्शाम् ।
नतवत्सलतारम्यात्माशयवृत्तिं भजे पूर्णाम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम्रकृतान्तमुखाखिलभयततिकृन्तकपदस्मरणाम् ।
दीनकृपाजलशेवधिनिजहृदयाब्जां भजे पूर्णाम् ॥ ६ ॥

मेना-रम्भाद्यामरनारीलालितपदाम्बुसञ्जाताम् ।
जगतीदेशिकशङ्करभगवत्कलितां भजे पूर्णाम् ॥ ७ ॥

कनकाशेषाहङ्कृतिशातककान्तिस्वकीयवर्ष्माणम् ।
चरणानतजनतेप्सितवरवरदात्रीं भजे पूर्णाम् ॥ ८ ॥

भवसिन्धुपारदायकनिजनीरसकृत्प्रणामसुखाम् ।
अलिभोगनीरदायकजिष्णुस्वकचां भजे पूर्णाम् ॥ ९ ॥

विनतव्रजभूयोजनिसञ्चितपापाम्बुराशिघटजाताम् ।
विनतातनुजं रागप्रमुखाहीनां भजे पूर्णाम् ॥ १० ॥

घनपीनकठिनतुङ्गस्तनजितधात्रिधराभिमतिम् ।
वीणापाणिमुखार्चितशोणाङ्घ्र्यब्जां भजे पूर्णाम् ॥ ११ ॥

काणादाक्षपदादिग्रन्थैकार्थबोधजनयित्रीम् ।
एणाङ्कैणन्यक्कृन्निजमुखनयनां भजे पूर्णाम् ॥ १२ ॥

श्रीपृथुस्तवः

[द्रुतगतिः]

निजपदनतिकृत्ततिसुरपदप
अव भवजनिताखिलभयह पृथो ॥ १ ॥

मधुकरजलधृत्फणिनिभचिकुर ।
अव जलभवजिन्निजचरण पृथो ॥ २ ॥

शरदृतुसलिलप्रदनिभवसन ।
अव नतवरदव्रतचरण पृथो ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जलनिधिजिफला-रतिसुभगतनो ।
अव सुरततिसंस्तुतचरण पृथो ॥ ४ ॥

तनुमतिधिषणागुणततिरुचिरा ।
अव नवतनुभाक् फणिशयन पृथो ॥ ५ ॥

हृतनतशमन-प्रमुखभयतते ।
अव पुरुकरुणाञ्चितहृदय पृथो ॥ ६ ॥

दिविभवधरणीधरमुखविनुत ।
अव मुनिनिकरस्तुतचरण पृथो ॥ ७ ॥

नतजनकनकप्रमुखदविनते ।
अव कलिशमलान्तकचरण पृथो ॥ ८ ॥

भवमृजिजलधेर्घटभव नमन ।
अव कृतभगपत्पदसुभग पृथो ॥ ९ ॥

नतजनविहिताखिलदुरितहर ।
अव नतधरणीपितृपदग पृथो ॥ १० ॥

करकमलसद्भयहर वरद ।
अव सनककृपाभरविषय पृथो ॥ ११ ॥

दृशिपदकणभुङ्मुखनयचयद ।
अव मुखनिर्जितामृतकिरण पृथो ॥ १२ ॥

पक्षप्रदोषसमये प्रदोषसमयाधिपशम्भुवाणीस्तवः

[वसन्ततिलका]

अज्ञानसन्तमसकोटिसहस्ररश्मी
नम्रार्तिशोककलिसागरवाडवाग्नी ।
भक्तालिभाग्यवृषवारिधिपूर्णचन्द्रौ
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्रह्माण्डकोटिनिकरावनकार्यदक्षे
निर्व्याजपूर्णकरुणामृतवारिराशी ।
विघ्नाधिपानलजनुर्मुखसेविताङ्घ्री
वन्दे प्रदोषसमयाधिपशम्भुवाण्यौ ॥ २ ॥

आशाभिपूरणरताङ्घ्रियुगे नतानां
दन्तावलाश्वरथसैन्यमुखप्रदात्र्यौ ।
इष्टे हिमाचलतनूजनिहेमकुक्ष्यो-
र्नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ३ ॥

ईहादिशून्यमनआप्यपदारविन्दे
नम्रप्रमोदजलराशिसुधांशुकोटी ।
छन्दोनयव्रजसमस्तकलाधिनाथे
वन्दे प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ४ ॥

श्रीकान्तनाभिभवफालसमुत्थ [रूप]-
पीयूषरश्मिकृतनैजशिरोविभूषे ।
ऊरीकृतानतसमीहितदानदीक्षे
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ५ ॥

साष्टाङ्गयोगमुखसर्वविभूतिदाङ्घ्री
षड्वक्त्रदन्तिमुखतातपितृष्वसारौ ।
लक्ष्मीशवासवमुखार्चितपादपद्मे
वन्दे प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ६ ॥

कारुण्यजन्मधरणीस्वहृदम्बुजाते
मेनोर्वशीमुखसुराङ्गनिकार्चिताङ्घ्रो ।
लावण्यपूरसकलस्वसमुद्रकाये
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ७ ॥

एणाङ्कडिम्भकलिताभरणस्वशीर्षे
काणादमुख्यनयसञ्चयबोधदात्र्यौ ।
फालोल्लसद्दहनपद्मपलाशनेत्र्यौ
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शोणाधरापहृतबिम्बसमस्तगर्वे
पादार्चनासुलभितेहपरत्रसौख्ये।
अङ्गप्रभाविजितकोटिनिशेट्सुवर्णे
वन्दे प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ९ ॥

ॐकारमुख्यमनुवर्णितदिव्यमूर्त्ती
ॐकारजापिभवसागरपारदात्र्यौ।
वैराग्यपूर्णजनताद्रुतलभ्यपादे
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ १० ॥

सर्वामरव्रजकिरीटनिघृष्टपाद-
पाथोजसद्मनिखिलर्द्धिवितारकार्चे।
शैलाधिराजतनयाद्रुहिणस्वकान्ते (णोपगूढे)
नौमि प्रदोषसमयाधिपशम्भुवाण्यौ ॥ ११ ॥

●

श्रीप्रह्लादस्तुतिः

[प्रहर्षिणी]

पादाम्भःप्रभवपरागसक्तचेतः
काङ्क्षालीवितरणनिर्जितामरद्रुम्।
प्रह्लादं हृदि कलये भवादिभीति-
व्रातच्छिन्निजचरणाम्बुजातचिन्तम् ॥ १ ॥

भीतिघ्नाखिलवरदानसूचिमुद्रा-
विभ्राजत्करसरसीसमुत्थयुग्मम्।
प्रह्लादं हृदि कलये भुजङ्गभृङ्गा-
म्मोधर्तृच्छविरुचिरोत्तमाङ्गजातम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षीराम्भोनिधिभवदुग्धशङ्खकुन्द-
प्रालेयद्युतिपटवेष्टितस्वकायम् ।
प्रह्लादं हृदि कलये पदाब्जनम्र-
व्रातेष्टाखिलवरदानतुष्टचित्तम् ॥ ३ ॥

भक्तालीहृदयगसर्वकाम्यजाल-
स्प्रष्ट्रङ्घ्रिस्मरणसमर्चनाद्युपायम् ।
प्रह्लादं हृदि कलये सुरासुरालीस्तव्यं
स्वातुलमहिमाच्युताङ्घ्रिभक्तिम् ॥ ४ ॥

कायश्रोधनमतिकर्मभक्तिविद्या-
प्रज्ञानप्रमुखसमस्तभागरम्यम् ।
प्रह्लादं हृदि कलये कृतार्थिताम्भो-
जातोद्भवकृतगर्भकालयत्नम् ॥ ५ ॥

श्रीलक्ष्मीरमणपदाम्बुजातभक्ति-
प्राग्भारापहतकृतान्तसर्वशक्तिम् ।
प्रह्लादं हृदि कलये भवप्रजात-
क्लेशालीपतितनमत्कृपासुधाब्धिम् ॥ ६ ॥

श्रद्धोक्तस्ववचनसत्यताप्रसिद्ध्यै
स्तम्भोत्थाद्भुतनरसिंहरूपविष्णुम् ।
प्रह्लादं हृदि कलये त्रिलोकराजत्-
काम्यालीविमुखमनोज्ञचित्तवृत्तिम् ॥ ७ ॥

आश्चर्यातिशययुतं सरोजभूभू-
कीरादिप्रथितमुनीन्द्रगीतकीर्त्तिम् ।
प्रह्लादं हृदि कलये भवाब्धिपार-
स्प्रष्ट्रीषत्स्मृतनिजपादपद्मयुग्मम् ॥ ८ ॥

पादाब्जप्रणतजनेष्टसद्मपत्नी-
सन्तानप्रचयसुवर्णमुख्यदाङ्घ्रिम् ।
प्रह्लादं हृदि कलये जनुः शताली-
जातांहोनिकरमहीजनुःकुठारम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्यापि प्रियवर्षमध्यराज-
च्छ्रीकान्तस्तुतिमुखयापितात्मकालम् ।
प्रह्लादं हृदि कलये समस्तशास्त्र-
ज्ञानस्पृङ्निजचरणप्रसादलेशम् ॥ १० ॥

श्रीबलरामस्तवः

[रुचिरा]

पदाम्बुजप्रभवरजःप्रणामकृज्जनेप्सितप्रदसुरभूसमुद्भवम् ।
शुगावलीशतविलसद्भवाब्धिनी-पदाम्बुजस्मृतिकणिकं भजे बलम् ॥ १ ॥

वरप्रदाखिलभयछद्विराजितस्वपाणिभाजितसरसीसमुद्भवम् ।
मधुव्रतश्रुतिनयनाभ्रकज्जलप्रभालसच्छिरसिभवं भजे बलम् ॥ २ ॥

पयोधरच्छविवसनावृताब्धिभू-शरद्घनत्रिदशगजप्रभाङ्गकम् ।
नतावलीहृदयसरोभवस्थिताखिलेप्सितस्पृशिमुदितं भजे बलम् ॥ ३ ॥

कुशस्थलीविषयमहोट्ककुब्धिजा-मुखामृतप्रभवमधुव्रतेक्षणम् ।
विदर्भजारमणकराम्बुजार्चित-स्वपादवार्भवयुगलं भजे बलम् ॥ ४ ॥

पदाम्बुभूशरणगतावनव्रत-प्रमुख्यसद्गुणरुचिरामलाशयम् ।
पयोजजक्षितिधरजाधवामरक्षितीश्वरप्रभृतिनुतं भजे बलम् ॥ ५ ॥

अनन्यगस्वपदनतार्त्तिदैन्यहृत्कृपासुधार्णवहृदयं निसर्गतः ।
कृतान्तभीमुखशमनप्रवीणतोज्ज्वलपदवार्जनियुगलं भजे बलम् ॥ ६ ॥

निजानुभूचरणरजःपरायण-व्रजाङ्गनाव्रजहृदयप्रमोददम् ।
पराक्रमानुभवविडम्बिकात्मभूदिनाधिपप्रभवतनुं भजे बलम् ॥ ७ ॥

सकृत्पदाम्वुजनतिकृज्जनावली-कृताखिलाघहृतिपटुस्वसंस्मृतिम् ।
पयोनिधिप्रभवतनूशनोधरात्मजाधवच्छविवपुषं भजे बलम् ॥ ८ ॥

समीरभुग्रिपुनिजवाहनाग्रभुक्-समीरभुक्कुलधरणोण्नवाकृतिम् ।
करोल्लसन्मुसलहलादिमायुध-प्रकम्पिताखिलकुजनं भजे बलम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कणाददृक्पदमनुभूशरीरभू-पतञ्जलिप्रमुखनयप्रदार्चनम् ।
मृगामृतोद्भवनिखिलाभिमानहृत्स्ववल्लभानिजनयनं भजे बलम् ।।१०।।

●

श्रीबादरायणशुकस्तोत्रम्

[पृथ्वी]

विरागिजनकोटिसंस्तुतपदौ मनोजित्वदौ
जनुर्मृतिजरारुजामुखहरौ सुराल्यर्चितौ ॥
महामुनिततीडितस्वचरणौ मनौज्ञाशयौ
भजामि हृदि बादरायणशुकौ दयासागरौ ॥

●

श्रीबादरायणतनूभवस्तवः

[नर्कुटकम्]

भव भवसर्वसाध्वसरिपो जनिमृत्युहर
भुजगपभोगशायिरतधीर्वरदाङ्घ्रिनते ॥
स्वजनकमुख्यवेद्यमहि(गरि)मन्वसनायितदिक्
जय जय बादरायणतनूभव कीरमुने ॥ १ ॥

मदनशराल्यलक्ष्यसुमनो वरदानरत
मनसिजतातपादरतधीर्निखिलात्ममते ॥
(अनिशनिपीतभक्तिजलधे हरिगानरत)
विनतसमस्तपापहनते हरिरातगुरो
जय जय बादरायणतनूभव मौनिमणे ॥ २ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीबंडगडीश्रीकृष्णानन्दस्वामिस्तुतिः

[शार्दूलविक्रीडितम्]

वैराग्याप्यपदान् प्रसादितसुरान् रागादिविध्वंसकान्
पौलोमीगुरुजिद्घनोक्तितिदान् वार्धक्यदुर्मृत्युहान् ।
कष्टोर्वीध्रपहान् द्विदन्तमुखदान् दीनालिकारुण्यधीन्
कृष्णानन्दयतीन् स्मरामि हृदये नम्राघनिर्मूलकान् ॥ १ ॥

स्वर्णच्छायतनून् यमादिनिरताञ्छ्रीकान्तदत्तार्चकान्
भक्ताभीप्सितदान् पुमर्थदनतीन् ब्रह्मात्मभेदापहान् ।
तत्त्वज्ञानपरान् महीशपदहान् हृद्ग्रन्थिभेदप्रियान्
कृष्णानन्दयतीन् स्मरामि हृदये विश्वात्मभूतिप्रदान् ॥ २ ॥

अज्ञानासुरहान् वराभयकरान् व्याध्यादिविध्वंसकान्
मेशोमेशसमर्चनाप्रियमतीन् क्षोभालिहीनाशयान् ।
आयासालिहरान् क्षमामृतनिधीञ्छान्त्यादिविश्राणकान्
कृष्णानन्दयतीन् स्मरामि हृदये योगादिसिद्धिप्रदान् ॥ ३ ॥

०

श्रीबुधस्तवः

[आर्या]

भक्तामरभूमिभुवं भवभीतिघ्नं भुजङ्गनिभकेशम् ।
करजितपद्मं कलये (वन्दे) शरदभ्रपटं वरप्रदं सौम्यम् ॥ १ ॥

मनुतनुजाताकाम्यं त्रिलोकनम्यं गुणावलीरम्यम् ।
कृतकृत्यत्वदमीडे कृत्तकृतान्तं कृपाम्बुधिं सौम्यम् ॥ २ ॥

मेनाद्यर्चितपादं मुनिगणविनुतं कनकदपूजाङ्घ्रिम् ।
वन्दे भक्तेष्टवरं संसृतिपारं मनोहरं सौम्यम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनताघहरकटाक्षं घनकारुण्यं मनसिजनिभकान्तिम् ।
धृतवरदाभयमीडे शास्त्रावलिदं शशाङ्कजं सौम्यम् ॥ ४ ॥

●

श्रीबुधस्तुतिः

[शार्दूलविक्रीडितम्]

दौर्मृत्यादिहरं शचीशगुरुजिच्छ्रीवाग्विभूतिप्रदं
कारुण्याम्बुनिधिं गिरीशधृतजं हस्त्यादिसम्पत्प्रदम् ।
नम्राघेभहरिं भजामि सततं सञ्ज्ञार्कभूभूपतिं
सञ्ज्ञाजामातरं हृदम्बुजनुषि श्रीसौम्यमीडे मुदा ॥ १ ॥

कष्टाहाण्डजपं प्रियं गुरुचिरं कीरोक्तचारित्रकं
ब्राह्मज्ञानरतं वरप्रदनतिं धर्मादिमोक्षान्तदम् ।
पद्मारिप्रभवं प्रकाशितपरं क्षोणीपतित्वप्रदं
विश्वार्च्यात्मपदं हृदम्बुजनुषि श्रीसौम्यमीडेमुदा ॥ २ ॥

आधिव्याधिहरं निराकृतरिपुं भीतिघ्नमुद्राधरं
योगिध्येयपदं रमेशगिरिजानाथप्रसादप्रदम् ।
चित्तक्षोभहरं श्रमव्रजहरं क्षान्त्यम्बुशय्याशयं
योगादीप्सितदं हृदम्बुजनुषि श्रीसौम्यमीडे मुदा ॥ ३ ॥

●

श्रीभगवतीस्तुतिः

रुचिरनिजाधरस्मितोत्तमाङ्गधरलोचनाङ्घ्रियुगली
परिहृतबिम्बरजनीशमृगाङ्कदरपङ्कजातनलिनीम् ।
अतिसुलभीकृतमखाशनालयमुखाप्यमङ्गलपुन-
र्भवहृतिपादपद्मयुगलीसकृत्प्रणमनां भजे भगवतीम् ॥ १ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीभद्रकालीस्तोत्रम्

[मन्दाक्रान्ता]

भक्तेष्टालीवितरणविधिह्रेपितस्वर्महीजा
भग्नानम्रव्रजहृदयगाशेषसंसारदुःखा ।
भोगीशानभ्रमरजलधृद्दर्पहुङ्कारवेणी
भूयाद् भूत्यै सकलशुभदा सन्ततं भद्रकाली ॥ १ ॥

अब्जन्यक्कृत्करवरलसच्छ्राणिताभीतिमुद्रा
वृष्टिक्षीणाब्धरनिभपटावेष्टितस्वीयगात्रा ।
नम्रालीनां वरवितरणासक्तनैजान्तरङ्गा
भूयाद् भूत्यै सकलशुभदा सन्ततं भद्रकाली ॥ २ ॥

विश्वामित्रस्वसृतनुजनन्काम्यदिव्याङ्घ्रियुक्ता
पद्मोद्भूतप्रभृतिदिविषन्नम्यपादारविन्दा ।
कारुण्याब्धीविहितनिजहृन्नभ्यमाञ्जुल्यभूषा
भूयाद् भूत्यै सकलशुभदा सन्ततं भद्रकाली ॥ ३ ॥

कृत्ताङ्घ्र्यम्भःप्रभवविनतत्रासिकातन्तिभीतिः
कृच्छ्रप्राप्तप्रणतविपदां कृन्तने सत्कृपाणः ।
कृष्णोत्पत्तिप्रकरणलसत्कंसधिक्कारिलीला
भूयाद् भूत्यै सकलशुभदा सन्ततं भद्रकाली ॥ ४ ॥

मेनादेवीहिमधरणिधृद्धर्मसञ्जातमूर्तिः
मेनारम्भाद्यमरललनारत्नविस्मापकाङ्गी ।
नानाकारा विनतविनतासूनुवाह्यानुजाता
भूयाद् भूत्यै सकलशुभदा सन्ततं भद्रकाली ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री भद्रास्तवः

[प्रहर्षिणी]

भक्तेष्टस्पृशिनिपुणा करास्तपद्मा
संसारद्विपभृगपः सितांशुकाढ्या ।
भृङ्गाहिद्युतिचिकुरा वरालिदात्री
श्रीभद्रा मे प्रभवतु विभूतिदात्री ॥ १ ॥

काम्यालोप्रदचरणा कृतान्तभोहा
नम्याङ्घ्रिः कृशनिजकाशमध्यकुक्षिः ।
रम्यस्वावयवततिः कृपासुधाब्धिः
श्रीभद्रा प्रभवतु मे विभूतिदात्री ॥ २ ॥

मेनाद्यर्चितचरणा सुवर्णदात्री
मौनीन्द्रप्रणुतपदा विबोधपात्री
अम्भोदप्रभचिकुरा भवार्त्तिहन्त्री
श्रीभद्रा प्रभवतु मे विभूतिदात्री ॥ ३ ॥

नम्रालीदुरितहरा मनोज्ञगात्री
कम्रास्यापजितविधुः पयोजनेत्री ।
पोनस्वस्तनरुचिरा समस्तदात्री
श्रीभद्रा प्रभवतु मे विभूतिदात्री ॥ ४ ॥

श्रीभवानीस्तुतिः

[अश्वललितम्]

भ्रमरभुजङ्गभासुरकचे भ्रमव्रजनिनाशकाङ्घ्रिविनुते
भगवति भूधराधिपभवे भजज्जनकदम्बकल्पलतिके ।
भसितसितात्मवर्ष्मजलभूभवाच्युतमुखामरार्चितपदे
भव भवभीतिभञ्जनचणे भवानि भव भूतये मम शिवे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करविजिताम्बुजातनिकरे शरज्जलधराभनैजववसने
चरणनताखिलेष्टवरदे चरस्थिरसमस्तवस्तुजननि ।
धरतनुजे स्मरारिदयिते मरालगमने भवाभिधमहा-
शरनिधिपारदस्वपदभूपरागकणिकेऽत्र पारदसिते ॥ २ ॥

स्मररिपुकाम्यतासुभङ्गभां मनोज्ञमतिरम्यसुन्दरतनुं
नतजनकाम्यवस्तुनिरकरप्रदानरतिमुख्यरम्यचरिताम् ।
रविशशिभौमसौम्यधिषणप्रमुख्यकृतिसौम्यताप्रद-
निगमकदम्बगम्यविभवां नमामि सुरसङ्घनम्यचरणाम् ॥ ३ ॥

कृमिमुखपद्मयोन्यवधिसूकृपाणमुखधृत्करेपतिरता-
कृतिनिजकृत्यसक्तधिषणे कृताधततिसोढ्रि कृष्णदयिते ।
कृतनिजपादपङ्कजनमत्कृतान्तभयकृन्तिके नतजनुः
कृतकृतिताप्रदायक भदाकृवार्द्रहृदयाम्बुजेऽव सततम् ॥ ४ ॥

कनकधरात्मजाजनिगदत्कनत्कनककान्तिजिष्णुरुचिकां
घनतरपीनतुङ्गकठिनस्तनाभिहितपर्वतप्रभवताम् ।
विनतदुरन्तदुःखदमनीं विनम्रविनताजवाहनविधि-
वनजनिशत्रुशेखरसतीभनाथशिशिराशयां हृदि भजे ॥ ५ ॥

●

श्रीभवानुजास्तोत्रम्

[प्रमाणिका]

भजत्सुपर्वभूजने भुजङ्गभृङ्गकुन्तले ।
भवाम्बुराशितारिके भवानुजे भवाशु मे ॥ १ ॥

शरत्पयोदवाससं कृपादिरम्यसद्गुणाम् ।
कनत्सुवर्णवर्णिकां भवानुजां भजेऽनिशम् ॥ २ ॥

कचावधूतनीरदे कुचावधूतभूधरे ।
रुचावधूतहाटिके भवानुजे भवाशु मे ॥ ३ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भार्गवघस्त्रे श्रीभार्गवलक्ष्मीनारायणगीर्ललितास्तुतिः

[नर्कुटकम्]

जगदवनीः कृपाजलनिधीन् सकलार्त्तिहरा
द्विपमुखदा विमुक्तिदपदा नतवाञ्छितदाः ।
श्रितशुभदा वशस्थितकला विरताप्यपदा
हृदि निदधामि काव्यकमलाहरिगीर्ललिताः ॥ १ ॥

विधुवदनाः प्रणम्रवरदाः फणिराजनुता
धनततिदा मनोज्ञवपुषोऽमरपूगनताः ।
द्रुहिणमुखादतस्वविभवा विभवव्रजदा ।
हृदि कलयामि काव्यकमलाहरिगीर्ललिताः ॥ २ ॥

कमलदृशो नतामरसतीररुणाधरिकाः
स्मितवदनाः समस्तनयदा रुचिरस्वतनूः ।
स्थिरसुखदाः शुगालिशमनीः करुणाजलधीन्
हृदि निदधामि काव्यकमलाहरिगीर्ललिताः ॥ ३ ॥

यमिसुलभाः प्रभाब्धिवपुषः प्रणवाप्यपदा
विमलधियः समस्तशुभदाः सकलार्त्तिहराः ।
अवनिपतित्वमोक्षमुखकाङ्क्षितदायिनती—
हृदि निदधामि काव्यकमलाहरिगीर्ललिताः ॥ ४ ॥

श्रीभार्गवीस्तुतिः

[मात्रासमकम्]

भक्तनाकसङ्घभूमिसम्भवं भवपयोनिधेर्भक्तवारिकाम् ।
भुजगनीरधृन्नीलकुन्तलां भावयेऽनिशं भार्गवीमहम् ॥ १ ॥

वरदमुद्रिकाविभयसरसिभूधरकरद्वयन्यक्कृताम्बुजां ।
शारदाम्बुधृन्निभनिजाम्बरां भावयेऽनिशं भार्गवीमहम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतकृतान्तभीमूलकृन्तनां कृतकृतित्वदस्वपदसम्भ्रमाम् ।
कृष्णमानसाम्भोजषट्पदं भावयेऽनिशं भार्गवीमहम् ॥ ३ ॥

नतजनावलीकाम्यसर्वदां त्रिभुवनीप्रजानम्यपदयुगीम् ।
धवपदान्तिके रम्यपद्मगां भावयेऽनिशं भार्गवीमहम् ॥ ४ ॥

मेनकोर्वशीमुखसमर्चितां शौनकाजभूमुख्यपूजिताम् ।
कनककान्तिहुङ्कारिकायप्रभां भावयेऽनिशं भार्गवीमहम् ॥ ५ ॥

चरणभक्तिमद्वरततिप्रदां पारदां भवाम्भोनिधेर्द्रुतम् ।
पारदच्छवि नीरधृत्कचां भावयेऽनिशं भार्गवीमहम् ॥ ६ ॥

विनतपातकोन्मूलनव्रतां विनतसुविनतासूनुवाहनाम् ।
घननिरन्तरोत्तुङ्गनिजकुचां भावयेऽनिशं भार्गवीमहम् ॥ ७ ॥

वीणिकाधरप्रमुखसंस्तुतां कणमुगादिवाग्बोधदाङ्घ्रिकाम् ।
निजविलोचनन्यक्कृतैणिकां भावयेऽनिशं भार्गवीमहम् ॥ ८ ॥

अष्टकं हरिप्रेयसीपरं कष्टनाशकं मङ्गलप्रदम् ।
इष्टदं पठन् भक्तितो जवादष्टलम्बिदं ते सिद्धिकाध्रुवम् ॥ ९ ॥

•

श्रीभुजगमहीशशायितनुभूरमणीस्तवः

[नर्कुटकम्]

भजदखिलेप्सितस्पृशिविनिर्जितकल्पलतां
भवनिजनामकाब्धिजनमन्निखिलार्त्तिहराम् ।
[भ्रमर] भुजगपयोधरानिलभुगाभशिरःप्रभवां
भुजगमहीशशायितनुभूरमणीं कलये ॥ १ ॥

करविनिवारितामृतभवाखिलगर्वततां
शरदुदकप्रदाभवसनान्तरिताङ्गलताम् ।
चरणनमस्त्रमूदसकलेप्सितदाङ्घ्रिनतां
नरकनिषूदनोद्भवतनौ कलये निरताम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

घनतरनीरदाभिमतवारकनैजकचां
सुविमलशारदाम्वुधरसन्निभवस्त्रवृताम् ।
विरचितपारदच्छवितिरस्कृतिकायरुचिं
शुकमुनिनारदार्चिततनूजसतीं कलये ॥ ३ ॥

सुरललनालिनम्यनिजपादपयोजयुगीं
त्रिभुवनजिष्णुकाम्यललिताकृतनैजतनुम् ।
श्रुतिनिकरार्थगम्यगरिमादिसतीं पुरुषो-
त्तमतनुजातधर्म्यमहिलां प्रणमामि रतिम् ॥ ४ ॥

नतिलवकृत्स्कृतान्तभयकृन्तनतत्परता-
प्रमुखलसत्कृपापरवशत्वमनोज्ञधियम् ।
विहितकृतान्तकृन्तनललाटनिजाश्रयमुत्-
प्रसरकृतान्तकृष्णतनुभूदयितां कलये ॥ ५ ॥

अनवरतप्रमोदभरभासि हृदम्वुजनु-
र्विनतजनाल्यशेषदुरितालिहरच्चरणम् ।
विनतविनीतचित्ताविनतातनुताङ्गलसत्-
तनयकलत्ररत्नमनिशं हृदये निदधे ॥ ६ ॥

घनतरपीनतोच्छ्रयमुखाखिललक्षणभाक्-
कनककनन्महाधरणिधृत्परिपन्थिकुचाम् ।
कनकमहामणिव्रजलसत्कनकाङ्गलतां
वनजनिनाभपुत्ररमणीं कलये सततम् ॥ ७ ॥

अतिचकितैणिकानयनडम्वरहापिदृशं
विरचितवीणिकाक्वणनदक्षकरप्रजनिम् ।
सुरुचिरवेणिकाच्छविविलज्जितवायुमजं
दरवरपाणिकात्मजसतीं कलयामि रतिम् ॥ ८ ॥

भवभवकष्टकृन्तनपुरस्सरमिष्टतत-
प्रदमिदमष्टकस्मरकलत्रपरं पठताम् ।
द्रुततरमष्टसिद्धिमुखकाङ्क्ष्यपदार्थलभै-
र्निखिलविशिष्टशिष्टजनताग्रिमता प्रभवेत् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीभृगुप्रभूभृगुतनुजा (कवीन्दिराकमलदृक्) स्तवः

(रुचिराः)

भजज्जनव्रजदिविजक्षमारुहो
भवोद्भवाखिलभवहृत्पदस्मृतीन् ।
भुजङ्गमभ्रमरुचिस्वशोपर्जान्
भृगुप्रभुभृगुतनुजाहरीन् भजे
(कवीन्दिराकमलदृशो विभावये) ॥ १ ॥

करप्रभाविजितसरः स्वसम्भवाम्
छरच्छरस्पृशदमलस्ववाससः ।
स्वरावलीजितरणवीमनोहरान्
कवीन्दिराकमलदृशो विभावये ॥ २ ॥

पदाम्बुभूनतजनकाम्यवस्तुदान्
पुलोमजोन्मुखसुरनम्यपादुकान् ।
अनुग्रहप्रियमतिरम्यमानसान्
कवीन्दिराकमलदृशो विभावये ॥ ३ ॥

कृतान्तजप्रमुखभयव्रजान्तकान्
कृपाम्बुधीविहितनिजामलाशयान् ।
कृतार्थतास्पृशिनिपुणस्वपूजनान्
कवीन्दिराकमलदृशो विभावये ॥ ४ ॥

तिलोत्तमाप्रमुखसुराङ्गनार्चितां-
स्तिलप्रियप्रमुखवहुग्रहादृतान् ।
कनत्कनकवनाभावर्ष्मकान्
कवीन्दिराकमलदृशो विभावये ॥ ५ ॥

पदामृतप्रभवनमद्वरप्रदान्
भवार्णव प्रपतित भक्तपारदान् ।
कचप्रभाविभवपरास्तनीरदान्
कवीन्दिराकमलदृशो विभावये ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिद्रुतं पद्मविनताघकृन्तकान्
नमस्कृतान् प्रियव्रिनतात्मजादिभिः ।
प्रसादसत्कृतसनकादिमौनिनः
कवीन्दिराकनकदृशो विभावये ॥ ७ ॥

कणादनप्रमुखनयप्रदर्चनाम्
रणादिमे विजयवरप्रदायकान् ।
ऋणामयप्रभृतिरिपुप्रभञ्जकान्
कवीन्दिराकमलदृशो विभावये ॥ ८ ॥

अशेषसुप्रजनककष्टनाशकं
कवीन्दिराहरिकृपयेष्टदायकम् ।
पठन्नदःस्तवनप्रशष्टकं
द्रुतं ध्रुवं भवेदणिमामुखाष्टकापद [ष्टद] म् ॥९॥

श्रीभूवराहस्तुतिः

[चन्द्रवर्त्म]

काम्यदानरतरम्यसुधिषणौ
धूतपद्मचरणौ बहुकरुणौ ।
देवनम्यचरणौ जलदकचौ
भूवराहवपुषौ हृदि निदधे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीभैरवस्तुतिः

[मेघविस्फूर्जिता]

सरागस्वान्तानामसुलभपदं रागहीनाप्यपादं
सुधाशिक्षोणीशप्रभृतिविनुतं वार्धकीदुर्मृतिघ्नम् ।
गिरा जीवं लक्ष्म्या धनदमपि धिक्कुर्वते यत्प्रणम्राः
भजत्कारुण्याब्धिस्वमतिमनिशं भैरवं भावयेऽहम् ॥ १ ॥

गिरीन्द्राङ्गोद्भूतपरिवृढकलां नम्रपापावलीघ्नं
करीन्द्राश्वादिश्रीप्रदपदनतिं भोगितल्पादिनम्यम् ।
शरीरच्छायानिर्जितमधुकृतं मौन्युत्तमालीडितं
निजोग्राकारेक्षाचकितकुमतिं भैरवं भावयेऽहम् ॥ २ ॥

सकामानम्रेष्टव्रजदचरणं धर्ममुख्यार्थदार्चं
विकास्यब्जाद्यर्च्यस्वपदयुगलं बोधितब्रह्मतत्त्वम् ।
समस्तोर्वीशत्वप्रभृतिवरदं स्वर्गमुख्याधिपालं
ज्वरादिव्याध्यालिप्रशमनपटुं भैरवं भावयेऽहम् ॥ ३ ॥

करभ्राजत्खड्गप्रमुखकरणं योगीश्वराराधितं
विधिश्रीशानस्वर्पतिमुखनुतं शान्तिक्षमादिप्रदम् ।
श्रमालीसंहारप्रवणहृदयं क्षान्तनम्राखिलाघं
यमादिस्पृक्चित्तं यमभयहरं भैरवं भावयेऽहम् ॥ ४ ॥

●

वेदस्तुतिः

[स्रग्धरा]

आचार्येन्द्रप्रसादाज्जगति विजयतां सत्वरं ध्वस्तकष्टो
ब्रह्मश्रीशास्त्रिवर्यो रसिकजनशतैः सादरं सुष्ठु पुष्टः ।
भक्तिप्रज्ञाप्रदानातुलसुगतिपदो मोदसाहस्रतुष्टो
वर्षेऽस्मिन् भारतीये सकलजगति च स्तव्यकीर्तिप्रतुष्टः ॥ १ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमत्सुभद्रास्तोत्रम्

[भाराक्रान्ता]

कुन्तीजातप्रवररमणीं श्रीदेवकीगर्भजां
भीतिध्वान्ताहरिनचरणां (नमनां) शीतांशुतुल्याशयाम् ।
भक्ताल्यंहःशमननिपुणां भोगीन्द्रतल्पानुजां
कारुण्याम्भोनिधिनिजहृदं श्रीमत्सुभद्रां भजे ॥ १ ॥
(वन्दे सुभद्रां मुदा) ।

तमस्त्रर्णाभिमतिहृरुची: श्रीवासुदेवात्मजां
ब्रह्मज्ञानस्पृशिचणनर्ति शम्भुप्रियारूपिणीम् ।
भक्तव्रातेप्सितनिकरदां पुष्पेषुतातानुजां
सर्वक्षोणीरमणपददां कीरादिमौनीडिताम् ॥ २ ॥

●

श्रीमङ्गलवासरे श्रीक्षितिभूषणमुखरेणुकाम्बास्तोत्रम्

[वसन्ततिलका]

संसारसिन्धुघटजान् भजदामरागान्
पादावधूतजलजा भुजगाभवेणीः ।
वासोविधूतशरदभ्रसमस्तदर्पा
वन्दे क्षितिप्रभवषण्मुखरेणुकाम्बाः ॥ १ ॥

●

श्रीमदाञ्जनेयस्तवः

[स्रग्विणी]

नैजपादाम्बुभूयुग्मभक्त्युल्लसन्-
मानसव्रातसर्वेष्टदस्त्वद्रुमम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आञ्जनेयं भजे घोरसंसारभी-
कृन्तनैकप्रवीणप्रसादोत्करम् ॥ १ ॥

अङ्घ्रिभक्तावलीचित्तमध्यस्थिता-
शेषकाम्यव्रजस्पर्शतुष्टाशयम् ।
आञ्जनेयं भजे देवदैत्यावली-
विस्मयश्राणकस्वीयदिव्याकृतिम् ॥ २ ॥

रामभद्राभिधाकीर्त्तनश्रीपद-
स्तोत्रमुख्यात्तनित्योत्सवानन्दनम् ।
आञ्जनेयं भजे सर्वलोकावली-
नम्यनैजाङ्घ्रिपङ्कप्रजातद्वयम् ॥ ३ ॥

पादपङ्केरुहासक्तिमन्मण्डली
प्रेमितामुख्यरम्यस्वचित्ताम्बुजम् ।
आञ्जनेयं भजे कष्टकोटिव्यथां
क्लेशनिर्व्विण्णधीदीनकारुण्यधिम् ॥ ४ ॥

रामनामप्रभावाश्रयध्वंसित-
स्वाङ्घ्रिनम्रालिकार्त्तान्तिभीत्यादिकम् ।
आञ्जनेयं भजे जानकीराघव-
श्लाघितस्वीयशक्त्युल्लसद्विक्रमम् ॥ ५ ॥

श्रीमन्मथस्तुतिः

[मेघविस्फूर्जिता]

विरागस्वान्तालीसुलभचरणं रागिलभ्येतराङ्घ्रिं
जरादुर्मृत्यादिप्रशमनचणं देवदैत्यार्चिताङ्घ्रिम् ।
श्रिया वाण्या यक्षाधिपसुरन्यक्कृतो यद्विनम्रा
भजे श्रीमल्लक्ष्मीहरितनुभवं श्राणितात्मप्रकाशम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भजत्पापश्रेणीवनदवशुचिं गौरीशजामातरं
भुजङ्गेशावर्ण्यस्वमहिमलवं हस्तिमुख्यस्पृगर्चम् ।
मुनिव्रातज्ञातस्वपदविभवं नव्यमेघावभासं
भजे श्रीमल्लक्ष्मीहरितनुभवं श्राणितात्मप्रकाशम् ।। २ ।।

पुमर्थालीदानप्रवणधिषणं भक्तसर्वेष्टदाङ्घ्रिं
क्षरान्यब्रह्मीकृतपदनतं पञ्चपुष्पस्ववाणम् ।
स्वकीयाज्ञाधीनत्रिभुवनततिं भूषितस्वीयभक्तं
भजे श्रीमल्लक्ष्मीहरितनुभवं कृत्तसर्वामयालिम् ।। ३ ।।

विकारालीहीनस्वहृदयनुतं शम्बरप्राणनाशं
मनःशान्तिक्षान्तिप्रमुखगुणदं ब्रह्ममुख्यामरेड्यम् ।
कृपाक्षान्तानम्राखिलवृजिनकं सर्वश्रमोन्मूलकं
(श्राणितानम्रयोगं)
(स्पृष्टभक्तालियोगं)
भजे श्रीमल्लक्ष्मीहरितनुभवं स्पृष्टयोगादिसिद्धिम् ।। ४ ।।

श्रीमद्भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीस्तवः

[शार्दूलविक्रीडितम्]

भक्ताभीष्टकदम्बकल्पलतिकाः संसारभीभञ्जनी-
भृङ्गाम्भोदभुजङ्गजिष्णुचिकुरास्तावधूताम्बुजाः ।
वन्दे निर्जितशारदाम्बुदपटा नम्रेप्सितस्पर्शिकाः
श्रीमद्भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीः ।। १ ।।

नाम्राल्यर्चितकाम्यदानरतिमत्कारुण्यरम्याशया
गीर्वाणव्रजनम्यपादनलिनाः कृष्णाहिशीर्षोद्भवाः ।
वन्दे नम्रकृतान्तकृन्तककृपाः कृत्स्नप्रपञ्चावनीः
श्रीमद्भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीः ।। २ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छौनकनारदादिमुनिराट्श्रीमेनकाद्यप्सरः-
सङ्घातार्चितपादुका अखिलदाः कीलालधृक्कुन्तला।
कुन्दस्वर्णपयोदपारदघनस्वीयच्छवीर्भावये
श्रीमद्भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीः ॥ ३ ॥
अश्वाद्यन्तकवीनहंसवृषगा नम्रालिपापापहा
दीनानम्रकृपाम्बुधीन् करलसत्तत्तद्विशेषायुधाः।
काणादादिनयप्रदा जलधिभूधिक्कारिवक्त्राम्बुजाः
श्रीमद्भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीः ॥ ४ ॥
कष्टध्वान्तदिवाकरान् प्रणमतामिष्टावलीसाधिका-
स्तुष्टाः केवलनामपाठमुखतः शिष्टावलीपूजिताः।
भ्रष्टव्रातपवित्रताप्रदपदाः साष्टाङ्गयोगप्रदाः
वन्दे भार्गवभार्गवीस्मरगुरुश्रीभारतीपार्वतीः ॥ ५ ॥

श्रीमञ्जुमञ्जुनाथस्तुतिः

[स्वागता]

अञ्जनासुतवरप्रदसञ्ज्ञा-जञ्जपूकसततं सह गौर्या
कञ्जशत्रुशिशुशेखरनम्रं मञ्जुनाथ कृपया परिपाहि ॥ १ ॥

[वसन्ततिलका]

कर्मद्विजार्यगुरुभक्तिसुबोधमुख्य-धर्मप्रबोधलवदूरमनोयुजे मे।
धर्मस्थिलस्थितिजुडात्मविबोधनाख्य-शर्मप्रदानमनिशं कुरु मञ्जुनाथ ॥२॥

[आर्या]

अन्तर्व्यधायि सम्यग् भानोरेषा त्रिरद्य मया।
सद्यो ज्वरोऽप्यशाम्यत् स्वास्थञ्चाभूद् यथापुरं कमलेट् ॥ ३ ॥

[स्वागता]

जपादिरतनम्रजनार्त्तिभञ्जनैककृतिखर्वमनस्क।
कञ्जशत्रुकलयाञ्चितशीर्ष मञ्जुनाथ कृपया परिपाहि ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रञ्जनेन नमतां हृदयानां भञ्जनेन निजभक्तजनार्त्तेः ।
मञ्जुलात्रिजगदीश्वरतातो मञ्जुनाथ कृपया परिपाहि ॥ ५ ॥

[उपजातिः]

सुरासुरोत्तंसशिरोऽवतंसरत्नालिनीराजितनैजपीठम् ।
धर्मस्थलाधीश्वरमञ्जुनाथपादाम्वुजातं प्रणतोऽस्मि नित्यम् ॥६॥

[वसन्ततिलका]

भीमं विगीतपथसेवकदुर्मतीनां रामं समस्तरमणीयगुणावलीभिः ।
कामं वितीर्णनतलोकसमस्तकामं श्रीमञ्जुनाथमनिशं शरणं प्रपद्ये ॥७॥

[इन्द्रवज्रा]

अन्यामरादेयसमस्तदं श्रीधन्यावलीपूजितपादपद्मम् ।
कन्याकुमारीयुतमञ्जुनाथं मन्यामहे सन्ततमीप्सिताप्त्यै ॥ ८ ॥

[शार्दूलविक्रीडितम्]

ह्रीमन्तर्हृदि कुर्वतां प्रणमतां विद्यातिरेकेक्षणाद्-
श्रीमन्तं विदधात्युतथ्यसहजं जम्भारिमर्यन्तिया ।
सीमन्तिन्यवतंसताप्रविलसत्कन्याकुमारीयुजं
धीमन्तं कलये हृदम्वुजनुषि श्रीमञ्जुनाथेश्वरम् ॥ ९ ॥

भूधर्त्रीश्वरवर्ष्मजन्मविलसद्धामप्रदेशोषदं
श्रीधर्मस्थलवासलोलमनिशं श्रीमञ्जुनाथं भजे ।
गन्धर्वव्रजगीयमानगरिमन्नह्लायमायाजनु-
र्बन्धादानमदार्त्तिमोचनचणं त्वत्पादपङ्केरुहम् ॥ १० ॥

[स्रग्धरा]

श्रीमद्धर्मस्थलाख्ये वृषततिवितरत्क्षेत्रवर्ये वसन्तं
धीमल्लोकार्चिताङ्घ्रिद्वयमनिशमहं मञ्जुनाथं नमामि ।
मञ्जुत्वान्नाथताया अपि निखिलधरामण्डलस्थतंसञ्ज्ञम्
ॐ जुण्भक्तिप्रदायिस्मृतिलवचरणाम्भोजनुर्धूलिलेशम् ॥ ११ ॥

[धर्मानुरागोल्लसितान्तरङ्गं दुर्दोषभङ्गव्रतमादधानम्] ।
धर्मस्थलक्षेत्रनिवासलोलं श्रीमञ्जुनाथं शरणं प्रपद्ये ॥ १२ ॥'

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमदनस्तोत्रम्

निजपदकमलसमुत्थद्वयनततिदिविजाग ।
जनिमृतिजनिमयजालप्रशमनरतमदनाव ॥ १ ॥

शरजनिचयपरिपन्थिद्युतिकरकलितसुमेषो ।
शरदरमधुकरभोगिच्छविनिजकचमदनाव ॥ २ ॥

शरदृतुसमयगपाथोधरनिभपटवृतकाय ।
शरनिधिमथनसमुत्थातनुभव मनसिज पाहि ॥ ३ ॥

पदयुगनतजनकाम्याखिलवरततिदकटाक्ष ।
त्रिदिवजजनगणनम्यस्वचरणयुग मदनाव ॥ ४ ॥

सलिलजनिजसदनाहीट्तनुकृतशयनतनूज ।
सुरुचिरगुणगणरम्यस्वधिषण मनसिज पाहि ॥ ५ ॥

निजपदवनजनिभक्तिव्रजमृतिमुखभयनाश ।
श्रमगतनतकरुणाम्भोनिधिमतिनुत मदनाव ॥ ६ ॥

मुनिगणविदितनिजेषुव्रजगतनिरुपमशक्ते ।
हिमकरमधुमुखभिन्नोत्तमततिवृत मदनाव ॥ ७ ॥

छविजितकमनकशरीरहृदयगघननिभकाय ।
कृतनतवरदनिजाङ्घ्रिस्मृतिलव मनसिज पाहि ॥ ८ ॥

भवमृतिजलनिधिकुम्भोद्भव पदजलनिधिधूले ।
कचजितजलधरनेत्र श्रुतिमधुकर मदनाव ॥ ९ ॥

करजलभवलसदिष्टस्पृशिभयचयहृतिचिह्न ।
नतजनवृजिननिकायप्रशमनचण मदनाव ॥ १० ॥

सितकरसुरभिमृगाक्षीस्तनमुखमुखकरुणाल्या ।
द्विजपतिकलितनिजाङ्घ्रे द्विजपतिसख मदनाव ॥ ११ ॥

अनितरसहकृतमघ्नाश्रय हृतशिवमतिदार्ढ्यं ।
कृतमुनिहृदयविकारस्वकुसुमशर मदनाव ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृतिलवहृतनतकष्टव्रजनिजचरणपराग ।
अतिजवकृतनमदिष्टस्पृशिनिजपद मदनाव ॥ १३ ॥

●

श्रीमदनस्त्रोत्रम्

[द्रुतगतिः]

त्रिभुवनजननीगुरुतनुभवन ।
मधुमुखकलित नतमव मदन ॥ १ ॥

निरवधिकरुणाजलनिधिहृदय ।
श्रितजनवरद नतमव मदन ॥ २ ॥

इभमुखसकलप्रदपदनमन ।
शिवतनुजनिप नतमव मदन ॥ ३ ॥

जितनिजतनुधीमुखततिसुलभ ।
प्रमददचरण नतमव मदन ॥ ४ ॥

अधिगतबहुलप्रकृतिकमुकल ।
उडुपतिसख भो नतमव मदन ॥ ५ ॥

उरगपशयनप्रजनितसुतनो ।
नतशुभदपद नतमव मदन ॥ ६ ॥

सुरगणकलितस्वचरणकमल ।
धनततिदनते नतमव मदन ॥ ७ ॥

क्षितिधरतनुजाहरजनिरमण ।
विभवदविनते नतमव मदन ॥ ८ ॥

निजपदनतिकृद्गुहमुखविबुध ।
विधिमुखविनुत नतमव मदन ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदनतकरुणाजनिगूहहृदय ।
त्रिभुवनविजयिन्नतमव मदन ॥ १० ॥

दिविभवललनाततिनुतचरण ।
निरुपमसुषम नतमव मदन ॥ ११ ॥

जलधिजसुरभिप्रवलितमहिमन् ।
नयततिदनत नतमव मदन ॥ १२ ॥

अधरितकमलस्वनयनयुगल ।
इहपरसुखद नतमव मदन ॥ १३ ॥

श्रुतिततिगदितप्रणवसुनिरत ।
बहुयमिसुलभ नतमव मदन ॥ १४ ॥

निजतनुरुचितो जितसलिलधर ।
यममुखभयहृन्नतमव मदन ॥ १५ ॥

श्रीमधुसूदनतीर्थस्तोत्रम्

[मात्रिक-मत्तमयूरी]

भवभीतिघ्नान्भक्तजनामरभूमिरुहान्
करजितकमलान्कमलासहृजनिनिजकेशान् ।
आस्तिकनम्यान्नतकाम्यव्रजदान्कलये
गोवर्धनमठभूगुरुमधुसूदनतीर्थान् ॥ १ ॥

कमलेशपरान्नमदघकाननदावशुचीन्
धर्मधुरीणान्कणभुङ्मुखनमपारीणान् ।
विमलमनोऽघाञ्छमलनिहन्तॄन्कलयेऽहं
गोवर्धनमठभूगुरुमधुसूदनतीर्थान् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[दोधकम्]

व्याजविवर्जितपारविहीन-
क्लिष्टजनालिकृपार्णवचित्तम् ।
नम्रजनेष्टवितारिकटाक्षं
नौमि गुरुं मधुसूदनसंज्ञम् ॥ १ ॥

ॐप्रमुखाखिलतारकमन्त्र-
व्रातसमर्थितनिर्गुणतत्त्वम् ।
ॐमनुगूहिततत्त्वनिषक्तं
नौमि गुरुं मधुसूदनसंज्ञम् ॥ २ ॥

इन्द्रियमानसवृत्तिनिरोध-
ध्वंसितवासनलभ्यपदाब्जम् ।
अङ्गपराजितकान्तिशशाङ्कं
नौमि गुरुं मधुसूदनसंज्ञम् ॥ ३ ॥

[द्रुतविलम्बितम्]

जितमनःसुलभान्नतमोददान्
अधिगतात्मकलान्हरिसेवनान ।
शिवपदाब्जरतान्निखिलेष्टकान्
हृदि दधे मधुसूदनदेशिकान् ॥ १ ॥

यमिनिकायनुतान्परमर्द्धिदान्
उपनिषन्निरतान्विभवप्रदान् ।
भुवननाथपुरीमठपीठगान्
हृदि दधे मधुसूदनदेशिकान् ॥ २ ॥

करुणनैजहृदो भसिताञ्चकान्-
स्थिरसुखाभिरतान् प्रणवप्रियान् ।
शुभकदम्बकदान् जगतीगुरून्
हृदि दधे मधुसूदनदेशिकान् ॥ ३ ॥

(रुचिरा)

शुकास्यनिर्गलितसुधारसप्रदान् निरक्षरे विहितपराक्षरज्ञतान् ।
सकामसङ्गतसजलेप्सितप्रदान् विभावये हृदि मधुसूदनाभिधान् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमच्छङ्करदेशिकपुङ्गवकरपाथोरुहसंस्थापितरम्य-
श्रीगोवर्धनपीठाधिष्ठितधात्रीशङ्करमणिदेवान् ।
श्रीमच्छङ्करसाक्षान्नव्याकृतिसाक्षात्कृतिकृतभक्ता-
ञ्छ्रीमधुसूदनतीर्थगुरूत्तमगङ्गापावनचरणान् हृदि कलये ।। २ ।।

श्रीमहालक्ष्मीस्तुतिः

[उपजातिः]

उदारहासां कलहंसगामिनीं
तुङ्ग (व्यञ्ज) स्तनीं कुन्तलशङ्कितेक्षणाम् ।
श्यामानितम्बार्पितरत्नमेखलां
जगत्सवित्रीं कमलालयां भजे ।। १ ।।

पीताम्बराढ्यां सुकुमारदोश्चय-
पादोरुबाह्यं सकपोलसुन्दरीम् ।
चार्वायताक्षोन्नसतुल्यकर्णयुक्
सुभ्र्वाननां श्रीकमलालयां भजे ।।२।।

शुचिस्मितां बिम्बफलाधरद्युतिं
शोणायमानद्विजकुन्दकुड्मलाम् ।
सुमध्यमां कुण्डलमण्डिताननां
जगत्सवित्रीं कमलालयां भजे ।।३।।

लसन्महारत्नहिरण्मयाङ्गदां
स्फुरन्महारत्नकिरीटकुण्डलाम् ।
चतुर्भुजां शङ्खरथाङ्गपङ्कभू-
गदाधरां श्रीकमलालयां भजे ।।४।।

महामणिव्रातकिरीटकुण्डलां
प्रभापरिक्षिप्तसहस्रकुन्तलाम् ।
प्रसन्नवक्त्रां रुचिरायतेक्षणां
लक्ष्मीं भजे श्रीपुरुषोत्तमप्रियाम् ।।५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उन्निद्रहृत्पङ्कजकर्णिकालये
योगेश्वरास्थापितपादपल्लवाम् ।
पद्मप्रियां कम्बुसुजातकन्धरां
लक्ष्मीं भजे श्रीपुरुषोत्तमप्रियाम् ॥६॥

सुवाससं हाटककर्णभूषण-
त्विडुल्लसत्कुन्तलमण्डिताननाम् ।
वृहन्नितम्बस्तनकृच्छ्रमध्यमां
वन्देऽरविन्दाक्षमनोरमां रमाम् ॥७॥

विभूषितां मेखलयाङ्गुलीयकै-
र्महाधनैर्नूपुरकङ्कणादिभिः ।
कदम्बकिञ्जल्कपिशङ्गवाससं
वन्देऽरविन्दाक्षमनोरमां रमाम् ॥८॥

स्वकर्णविभ्राजितकुण्डलोल्लसत्-
कपोलनीलालकमण्डिताननाम् ।
दुकूलपर्यस्तनितम्बमेखलां
पीनस्तनीमब्धिभवामुपाश्रये ॥९॥

अदीनलीलाहसितेक्षणोल्लसद्-
भ्रूभङ्गसंसूचितभूर्यनुग्रहाम् ।
श्यामासदापीव्यवयोऽङ्गरञ्जितां
पीनस्तनीमब्धिभवामुपाश्रये ॥१०॥

वन्दे विमृश्याव्यभिचारिसद्गुणै-
र्वरं निजैकाश्रयतागुणाश्रयाम् ।
वव्रे वरं या निखिलार्चितं जगत्-
प्रभुं मुकुन्दं निरपेक्षमीप्सितम् ॥११॥

स्निग्धामलाकुञ्चितनीलकुन्तलै-
र्विरोचमानाननहासपेशलाम् ।
अम्लानलक्ष्म्यासुममालयाञ्चितं [तां]
जगत्सवित्रीं कमलालयां भजे ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निगूढजत्रुं पृथुतुङ्गवक्षसं
श्रीकौस्तुभोद्भासितनैजविग्रहाम् ।
आवर्तनाभिं त्रिवलीविभूषितां
जगत्सवित्रीं कमलालयां भजे ॥१३॥

कान्तां हरेः कनककुण्डलचारुकर्ण-
नासाकपोलवदनां परदेवताख्याम् ।
कुम्भस्तनीं कुलिशपाणिमुखार्चिताङ्घ्रि
[पद्मालयां सवलयां कमलां नमामि] ॥१४॥

वन्दे सुमृष्टमणिकुण्डलनिष्ककण्ठीं
दिव्याम्बरां कचभरव्यतिषक्तमल्लीम् ।
उत्तुङ्गपीवरपयोधरभारहारां
पद्मालयां सवलयां कमलां कलिघ्नीम् ॥१५॥

श्रीमहालक्ष्मीस्तुतिः

[मत्तेभः]

शीताशयाचरणधूताभिमानजलजाता कृपाजलनिधिः
शीतांशुचूडधरजाताप्रमुख्यपरिवीता रमा भगवती ।
पीताम्बुराशिमुखवीताशमुख्यभवभीतालितारणचणा
पीताम्बराप्रणतवाताशनाजलधिजातास्तु भव्यततिदा ॥ १ ॥

चित्तप्रसादलवकृत्ताखिलप्रणतकृत्तासुसाध्वसभरा
चित्तप्रसादमुखवित्तप्रदानकृतिदत्तस्वचित्तकमला ।
चित्तप्रजातगुरुदत्तप्रपञ्चगतवित्ताधिकारनिकरा
वीताम्बराप्रणतवाताशनाजलधिजातास्तु भव्यततिदा ॥ २ ॥

वित्तप्रदा निखिलवित्तादिरागरहिताप्ताङ्घ्रिपूजकरुणा
वित्ताशया कलितदत्तादिरूपततिचित्ताम्बुजन्मदिनराट् ।
हृत्तापहा प्रचुरवित्तव्रजाधिपतिचित्तप्रभूमुखनुता
पीताम्बरा प्रणनवाताशना जलधिजातास्तु भव्यततिदा ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्तेनत्वमुख्यवहुलैनःकराघलवहीनत्वदापनचणा
कीनाशभीवशगदीनालिरक्षणविलीनात्मसर्वधिषणा ।
मेनादिमारचितगानावलीविषयवीनासनप्रियतमा
पीताम्बरा प्रणतवाताशना जलधिजातास्तु भव्यततिदा ॥ ४ ॥

श्रीमङ्गलवासरेऽष्टम्यां तिथौ च श्रीजमदग्निकान्तास्तोत्रम्

[वसन्ततिलका]

काम्यालिदाननिपुणां सुरकोटिनम्यां
रम्यस्वभाववपुषं कृतकृत्यतादाम् ।
कृष्णाहिकेशवितति करुणाम्वुराशिं
नौमि त्रिलोकजननीं जमदग्निकान्ताम् ॥ १ ॥

अम्भोदनीलचिकुरां शरदभ्रवस्त्रां
सर्वेष्टदायिनमनां मुनिसंस्तुताङ्घ्रिम् ।
आनन्ददापनपटुं हृतसर्वशोकां
नौमि त्रिलोकजननीं जमदग्निकान्ताम् ॥ २ ॥

स्वर्णाभकायिकरुचिं सरसीजनेत्रीं
स्वर्णप्रदाननिरतां नतकष्टहर्त्रीम् ।
भक्ताघजालशमनीं निखिलेष्टदात्रीं
वन्दे त्रिोकजननीं जमदग्निकान्ताम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमहाविष्णुस्तुतिः

[मन्दाक्रान्ता]

वैराग्याप्यं मनसिजमुखारातिवश्यातिदूरं
वार्धक्यघ्नं कुमरणजराव्रातमुख्यापहाङ्घ्रिम् ।
श्रीगीर्धूतामरपतिगुरूकारितस्वीयभक्तं
वन्दे विष्णुं क्षरतदितरातीततत्त्वस्वतत्त्वम् ॥ १ ॥

श्रीदस्वार्चं त्रिदशनिकराराधितस्वीयपादं
ब्रह्मादीड्यं प्रणतवशगीकारिताखण्डबोधम् ।
इष्टालीदं करलसदभीकामितस्पर्शमुद्रं
वन्दे विष्णुं विकृतिरहितस्वान्तसञ्चिन्तिताङ्घ्रिम् ॥ २ ॥

पुष्पाल्यर्च्यं नतजनकृताशेषपापेभसिंहं
क्षान्त्यम्भोधिं शममुखगुणोत्तंससङ्घातदार्चम् ।
कष्टालीघ्नं श्रमततिनिजाकारसंसारनाशं
वन्दे विष्णुं यममुखलसद्योगसिद्धिस्पृगङ्घ्रिम् ॥ ३ ॥

•

श्रीमहालक्ष्मीस्तुतिः

[पृथ्वी]

भवाब्जदृशिपद्मभूनुतपदे भवान्यग्निभू-
भवप्रभववल्लभोल्लसितपार्श्वभागद्वये ।
भवाभिधभयानकाम्बुनिधिवाडवानुग्रहे
भवाम्बुनिधिसम्भवे भव विभूतये भार्गवि ॥१॥

भुजङ्गकुलभूमिभृत्प्रवरभोगिशायिप्रिया
भुजङ्गशरदम्बुद भ्ररताभ्रमस्पृक्कूचा ।
भ्रमव्रजसमूलसंहृतिचणाङ्घ्रिपद्मस्मृति-
र्भजज्जनपरम्परेप्सितदकल्पवृक्षोऽवतात् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मरप्रजननक्षितिस्वतनुमात्मबीजाक्षरैः
स्मरज्जनमनोगताखिलपदार्थदानव्रताम् ।
करच्छविनिवारिताखिलनिजस्मयाम्भोरुहां
शरज्जलवितारकच्छविनिजाम्बरां मां भजे ॥३॥

चराचरचयाकृतित्रिभुवनाम्बिकां कायभा-
पराजितनिजप्रभास्मयविशेषयुक्पारदाम् ।
करालभवसागरप्रपतितानमत्पारदां
परागलवसंस्मरत्परमभूतिदाङ्घ्रिं भजे ॥४॥

धराधरधवोद्भवाधवगदाधराजार्चितां (ते)
धराधरकठोरतोल्लसिततुङ्गपीनस्तनीम् (नि)
(धरारुणचहामहोऽधरितदर्पविम्बे रमे)
मरालघनडम्बरापहृति(नय)चुञ्चुगत्युज्ज्वलां (ले)
परात्परनिजाकृतिप्रवणधीप्रदामाश्रये ॥५॥

श्रुतिस्मृतिपुराणवाङ्(गीः)निकरगम्यसौम्याशयां
विकुण्ठनिलयस्थितानुपमरम्यहर्म्यालयाम् ।
पदाम्बुजनतावलीनिखिलधर्मकाम्यालिदां
भजामि भुवनत्रयाधिपतिकाम्यरम्याकृतिम् ॥६॥

कृपामृतमहार्णवस्वहृदयाम्बुजाताम्बुजा
कृपाणमुखशस्त्रसंस्कृतसुपर्वशत्रुव्रजा ।
कृमिप्रभृतिकञ्जजावधिनमस्कृता भस्मसात्-
कृतानतजनावलीकृतसमस्तपापावतात् ॥७॥

कृतस्वकृतितास्पृशिप्रवणपादपद्मस्मृतिः (धूलिस्पृशिः)
कृतान्तकृतभीतिधिक्कृतिलसन्नमस्कृद्व्रजा ।
कृतान्तपुरगात्मसम्भवसमर्पणादक्षिणा-
कृतात्मगुरुनिष्क्रियाप्रतिमकृष्णकान्ताऽवतात् ॥८॥

विनम्रविनतातनुप्रभववाहनाम्भोजभू-
वनप्रभवरिप्वलङ्कृतप्रमुख्यामराम् ।
(वनप्रभवसम्भवप्रियतमाशचीसेविताम्)
इनाम्बुनिधिसम्भवस्वतनुलोचनप्रेयसीं
धनाभिमतिवारकद्युतिलसत्स्ववेणीं भजे ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्तपरिरम्भणाधिकृततानुरूपत्वभाग्
अनन्तजनसूपदानुगुणपीनतुङ्गस्तनीम् ।
कनत्कनकदर्पहृच्छविविराजिताङ्गप्रभू [भां]
मन प्रभवसुन्दरावयवसन्ततिं सन्दधे (मां भजे) ॥१०॥

कणादफणिनायकप्रभृतिशास्त्रदायीक्षणां
प्रणामकरणेक्षणक्षणनिवारितापद्गणाम् ।
ऋणामयमुखाशुभक्षपणनैपुणीश्राणिकां
गणाधिपसुरेण्नुतां हृदि भजे (दधे) त्रिकोणालयाम् ॥११॥

रणाङ्गणावतारणप्रमुखकारणप्राणहृत्-
कृपाणमणितूणकेषुगणपाणिताभीषणाम् ।
प्रणन्तृजनतागणप्रणयरक्षणप्रीणन-
प्रणीतकरुणार्णवप्रणयिवीक्षणां मां भजे ॥१२॥

फणाधरफणामणिच्छुरितवर्णिकां नूपुर-
प्रघूर्णवरटारणक्वरणधूतशोणाम्बुजाम् ।
मृणालमृदुदोर्लताप्रणयकङ्कणालीक्वणत्-
कणालिचणपाणिजक्वणितदिव्यवीणां भजे ॥१३॥

गुणालिगणभूषणां विजितबिम्बशोणाधरां
क्षणच्छविचलेक्षणक्षण (च्छवि, द्युति) पराजितैणां रमाम् ।
सुपर्वपतिकर्षणप्रवणताप्रवीणाकृतिं
सुवर्णमदहृत्तनुप्रभवपञ्चवाणां भजे ॥१४॥

श्रीमहाविष्णुशयनस्तवः

[जयानन्दः]

महाव्यालीकाम्यं मुररिपुरथप्रेमपात्रं
गरुत्मन्मुख्येड्यं निजकृतिलसद्योगशास्त्रम् ।
सुमित्रावर्ष्मोद्भूमुसलधरगोविन्दरूपं
महाविष्णोः सिन्धौ शयनमनिशं भावयेऽहम् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्ताख्यं शेषं नतवरवरप्राप्यसर्वं
शुकव्यासाद्यर्च्यं भवजलनिधेः कुम्भजातम् ।
सुवर्णस्रष्टारं मणिखचितमेघाभगात्रं
महाविष्णोः सिन्धौ शयनमनिशं भावयेऽहम् ॥ २ ॥

●

श्रीमहासरस्वतीश्रीमहालक्ष्मीश्रीमहाकालीस्तोत्रम्

[मात्रिकं दण्डकम्]

भक्तव्राताशेषाभीष्टश्राणनदीक्षामहिमह्नेपितकल्पलतापदपाथोजा-
भास्करभाधिपमुख्यविभास्वरवर्त्मंजभोक्तृभ्रमराम्भोद्भ्रमकरकबरी-
भाराढ्याः
भूयःप्रादुर्माविध्वंसनपारम्पर्याकृतिभवसंज्ञकसागरनिपतनभीतिभेदो[विभेदाः]
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ॥ १ ॥

निजपदपङ्कजनतजनवरवरवितरणविधिचणमुद्राभासुरनिजकरनिर्जित-
नीरभवाः
शरदृतुकालितपाथःश्राणकनिभनिजदिव्याम्बरधृतिभूषितमर्मन्यक्कृत-
तनुवर्णाः ।
प्रणमन्निर्जरनारीपूरुषनरमणिवर्यश्रेणीमुकुटगमणिगणनीराजित-
निजपादाब्जा
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ॥ २ ॥

पाथोजोद्भवपाथोजेक्षणपाथोजारिकलाधरनिजशीर्षेन्द्रार्कानलयमहिमकृत्-
पाथोनिधिपतिमारुतनिर्ऋतिधनपतिमुख्याशेषत्रिदशनिकायाभिष्टुत-
पदकमलाः ।
पादाम्भोजनिधूलीलेशस्मृतिलवकृज्जनतालिकृतान्तजसाध्वसहर्तृ-
कृपाभरिता
भवसहजाता भवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रम्भामेनोर्वश्याद्यप्सरईडितपीनोत्तुङ्गस्तनयुगमण्डितकार्तस्वर-
हुङ्कृन्निजतनु-
भल्लीभासाभासितरम्याम्भोभवधिष्ठितमूर्त्तिध्यायकसर्वाभीप्सितदाः ।
निजचरणस्मृतिसंज्ञाकीर्तनमूर्त्तिध्यानादिमसार्थीकृतजनिशुकशौनक-
घटजमुना
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुःसत-
तम् ।।४।।

चोरदवानलडामरमुख्यसुघोरगदादिजदुःखशतावलिपूरितसंसृतिसंज्ञाभाग्-
भीकरसागरपारदपःरदडम्बरभारहवर्णविभासुरनैजकलेवरसञ्चिन्ताः ।
शारदनीरदनिजपटवेष्टितमूर्त्तिध्यानविशारदनारदशुकमुखवरददयापूरा
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ।। ५ ।।

वीणापाणिप्रमुखप्राणायामपरायणमौनिश्रेणीचिन्तितवीणाविभ्राजत्-
पाणिपयोजक्षोणीधारिश्रोणीनीरदवेणीपरभृतवाणीशोणाम्भोजमुखाः ।
काणादादिमनयविश्राणननिपुणकटाक्षा एणाङ्कादृतमाणिक्योज्ज्वलनिज-
मुकुटाः
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ।। ६ ।।

निजचरणाम्भोजविनतविनतातनुजनिवाहननलिनसमुद्भवमेनातनुजनु-
रसुनाथ-
प्रमुखत्रिदिवालयचयपालकपालकपालानुग्रहकारणकरुणावरुणालयदीक्षाः ।
निजनिजहृत्स्वत्यनुभवविषयाद्वैतविबोधकनैरन्तर्यस्तनभरविनमत्तनुमध्या
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ।। ७ ।।

प्रणतजनेप्सितकनकमुखाखिलभौमादिविभूतिस्वर्गप्रमुखामुष्मिकभोगव्रात-
युक्तश्राणितसच्चित्सुखनिजवास्तवतत्त्वब्रह्माकृतिसाक्षात्कृतिसाधन-
सम्पत्तिकदम्बाः ।
घनकनकोदररसनासदनाकनकस्त्राकृतिकनकाकारकवीर्योत्सङ्गनिजस्थाना
भवसहजाताभवकान्तासहसम्भवरमणीभवदयिता भवभूत्यै भूयासुः
सततम् ।। ८ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टकमेतत्पठतां भवसहजाभवकान्तासहभवरमणीभवदयिताङ्घ्रि-
पयोजानाम्
अष्टदरिद्रत्वादिसमस्तानिष्टसमष्टिविनष्टिविधायकसत्वरचेष्टालिविशिष्टम् ।
अष्टैश्वर्यप्राप्तिपुरस्सरसिद्ध्यष्टकलसदष्टाङ्गान्वितयोगानुष्ठानजनिष्टाद्यु त्-
कृष्टेष्टाखिलसाधनततिघातितनिजपुर्यष्टकपरिशिष्टात्मज्ञानं स्यात् स्पष्टम्॥९॥

श्रीमहिषीषोडशसाहस्रीस्तवः

[दण्डकम्]

अरविन्दाखिलदर्पनिवारकपदनतजनकाम्यश्राणनदीक्षितकल्पलता-
वरनिकरेच्छुत्रिभुवननिवसज्जनततिनम्यपदाकृतिभवजलनिधिपोताः ।
नीरदवेणीशारदनीरदपटधृतिरम्यसुवर्णसवर्णशरीरलता
अरविन्देक्षणमहिषीषोडशसाहस्रो मम भवत विभूत्यै भक्तरताः ॥ १ ॥

कनकविभूषितकनकद्युतयो नीरदचिकुराः कृष्णानुग्रहभरभरिता
मेनारम्भामुखनिजसन्नतवरदाननिषक्तकृपापूर्णहृदब्जाताः ।
शौनकनारदविनुताभवकधिपारदनतिलवकृत्तकृतान्तोद्भवभीता
अरविन्देक्षणमहिषीषोडशसाहस्र्यो मम भवत विभूत्यै भक्तरताः ॥ २ ॥

काणादादिनयालिज्ञानादीष्टस्रष्ट्र्यो विनतासुतपतिचुम्बितभृ-
च्छोणधरधार्येणाङ्कास्याःकष्टविभेत्र्यो विनतजनावलिदुरितहराः ।
वीणाधून्नुतमुरलीपाणिश्लिष्टधराधरपीननिरन्तरकठिनकुचा
अरविन्देक्षणमहिषीषोडशसाहस्र्यो मम भवत विभूत्यै भक्तरताः ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमहिषीसहस्रषोडशीस्मरगुरुस्तोत्रम्

[अश्वललितम्]

पदनतकाम्यदाननिपुणामरक्षितिरुहौ सरोरुहकरौ
सुरवरनम्यपादयुगलौ कृतान्तशमनौ शरद्धनपटौ ।
गुणततिरम्यसौम्यमनसौ(चित्तवनजौ) कृपाजनिभुवौ भुजङ्ग-
चिकुरौ
हृदि कलये मनोज्ञमहिषीसस्र गुणषोडशीस्मरगुरू ।। १ ।।

अपरिमिताघहृत्स्मृतिलवौ सुपर्वमहिलासमर्चितपदौ
खगपतिवाहनौ पदनमत्पुनर्भवहरौ शुकादिवरदौ ।
मृगवनजेक्षणौ कनकरुग्घनाभवपुषौ सुवर्णमुखदौ
हृदि निदधे मनोज्ञमहिषीसहस्रगुणषोडशीयदुमणी ।। २ ।।

•

श्रीमास्तोत्रम्

[मेघविस्फूर्जिता]

रतिस्वान्ताम्भःसम्भवदिनमणिक्रोधलोभप्रमोहा-
वलेपादिस्वारिव्रजविवशधीलभ्यभिन्नाङ्घ्रिपद्माम् ।
निरागाम्भोराशिस्वहृदयसरोजाततूर्णाप्यपादां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ।। १ ।।

विडौजोवारीशप्रभुशुचिदिनाध्यध्यक्षरात्रीशमुख्या-
मरैर्विन्ध्यालीशप्रमुखदितिभूसत्तमैःस्वार्चिताङ्घ्रिम् ।
पदाम्भोजासक्तस्वहृदयजरादुर्मृतिघ्नस्ववीक्षां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ।। २ ।।

दरिद्रेशा विधालवविरहिताश्चापि यत्पादपाथो-
भवद्वन्द्वस्मृत्या निजविभवगीर्वैभवेनातिशीघ्रम् ।
धनाधीशं नाकिव्रजपतिगुरुं ह्रेपयन्तेऽतिचित्रं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि दवीम् ।। ३ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षड़ूर्मिव्याप्ते संसृतिसलिलधौ दुस्तरे पारहीने
निमग्नानां स्वाङ्घ्रिप्रवणमनसां कारुणोवारिराशिम् ।
सुवर्णक्षोणीधृत्तनुजनिजनुःपूर्वजाप्राणकान्तां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ ४ ॥

स्वपादाम्भोजातभ्रमरनिजहृत्पङ्कजानामरं या
करीन्द्राश्वानीकद्रविणरथभाक् सर्वलक्ष्मीप्रदात्री ।
पदस्मृतसङ्घातारचितदुरितारण्यदावाग्निकीलां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ ५ ॥

शरास्थाम्भोराशिस्ववदनरसस्वाननाकाशजाता
स्वकीयाशुक्षोणीरमणरसनाशक्त्यतोतापदानाम् ।
तनुच्छायालेशापजितकनकाम्भोजगर्भाभिमानां
भजे क्षीराम्भोधिप्रभवव्रवपुषं सन्ततं नौमि देवीम् ॥ ६ ॥

चतुर्वक्त्रोत्सङ्गप्रभवनिगमव्यासवर्ष्मप्रजाता-
प्रमुखर्षिव्रातैः सततकलितस्वीयपादारविन्दाम् ।
क्षरव्रातस्थास्तूत्तमपुरुषसम्भावितस्वापदानां
भजे क्षीराम्भोधिप्रभवव्रपुषं सन्ततं नौमि देवीम् ॥ ७ ॥

सुखव्राताभीप्सायुतमतितथा स्वाङ्घ्रिपद्माश्रितानां
समस्तेष्टस्पर्शव्रतधृतिमनोहारिसर्वस्वचेष्टाम् ।
निरीहस्वान्ताङ्घ्रिप्रवणजनताबन्धमोक्षप्रदात्रीं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ ८ ॥

चतूरीतीन् वेदव्रजनिगदितान् पूरुषार्थान् पदाब्ज-
प्रणम्रेभ्यो दातुं युग [प] दिव था बाहुयुग्मद्वयाढ्या ।
सरोजातासीनां प्रथयितुमिव स्वानतस्वान्तवासं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ ९ ॥

कृपार्द्रस्वापाङ्गप्रपतनलवैः केवलैर्भूर्भुवःस्व-
र्महोमुख्याशेषस्वरचितजगद्व्रातरक्षाप्रवीणाम् ।
चतुःपाथोराशिस्ववृतिधरणीपालतादानदक्षां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गलत्कुष्ठापस्मृत्यवनिपतिसन्तानयक्ष्मज्वरार्शो-
मुखाशेषव्याधिव्रजशमनकृतस्वाङ्घ्रिपद्मप्रणामाम् ।
घ्नतीं भक्तालीनां सपदि निखिलामासुरीं चित्तवृत्तिं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ ११ ॥

स्वरोकःसङ्घारिप्रशमनकृते चक्रमुख्यायुधालीं
प्रणम्राशाग्न्यर्थं वरदभयहृन्मुद्रिके धारयन्तीम् ।
विकारालीहीनाशयहृदयसंस्थापितस्वाङ्घ्रियुग्मां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ १२ ॥

वनेजातस्वीयासनधरधरानुग्ररश्मिस्वचूडा-
मणिस्वर्गाध्यक्षामृतपतिसुताहृविर्वह्निमुख्यार्चिताङ्घ्रिम् ।
प्रसूतोक्तिव्रातानगपतिसुताभासमानस्वपार्श्वां
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ १३ ॥

पदाब्भूभक्तानां भवनिगडविच्छेदसिद्धयै जवेन
स्पृशन्तीं प्रज्ञास्पृक्शमदममुखाशेषसम्पन्निकायाम् ।
नमत्सर्वायासव्रजहृतिचणापाङ्गपातामजस्रं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ १४ ॥

यमादिस्वीयाङ्गांचितधरणिभृद्योगदानप्रमुख्यै-
र्यमादिप्रोद्भूताखिलभयततेर्मोचयन्तीं स्वनम्रान् ।
भजत्सङ्ख्यातीतप्रभवरचिताशेषपापापनेत्रीं
भजे क्षीराम्भोधिप्रभववपुषं सन्ततं नौमि देवीम् ॥ १५ ॥

श्रीमाधव(श्रीकेशव)स्तुतिः

[वसन्ततिलका]

पादाम्बुजातनतलोकसमस्तकाङ्क्षा-
संपूरणव्रतविधूतसुपर्ववृक्ष ।
संसारसाध्वसनिकृन्तनमोदिताङ्घ्रि-
पाथोभवोद्भवरजःकण माधवाव ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्भोधरभ्रमरकज्जलदन्दशूक-
सर्वाभिमानविनिवारणदक्षकेश ।
नम्रेष्टदाननियमाभयदानदीक्षा-
मुद्राद्वयाञ्चितकराम्बुज केशवाव ॥२॥

अम्भोधिजातशरदम्बुवितारिकुन्द-
क्षीराम्बुभेदकतुषारसवर्णवस्त्र ।
भक्तालिकाङ्क्षितसमस्तवरप्रदान-
सन्तुष्टमानससरोभव माधवाव ॥३॥

कामक्रुधाप्रमुखभीकरनक्रपूर्ण-
निष्पारसंसृतिपयोनिधिपारदायिन् ।
अङ्घ्र्यम्बुसम्भवयुगोत्थपरागनन्तृ-
पापेन्धनव्रजधनञ्जय केशवाव ॥४॥

कृत्तानतव्रजकृतान्तभयप्रमुख्य-
कृत्स्नाधिहेतुचरणस्मरणाद्युपाय ।
कृम्यादिपङ्कजभवावधिसर्वजन्तु-
कृत्स्नात्मकत्वधिषणाप्रद माधवाव ॥५॥

श्रीमारीचात्रिवसिष्ठ(सप्तर्षि)स्तवः

[मात्रिकदण्डकम्]

भक्तव्राताभीष्टवितारकगीर्वाणागान् निजकरनिर्जितपाथोजान्
भूयो भवमृतिभवभयभसितीकृतिचणपादाम्छरदम्बुप्रदनिजवस्त्रान् ।
आधिपहिमदधिशङ्खवलक्षस्वजटाजूटान् वरविश्राणनतुष्टहृदो
वन्दे श्रीमन्मारीचात्रिवशिष्ठकौशिकगौतमभार्गवजीवभवान् ॥१॥
पदयुगनतजनकाम्याशेषश्राणनसक्तान् कृष्णाद्यादृतमाहात्म्यान्
शतमखमुखसुरनम्यपरागस्वपदाम्भोजान् कृत्तकृतान्तादिभयालीन् ।
करुणादिमगुणरम्याखिलनयतत्त्वविबोधान् कृम्याद्यजपर्यन्तान्
वन्दे श्रीमन्मारीचात्रिवशिष्ठकौशिकगौतमभार्गवनिजतत्त्वान् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेनारम्भामुखललनामण्यचलितचिन्ताज्वरततिदायकपदनमनान्
शौनकमुखमुनिनुतनिजपादाम्भोभवयुगलान् खरभवपारस्पृक्पूजान् ।
कनकादिमघनविरतान् कनकश्राणननिपुणान् पारदनीरदनिभश्रेशान्
वन्दे श्रीमन्मारीचात्रिवशिष्ठकौशिकगौतमभार्गवजीवभवान् ॥३॥

विनतव्राताखिलदुरितावलिसागरघटजान् वीणापाणिप्रभृतीड्यान्
विनतातनुभववरदाधिपवृषवाहनरूपान् काणादादिमनयनिपुणान् ।
पीनस्तनभरनम्रतनुस्त्रीविमुखस्वान्तानेणाङ्काधिकशिशिरहृदो
वन्दे श्रीमन्मारीचात्रिवशिष्ठकौशिकगौतमभार्गवजीवभवान् ॥४॥

श्रीमैथिलसुतारघूत्तमस्तुतिः

[कनकप्रभा]

भजदिष्टदौ भवभयालिभञ्जनौ
फणिकुन्तलौ करजिताम्बुसम्भवौ ।
शरदम्बुदाभवसनौ वरप्रदौ
कलयामि मैथिलसुतारघूत्तमौ ॥१॥

नतकाम्यदौ दिविजनम्यपादुकौ
जनिमृत्युहृद्विमलरम्यचेतसौ ।
करुणानिधी विहितकृत्यताप्रदौ
हृदि मैथिलीरघुपती समाश्रये ॥२॥

नमदाञ्जनेयमुखभक्तिसिद्धिदौ
कनकादिसर्ववरदानतत्परौ ।
मधुकृत्कचौ भवपयोधिपारदौ
जनकात्मभूरघुपती भजेऽनिशम् ॥३॥

विनताघहृद्विनतवैनतेयकौ
कनकप्रभाघनपयोधरच्छवी ।
कलिकृन्तकौ विमलबोधदायकौ
हृदि मैथिलीरघुपती समाश्रये ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अखिलेष्टदो निखिलकष्टनाशको
कणभुक्श्रुतान्तमुखशास्त्रबोधदौ।
निमिवंशरत्नरघुवंशशेखरौ
जनकात्मभूरघुपती भजेऽनिशम्।

•

श्रीमोक्षलक्ष्मीस्तुतिः

[अनुष्टुप्]

अजराममृतां शुद्धां शुभाशुभविवर्जिताम्।
अविज्ञेयामनाधारां मोक्षलक्ष्मीं भजाम्यहम् ॥१॥

अदृष्टामश्रुतामाद्यामनास्वाद्यामतर्किताम्।
निर्मलां निश्चलां शान्तां मोक्षलक्ष्मीं भजाम्यहम् ॥२॥

केवलब्रह्मरूपां श्रीविज्ञानघनरूपिणीम्।
अहेयामनुपादेयां मोक्षलक्ष्मीं भजाम्यहम् ॥३॥

निरामयां निराकारां निरवद्यां निराश्रयाम्।
निर्मोहां निरहङ्कारां मोक्षलक्ष्मीं भजाम्यहम् ॥४॥

निर्गुणां निष्क्रियां शान्तां नित्यमुक्तामविच्युताम्।
निर्विकल्पां निराबाधां मोक्षलक्ष्मीं भजाम्यहम् ॥५॥

निर्विकारां निराभासां सर्वतः सुखलक्षणाम्।
प्रतिबन्धविनिर्मुक्तां मोक्षलक्ष्मीं भजाम्यहम् ॥६॥

ब्रह्मरूपां सदाशान्तां समासङ्गविवर्जिताम्।
वाच्यवाचकनिर्मुक्तां मोक्षलक्ष्मीं भजाम्यहम् ॥७॥

लक्ष्यलक्षणनिर्मुक्तां सच्चिदानन्दलक्षणाम्।
शान्त्यादिसाधनप्राप्यां मोक्षलक्ष्मीं भजाम्यहम् ॥८॥

सर्वद्वन्द्वविनिर्मुक्तां सर्वसम्बन्धवर्जिताम्।
षड्भावनाक्रियाहीनां मोक्षलक्ष्मीं भजाम्यहम् ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वेषां प्राणिनां साक्षादात्मभूतां स्वयंप्रभाम् ।
सर्वावरणनिर्मुक्तां मोक्षलक्ष्मीं भजाम्यहम् ॥१०॥

श्रीमोहिनीस्तवः

[शोभा]

भजत्कल्पक्ष्माजं भवभयशमनीं भृङ्गभोग्यब्दवेणीं
वरस्पर्शासक्तां करजितनलिनां शारदाब्दाभवस्त्राम् ।
सुपर्वद्विण्णम्यां मनसिजजननहृत्काम्यसर्वाङ्गरम्यां
सुधाभाण्डभ्राजत्करकमलभवां मोहिनीं नौमि मायाम् ॥१॥

कृपापूर्णापाङ्गावितसुरनिकरां कृत्तगौरीशदार्ढ्यां
कृतान्ताद्याशुघ्नीं कनकरुचितनुं मेनकाद्यप्सरोभिः ।
मुनीन्द्रैश्चाराध्यां घननिभचिकुरां पारधात्रीं भवाब्धेः
सुधाभाण्डभ्राजत्करकमलभवां मोहिनीं नौमि मायाम् ॥२॥

प्रणम्राघालीघ्नीं विनतखगपतिं पीनवक्षोजनम्रां
कृपाम्भोधिं काणाशनमुखनयदां पाणिविन्यस्तवीणाम् ।
स्मृतेर्ध्वस्तानिष्टां विहितसुखचयामष्टसिद्धिप्रदात्रीं
सुधाभाण्डभ्राजत्करकमलभवां मोहिनीं नौमि मायाम् ॥३॥

श्रीमोहिनीशिवस्तोत्रम्

देवार्चितौ श्रितविजीवावसुदौ विजितजीवनिमेषजनता-
राड्वाक्यवैभवचयावासप्राप्यधिनतीवामतिग्मनयनौ ।
वैराग्यलभ्यचरणौ रागरोषशमनौ रात्रीपाभवदनौग्रजनुषौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जारठ्यदुर्मृत्यरण्यघोरामयादिहरनीशद्यतीयकरुणौ
मारप्रसूरमणमारासुदाप्रमदवाराशिपूर्णशशिनौ ।
स्तम्भीकृताभिमतिकुम्भीन्द्रकुम्भकुचकुम्भित्वचारुगिरिशौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ २ ॥

वारीशवर्ष्मंजनिगौरीप्रमोदततिकारिस्वकीयचरितौ
हस्त्यादिदायकपुलस्त्यावयोद्भवहहस्त्यादितातवपुषौ ।
पापापनोदककृपापाङ्गवातकृततापावलीप्रशमनौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ३ ॥

योगीन्द्रपूज्यपदभोगीन्द्रभोगिशयभोगीन्द्रभूषितगलौ
धूर्तालिकारितशुकार्त्तादिजालहरमूर्त्तानुकम्पितदृशौ ।
वार्तावियोगजनिकार्त्तस्वरीविहितकार्तस्वराब्धिजरुचौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ४ ॥

ऊरीकृतनतसुरारीशसर्वनयपारीणतादिविभवौ
शारीरभाजितदशोभिशताडचतनुहारिकृताहिकुलपौ ।
कोरादिपूजितपदारादनन्तभवकाराविमोचितनतौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ५ ॥

सत्त्वाद्यतीतनिजतत्त्वोपदेशरतसत्त्वावलम्बिविनतौ
ॐ कारलभ्यपदकोकारिशोज्जनिशकोकारिराजिशिरसौ ।
नैजाक्षराकृतिपराजादिदेववरलाजादिकीर्णचरणौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ६ ॥

राजाधिराजपदमाजादिविष्णुमतिजाजादिबोधदनतौ
कामप्रसूरमणकामंप्रणम्रजनकामप्रपूर्त्तिनिरतौ ।
शिष्टार्चितौ प्रणमदिष्टालिदौ निखिलदुष्टासुहापनपटू
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ७ ॥

मोक्षप्रदप्रणतकक्षाप्रविष्टजनरक्षातिदुष्टजनता-
शिक्षापटू सपदि मोक्षार्थिबन्धहतिदक्षस्वपादकमलौ ।
काङ्क्षाधिकं त्वरितमक्षालिनिग्रहदीक्षमनोज्ञचरणौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्रादिहस्तचक्रादिशक्तिमुखकर्मादिरूपधर-
तक्रादिमोषकवक्रोत्तमाङ्गरुहशक्रादिपूज्यपद ।
नक्रादितपधर्मावलीसुलभभर्मादिदायिनमन-
श्रीमोहिनीपशुपतो मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ९ ॥

धर्मार्थकाममुखशर्मप्रदानपटुनर्मप्रवोधनपटू
धर्मादियुग्मजयकर्मालिरहितवर्मायितस्व वरणौ
ध्वस्ताखिलार्त्तिततिशस्ताखिलेप्सितदहस्तद्वययुता [तौ]
श्रीमोहिनीपशुपतो मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ १० ॥

सद्मायितस्फुटितपद्मस्वकीयकरपद्मादतारिरथपत्वमा
पद्मास्वनाभिभवपद्माशयाञ्जरविपद्माभिधानरुचिरा ।
पद्मार्चिताविभवसद्मानताजननिसद्मस्त्वदीयकरुणां
श्रीमोहिनीपशुपतो मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ ११ ॥

आत्मप्रवोधपरवर्त्मप्रदायपटुगरुत्मत्प्रपुरुष्यर्चितनुता [तौ]
भूपालतादनिखिलापायहन्तृनतपापापहारिचरणौ ।
क्षोणीपरास्तगिरिवेणीविधूतभुजगैणीविजिष्णुचिकुरा [रौ]
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥ १२ ॥

दुर्गार्तिसन्ततिहसख्यादृताविजयाख्यायुतस्यतत्त्वप्रदा
दुर्गाहृतार्घतनुभर्गाप्रमुख्यनिखिलस्वर्गाधिकावासियुत- ।
गर्गादिमौनिवरवर्गार्चितस्वचरणासुरमुख्यावलिनुतपदा
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१३॥

स्वाख्यास्मृतिप्रवहदाख्यादिहीनपरमाख्यात्मतत्त्वदपदा
व्याधिव्रजाखिलहृदाधिप्रमुख्यभववाधिस्वपादनमना ।
विख्यातवैभवपदापदाख्यालवाज्ज्वरितमुख्याभयालिहरणा
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१४॥

भीतिप्रदायकमहेतिव्रजघ्नापदिनीतिप्रदानधिषणौ
सत्यादिहीनमतिहृत्यादिपापरतदैत्यालिमर्दनचणौ ।
रामामनोज्ञतनुकामादिदोषहरनामाक्षरावलिजपौ
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्तप्रसादमुखवित्तप्रदानकृतिदत्तस्वचित्तकमला
पुष्पालिपूज्यपदपुष्पायुधार्यजितगीष्पस्ववाक्पदनता ।
मल्लीमुखाढ्यकचवल्लीविजिष्णुतनुसल्लीनधीत्वमुखदा
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१६॥

इन्द्रार्चिताङ्घ्रियुगमन्द्रस्ववृत्तिशुभकेन्द्रस्वकीयचरणा
सान्द्राशयासततचन्द्रावतंसविनुततन्द्राविहीनधिषणा ।
श्रान्तप्रणम्रजनशान्तान्तरङ्गयुतदान्ताक्षतास्पृशिपटू
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१७॥

बाधाविवर्जितसमाधानयुक्तमनआधानचुञ्चुचरणा
क्षान्ताखिलाघचयशान्तासहप्रभवकान्तामणेऽव सततम् ।
कान्तारवासिकात्मात्मवृत्तविहितान्तादिभीतिशमना
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१८॥

स्तोत्रश्रुतेः सुदृढगात्राढ्यता भुवनयात्राप्रसिद्धिकमला
पात्रत्वगोनिकरमात्राश्रयत्वयुतपवित्राङ्घ्रितामयते ।
सुत्रामपूजितविचित्रात्मवैभवचरित्रादिदिव्यचरणा
श्रीमोहिनीपशुपती मोहपाशमुखतो मोक्षदौ हृदि भजे ॥१९॥

श्रीयज्ञसूकरस्तोत्रम्

[उद्गता]

रणरङ्गधीरकनकाक्ष-शमनकरयज्ञसूकरम् ।
चित्तसरसिभवे कलये वरदाभयाढ्यनिजपाणिपङ्कजम् ॥ १ ॥

शरणागतार्त्तिहृतिरम्य-हृदयकमलं वराहकम् ।
नौमि सुरततिनम्यपदं प्रसभोद्धृताम्बुधिनिमग्नभूतनुम् ॥२॥

भवसिन्धुपारदनिजाङ्घ्रि-कमलजनुषं वराहकम् ।
संहृतदितितनुप्रभवं कलये नतार्थितसमस्तवस्तुदम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतिकृत्कृताघनिकुरम्ब-वनदवशुचिं वराहकम् ।
कम्पितभुवनघर्घरितं सततं भजामि विनताजवाहनम् ॥४॥

●

श्रीयदुकुलमणिस्तवः

अगणितकमलभवाण्डव्रजसृजिमुखनिजलीलम् ।
तनुजनिमनसिजमुख्यं यदुकुलपरिवृढमीडे ॥१॥

परिमितिरहितकृपालो-जलनिधिनिजहृदयाब्जम् ।
पदनतजनवरदार्चं यदुकुलमणिमहमीडे ॥२॥

रथगजतुरगपदाति-प्रमुखदकणिककटाक्षम् ।
जलनिधिजनिहृदयेशं यदुकुलमणिमहमीडे ॥३॥

जितमतिजनसुलभाङ्घ्रि विरचितनर्तिततिहर्षम्
निजवशगनिखिलविद्यं यदुकुलमणिमहमीडे ॥४॥

यतनिजतनुमतिवाणो-मुखजनसुलभपदाब्जम् ।
प्रमददचरणसमर्चं यदुकुलमणिमहमीडे ॥५॥

अधिगतसकलकलाली-विरचितनतनिकुरुम्बम् ।
फणिपतितनुकृततल्पं यदुकुलमणिमहमीडे ॥६॥

उडुपतिकलितवतंसाम्बुजजनिमुखकलिताङ्घ्रिम् ।
विरचितनतवरदानं यदुकुलमणिमहमीडे ॥७॥

सुरततिमुकुटनिघृष्ट-स्वचरणसरसिजयुग्मम् ।
द्रुतकृतनतनिकरर्द्धिं यदुकुलमणिमहमीडे ॥८॥

अमृतधिजनिमुखकान्तामणिगणदृढपरिरब्धम् ।
विभवदचरणयुगार्चं यदुकुलमणिमहमीडे ॥९॥

निरुपमतनुजगदम्बातनुवरजनितसुमेषुम् ।
विधिहरमुखसुरपूज्यं यदुकुलमणिमहमीडे ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अगतिकपदनतदीनव्रजनतशुभदकृपाब्धिम् ।
हृतनतनिखिलकुलेखं यदुमणिकुलमहमीडे ॥११॥

निरुपमतनुमतिसर्वावयवगसुषममनोज्ञम् ।
गिरिजनिमुखनुतकान्तं यदुमणिकुलमणिमीडे ॥१२॥

सलिलजभवतनुकान्ता-गिरिजनिमुखनुतजायम् ।
अतुलिततनुसुषमाढ्यं यदुकुलपरिवृढमीडे ॥१३॥

कमलजनयनजनेत्रोद्भवतनुशिशिरहृदब्जम् ।
नयततिवितरणदीक्षं यदुकुलपरिवृढमीडे ॥१४॥

निजमुखपदधरधूतोडुरमणसलिलजबिम्बम् ।
इहपरसुखततिदार्चं यदुकुलमणिमहमीडे ॥१५॥

प्रणवकमुखकरणालीसुलभितनिजपदवीक्षम् ।
प्रणवकमुखजपतुष्टं यदुकुलमणिमहमीडे ॥१६॥

कुविषयविमुखमनोऽब्जव्रजभवझर्टार्तिविनाशम् ।
स्मितलवविजितशशाङ्कं यदुकुलमणिमहमीडे ॥१७॥

शमनजमुखभयभेत्तृस्वचरणकमलपरागम् ।
अविरतशुभदकटाक्षं यदुकुलमणिमहमीडे ॥१८॥

●

श्रीयमस्तवः

[मञ्जुभाषिणी]

निजपादपद्मनतिकृन्मनोरथव्रजपूरणापजितकल्पपादपम् ।
यममाश्रयामि भवभीतिभञ्जनव्रतबद्धदीक्षपदपङ्कजस्मृतिम् ॥१॥

भ्रमरानिलाशिनवमेघकज्जलप्रमुखाभिमानहरकान्तिशीर्षजम् ।
यममाश्रयामि शरदम्बुदप्रभालसदंशुकावृतघनाभवर्ष्मकम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रितलोककाम्यवरजालदा [प] नप्रमदाप्तिशीलहृदयाम्बुसम्भवम् ।
यममाश्रयाम्यखिलनम्यवैभवाञ्चितनैजपादपयसीसमुद्भवम् ॥ ३ ॥

समबुद्धिताप्रमुखधर्म्मलक्षणप्रथितामलात्मगुणरम्यचेष्टितम् ।
यममाश्रयामि विधिपद्मलोचनाम्बुजशत्रुधारिविहितप्रसादकम् ॥४॥

जनिमृत्युसाध्वसनिकृन्तनक्षमस्वपदाम्बुजन्मजनिधूलिसंस्मृतिम् ।
यममाश्रयामि विनमत्परम्परासुखदुःखचिन्तककृपासुधाम्बुधिम् ॥५॥

मकरध्वजप्रमुखभीतिजालकृन्मारादिपूर्णभवसिन्धुपारदम् ।
यममाश्रयामि बहुजन्मसञ्चयार्जितपापसन्ततिनिकृन्तनाङ्घ्रिकम् ॥६॥

खललोकदण्डनस्वधर्मभू-कृतिचिह्नदण्डधरपाणिपङ्कजम् ।
यममाश्रयामि भगवत्पदाम्बुभूरतलोकदूरगमितस्वदूतकम् ॥७॥

अभयप्रदानवरदानमुद्रिकाद्वयशोभमानकरनीरसम्भवम् ।
यममाश्रयामि दिननाथवर्ष्मजं यमुनामनुप्रमुखपूर्वसम्भवम् ॥८॥

•

श्रीयमस्तुतिः

[मन्दाक्रान्ता]

वैराग्याप्यं विरतविनुतं रागिदूरस्वपादम्
इन्द्रेन्द्रार्यद्रविणमतिदं जारठीदुर्मृतिघ्नम् ।
शम्भ्वासक्तं द्विरदमुखदं कारुणीनीरराशिं
वन्दे नित्यं यममहमलं सर्वपापप्रणाशम् ॥१॥

अब्दच्छायं मुनिततिनुतं कालपाशाढ्यहस्तम्
इष्टालीदं हरिपदरतं ब्रह्मबोधप्रदार्चम् ।
विश्वाकारं नरपपददं पङ्कजाद्यर्चिताङ्घ्रिं
वन्दे नित्यं यममहमलं विश्वपाल्यस्वकाज्ञम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुर्धीनाशं भयहरकरं सर्वरोगव्रजघ्नं
विश्वावासिप्रणतचरणं शान्तचित्तार्चिताङ्घ्रिम् ।
आयासघ्नं सकलसहनं शान्तिमुख्यस्पृगार्चं
वन्दे नित्यं यममहमलं मृत्युहृद्योगभीतिम् ॥३॥

श्रीयमुनायदुनाथस्तवः

[शार्दूलविक्रीडितम्]

नीरागाप्यपदाम्बुजावजितधीलभ्येतराङ्घ्र्यम्बुजौ
दुष्पञ्चत्वजराग्रही दिविवसत्सङ्घातसम्पूजितौ ।
लक्ष्मीगीर्लवधूनगुह्यकपतिस्वर्गार्चनादायकौ
वन्दे श्रीयमुनाहरी प्रणतिकृत्कारुण्यपाथोनिधी ॥१॥

नागाश्वादिरमाप्रदौ गिरिसुतावाणीप्रमुख्यार्चितौ
नागाधीश्वरसंस्तुतौ नमदघारण्योग्रदावानलौ ।
कीरादोडितवैभवौ कमलदन्यक्कृन्निजाङ्घ्रित्विषौ
वन्दे श्रीयमुनाहरी परतरज्ञानप्रदस्वार्चनौ ॥२॥

धर्माद्यर्थवितारकौ नतजनाशेषेष्टसम्पत्प्रदौ
तत्त्वज्ञानदचिन्तनौ कमलभूमल्लीतुलस्यर्चितौ ।
ब्रह्माण्डव्रजनायकौ नतमनोमालिन्यनिर्मूलकौ
वन्दे श्रीयमुनाहरी ज्वरमुखाशेषामयोच्छेदकौ ॥३॥

ब्रह्मेशप्रमुखेडितौ यतमनःसञ्चिन्तिताङ्घ्रिद्वयौ
आयासव्रजनायकौ शमदमक्षान्त्यादिसम्पत्प्रदौ ।
क्षान्तानम्रकृतांहसौ नृपतितामुख्येष्टदानप्रियौ
वन्दे श्रीयमुनाहरी प्रभवहृद्योगादिसिद्धिप्रदौ ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीयमुनायदुनायकाष्टकस्तुतिः

[एकरूपम्]

भवभीतिविभञ्जकार्चनौ
भजतां निर्जरभूरुहस्मृती ।
यमुनायदुनायकौ भजे
भुजगाम्भोधरभृङ्गकुन्तलौ ॥१॥

कनकच्छविभास्वराम्बरौ
करधृताखिलपद्मडम्बरौ ।
कलये यमुनायदूत्तमौ
वरदानप्रवणात्मचेतसौ ॥२॥

त्रिदशव्रजनम्यपादुकौ
पदनम्रावलिकाम्यसर्वदौ ।
यमुनायदुनायकौ भजे
गुणरत्नव्रजरम्यमानसौ ॥३॥

निजनम्रकृतान्तभीहरौ
हरपद्मोद्भवमुख्यपूजितौ ।
कलये यमुनायदूत्तमौ
विनमद्व्रातकृपासुधार्णवौ ॥४॥

पदसन्नतमेनकादिमौ
निजसौहार्दग (स्वननान्द्रव्रज) मेनकात्मजौ
यमुनायदुनायकौ भजे
कनकस्पर्शिकटाक्षलेशकौ ॥५॥

भवनीरधिपारदस्मृतौ
वरदौ नैजपदानतावलेः ।
कलये यमुनायदूत्तमौ
भुजगाल्यम्बुदनीलकुन्तलौ ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनतातनुसम्भवार्चितौ
विनताघावलिभस्मकृत्पदौ ।
यमुनायदुनायकौ भजे
धनधान्यादिसमस्तदायिनौ ॥७॥

नयजालवितारकार्चनौ
करसंसूचितभीतिनाशनौ ।
कलये यमुनायदूत्तमौ
विजितार्णाम्बुजनुर्विलोचनौ ॥८॥

श्रीयादवकुलप्रजातहरिस्तवः

[नन्दनम्]

अमितकृपासुधाजलनिधिस्वचित्तपाथोरुहं
चरणसरोजनम्रजनताखिलेष्टसंस्पर्शकम् ।
रथगजवाजिमुख्यकमलावितारकाङ्घ्रिस्मृतिं
हृदि कलयामि यादवकुलप्रजातकायं हरिम् ।।१।।

विजितमनोभवादिनिखिलान्तरारिलभ्येक्षणं
प्रणतजनप्रमोदजलधिक्षपेश्वरानुग्रहम् ।
इहपरसौख्यसाधनकलाकदम्बविश्राणकं
हृदि निदधामि यादवकुलप्रजातकायं हरिम् ॥२॥

प्रणतजनालिवाञ्छितवरप्रदानदीक्षाधरं
द्रुतमखिलर्द्धिदानमुखव्रतालिचेतोहरम् ।
निखिलनिलिम्पकाङ्क्षितपदाग्रपुजन्मधूलीलवं
हृदि कलये यदूत्तमकुलप्रजातकायं हरिम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिमितिहीनभूतिनिचयप्रदानशक्तिप्रदं
गिरिशविरिञ्चिविघ्नपग्रहप्रमुख्यदेवार्चितम् ।
अतुलकृपासुधाजनिधरास्वहृत्पयःसम्भवं
हृदि निदधे यदूत्तमकुलप्र जातकायं हरिम् ।।४।।

कृतनिटिलाक्षनीरजजनुर्मुखप्रसादोत्करं
निजचरणापदानसततप्रगायकस्वःस्त्रियम् ।
स्मितहृतचन्द्रकोटिसकलाभिमानहासाननं
हृदि कलयामि यादवकुलप्रजातकायं हरिम् ।।५।।

कणभुगहीन्द्रगौतममुखाखिलोक्तशास्त्रप्रदं
प्रसभविधूतबिम्बनिविडाभिमाननैजाम्बरम् ।
इहपरलोकमङ्गलततिप्रदायिपादस्मृतिं
हृदि निदधे यदूत्तमकुलप्रजातकायं हरिम् ।।६।।

विषयपराङ्मुखस्वधिषणेन्द्रियादियोगीश्वरै-
र्बहुविधमन्त्रमुख्यकरणव्रजाप्यपादाम्बुजम् ।
निजतनुदिव्यकान्तिविजिताभिनूत्नकीलालदं
हृदि निदधामि यादवकुलप्रजातकायं हरिम् ।।७।।

निरुपमलावणीजनिमहीस्वकीयवर्ष्माशयं
प्रणतजनेप्सिताखिलशुभप्रदानदीक्षाधृतम् ।
श्रुतिततयो मुहुःप्रणवकं भणन्ति यस्याभिधां
हृदि कलये यदूत्तमकुलप्रसूतमूर्त्तिं हरिम् ।।८।।

●

श्रीगोपालस्तवः

[पृथ्वी]

मनोविजयदो जितेन्द्रियमनोव्रजाप्याङ्घ्रिकं
सुरव्रजनुतो जनुर्मृतिजरारुगादिच्छिदम् ।
धनाधिपसुरार्यजिद्धनवचोवितारिस्मृतिं
समस्तजगतीगुरुं हृदि भजामि गोपालकम् ।।१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उमादिकलितं नमज्जनसमस्तपापापहं
गजप्रभृतिदं परापररहस्यबोधप्रदम् ।
मनोज्ञवपुषं महामुनिततीऽडितस्वाङ्घ्रिकं
फणीन्द्रविनुतं सदा हृदि भजामि गोपालकम् ॥२॥

अघव्रजसहं भजत्प्रमदवार्धिनक्षत्रपं
सुतीक्ष्णमतिदं महीसुतलमुख्यविश्वावनम् ।
ज्वरादिहरणं पदश्रितसमस्तदुर्धीहरं
नृपत्वदपदस्मृतिं हृदि भजामि गोपालकम् ॥३॥

श्रीरघुनायकस्तवः

[प्रमदाननम्]

अजिताक्षदुर्लभवीक्षणं विजितेन्द्रियाप्यपदाम्बुजं
त्रिदिवालयिव्रवन्दितं प्रणमज्जरापमृतापहम् ।
पदभक्तगीर्धनधूतजीवधनाधिपाखिलडम्बरं
करुणारसार्णवमानसं कलये सदा रघुनायकम् ॥१॥

जनकात्मजाहृदयेश्वरं करिवाजिमुख्यरमाप्रदं
नतपातपूगनिबर्हणं फणिराण्णवाकृतिपूर्वजम् ।
तनुकान्तिधूतनवाम्बुदं शुकवामलूरुमुखेडितं
परमात्मसञ्ज्ञकपूरुषं कलये सदा रघुनायकम् ॥२॥

श्रितकामिताखिलवस्तुदं पुरुषार्थपूगदचिन्तनं
शमनादिसर्वभयापहं नतहृत्प्रकाशिततत्त्वकम् ।
नरपालतादिवरप्रदं निजशासनस्थजगत्त्रयं
ज्वरमुख्यरोगनिवारकं कलये सदा रघुनायकम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरशत्रुपूगकृतान्तकं करभास्वदूर्जितकार्मुकं
यतमारुताशयचिन्तितं गिरिशानिशेडितवैभवम् ।
शमदान्तिमुख्यगुणप्रदं प्रणताखिलश्रमकृन्तनं
दुरितक्षमावरुणालयं कलये सदा रघुनायकम् ॥४॥

•

श्रीरघूत्तमस्तोत्रम्

[हरिणी]

निजपदवनोद्भूतद्वन्द्वप्रणम्रजनावली-
हृदयकलिताशेषाभीष्टव्रजप्रदकल्पकम् ।
अगणितमहाकष्टग्राहव्रजाढ्यभवाम्बुधि-
प्रपतितनमद्व्रातोत्तारं रघूत्तममाश्रये ॥१॥

नलिननिखिलाहङ्कारच्छिन्निजद्युतिभासुर-
स्वकरविधृतज्ञानाभीष्टप्रदायकमुद्रिकम् ।
गगनजनिभुक्कीलालस्पृङ्मधुव्रतकज्जल-
प्रमुखसकलन्यक्कृत्केशं रघूत्तममाश्रये ॥२॥

सदनगृहिणीपुत्रस्वर्णस्वतत्त्वविबोधन-
प्रभृतिवरदस्वीयाङ्घ्र्यम्भःप्रजातरजःकणम् ।
निजधृतपटोद्धूताशेषाभिमानशरज्जल-
प्रदजलधिभूगीर्वाणेभं रघूत्तममाश्रये ॥३॥

धरणिधरणीजामात्रम्भःप्रजातसमुद्भव-
स्वरधिपमुखैर्नम्यस्वपादपयोजनिम् ।
जनकनरराट्सौभाग्याप्तक्षमातनुसम्भवा-
कृतिधरमहालक्ष्मीकाम्यं रघूत्तममाश्रये ॥४॥

रजतगिरिराड्वल्मीकोत्थाञ्जनातनुसम्भव-
स्वतनुतुलसीदासाद्युक्तापदानकणाङ्घ्रिकम् ।
चरणशरणप्राप्तप्राणिश्रितेप्सितसंस्पृशि-
व्रतमुखगुणोत्तंसैः रम्यं रघूत्तममाश्रये ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमितकरुणापीयूषाम्भोनिधिस्वहृदम्बुज-
प्रभवलहरीभ्राजल्लीलातुषारकणैर्भृशम् ।
सपदि विहितस्वाङ्घ्र्यम्भोजप्रणम्रकृतान्तभी-
प्रमुखनिखिलक्लेशध्वंसं रघूत्तममाश्रये ॥६॥

परमपुरुषश्रेष्ठाकारानुयोक्तृसतीं प्रति
प्रमुदितहृदा श्यामग्रीवप्रकीर्त्तितवैभवम् ।
अनिशचरणाम्भोजस्तोत्रप्रसक्तमरुत्प्रभू-
दशमुखसहोद्भूतर्क्षेशं रघूत्तममाश्रये ॥७॥

स्वचरणजलोद्भूतद्वन्द्वप्रणामरताशय-
व्रजकृतमहापापव्रातप्रमार्जनतत्परम् ।
विनतविनतावर्ष्मोद्भूतप्रहापितशक्रजित्-
प्रहितभुजगाकारास्त्रालिं रघूत्तममाश्रये ॥८॥

निजकरलसत्कोदण्डेषुप्रमुख्यमहायुध-
व्रजकृतरिपुव्रातप्राणप्रयाणमहोत्सवम् ।
श्रुतिततिशिरःप्रोक्तज्ञानप्रदानसमुद्धृता-
निलसुतमुखप्राणम्रालिं रघूत्तममाश्रये ॥९॥

अतुलशुचिताभक्तिश्रद्धाविशिष्टहृदम्बुभू-
भरितकलितस्वाङ्घ्र्यम्भोभूपवित्रितपादुकम् ।
विजितकमलोद्भूतस्वाक्ष्युल्लसत्करुणासुधा-
प्रशमितनतक्लेशव्रातं रघूत्तममाश्रये ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरतिस्तुतिः

[सुरभिः]

निजसन्नतनिकरेष्टदसुरभूमिजहृदयां
भवसाध्वसमुखभञ्जकचरणामृतजनुषम् ।
भ्रमराम्बुदभुजगद्युतिकबरीभररुचिरां
कलये हृदि सुमपञ्चकनिजकार्मुकरमणीम् ॥१॥

निजभास्वरकरह्रापितसरसीरुडभिमतिं
शरदम्बुदनिभनिर्मलवसनावृतवपुषम् ।
प्रतिपादितचरणाम्बुजरतकाङ्क्षितनिचयां
कलये हृदि सुमपञ्चकनिजकार्मुकरमणीम् ॥२॥

अमृताशनललनामणिततिसेवितचरणां
निखिलावनिजनकामितपदनुग्रहकणिकाम् ।
स्मृतपादुकजनतोद्धतिहृदयङ्गमचरितां
कलये हृदि सुमपञ्चकनिजकार्मुकरमणीम् ॥३॥

सरसीरुहवदनाम्बुजदृशितोषणनिपुणां
विहितानतभवमोचितशरणागतविततिम् ।
प्रणतार्तिहृकरुणामृतरसपूरितनयनां
कलये हृदि सुमपञ्चकनिजकार्मुकरमणीम् ॥४॥

त्रिदिवालयतरुणीमणिगणसंस्तुतचरणां
कुशिकोद्भवमुखमौनिर्पविदितप्रियविभवाम् ।
नतकाङ्क्षितकनकादिभवरदापननिपुणां
कलये हृदि सुभपञ्चकनिजकार्मुकरमणीम् ॥५॥

कनकच्छविपरिहासकतनुदीपितलसितां
बहुदुःखदभवसागरवडवामुखनमनाम् ।
कनकावनिधरधिक्कृलिचणवक्षसिजनुषं
कलये हृदि सुमपञ्चकनिजकार्मुकरमणीम् ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वनधारकपवनाशननिभमेचकचिकुरां
विनतावलिविहिताखिलदुरितव्रजदहनाम् ।
विनतातनुजनुर्रचितपदपङ्कजयुगलीं
कलये हृदि सुभपञ्चकनिजकामुंकरमणीम् ॥७॥

ललितावरहापितविधवात्वजकलिलां
परितोषितमतिभीमकतनुजां यदुरमणाम् ।
रिपुशम्बरकृतमायिकरणमोचितरमणां
कलये हृदि सुभपञ्चकनिजकामुंकरमणीम् ॥८॥

चरणामृतजनियुग्मकनमदिष्टदधिषणां
पदसेवनरतमानसजनकष्टहृकरुणाम् ।
पठतामिदमनिशं निजचरणाष्टकमचिरात्
कलयिष्यति कलिनाशकविभवाष्टकमखिलम् ॥९॥

श्रीरमाकमलालयास्तोत्रम्

[अनुष्टुभ्]

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥१॥

विष्णुपत्नि महामाये महापुरुषलक्षणे ।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥२॥

कटिसूत्रब्रह्मसूत्रकिरीटकटकाङ्गदैः ।
हारनूपुरमुद्राद्यै राजमानां भजे रमाम् ॥३॥

कम्बुकण्ठीं निम्ननाभिं त्रिवलीपल्लवोदराम् ।
अब्धिजातां भजे लक्ष्मीं सुकपोलारुणाधराम् ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कौशेयाम्बरयुग्मेन परिवीतां सुमङ्गलाम् ।
अब्धिजातां भजे लक्ष्मीं तप्तहाटकवर्चसम् ॥५॥

चारुजानुयुगीं चारु-जङ्घायुगलसंयुताम् ।
चारुप्रसन्नवदनां चारुहासां भजे रमाम् ॥६॥

दिग्गिभैः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः ।
अभिषिक्तां भजे देवीं श्रियं पद्मकरां सतीम् ॥७॥

यया विलोकिता देवाः सप्रजापतयः प्रजाः ।
शीलादिगुणसम्पन्ना निर्वृत्तुः कलये रमाम् ॥ ८ ॥

यया चोपेक्षिता दैत्या निरुद्योगा गतत्रपाः ।
निःसत्त्वा लोलुपा आसन् वन्दे श्रीकमलालयाम् ॥९॥

तुङ्गगुल्फारुणनखव्रातदीधितिसंवृताम्॥
सुचारुसुन्दरग्रीवां वन्दे श्रीकमलालयाम् ॥१०॥

द्युमत्किरीटकटककटिसूत्राङ्गदान्विताम् ।
नूपुरैर्विलसत्पादां वन्दे श्रीकमलालयाम् ॥११॥

नवयौवननिर्वृत्तस्तनभारकृशोदरीम् ।
सर्वाङ्गसुन्दरीं हृद्यां वन्दे श्रीकमलालयाम् ॥१२॥

पुण्डरीकाभिरामाक्षीं नीलकुन्तलमण्डिताम् ।
प्रेक्षणीयां प्रसन्नास्यां वन्दे श्रीकमलालयाम् ॥१३॥

बिभ्रतीं केशभारेण मालामुत्फुल्लमल्लिकाम् ।
हेमाम्बरां पद्महस्तां वन्दे श्रीकमलालयाम् ॥१४॥

बृहत्कटितटश्रोणीकरभोरुद्वयाञ्चिताम् ।
प्रसादश्रीविशालाक्षीं वन्दे श्रीकमलालयाम् ॥१५॥

शङ्खचक्रगदापद्मरत्नमालाविभूषिताम् ।
सुभ्रून्नसां चारुकर्णीं वन्दे श्रीकमलालयाम् ॥१६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समानकर्णविन्यस्तस्फुरन्मकरकुण्डलाम् ।
समां प्रशान्तां सुमुखीं वन्दे श्रीकमलालयाम् ॥१७॥

सुमहार्हमणिव्रातकिरीटकटकाङ्गदाम् ।
समां प्रशान्तां सुमखीं वन्दे श्रीकमलालयाम् ॥१८॥

श्रीरमाधवनवरत्नमालास्तुतिः

[हरिणी]

अखिलभुवनव्रातावासिप्रजोद्धृतिकारकं
प्रणतविततेराशापूगव्रजद्रुतपूरकम् ।
अमितकरुणापारावारस्वकीयहृदम्बुजं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥१॥

रथगजमुखाशेषश्रीयुङ्महीश्वरताप्रदं
जलनिधिजनुर्वर्ष्मोत्तंसाहृदम्बुजभास्करम् ।
प्रणतजनताहर्षाम्भोधिक्षपेश्वरसन्ततिं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥२॥

जितनिजमनःप्राणाक्षादिद्रुताप्यपदाम्बुजम्
उरगनिकरक्षोणीपालस्वतल्पमचर्चिकम् (मतल्लिकम्) ।
उडुपनिचयाशेषाहङ्कृत्यरातिनिजस्मितं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥३॥

अशुभततिकृन्मूलाविद्यानिकृन्तकसंस्मृतिं
प्रणतजनतासर्वाभीष्टप्रदाननिजव्रतम् ।
दिविजमुकुटभ्राजद्रत्नप्रभालिलसत्पदं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गगनजमनोवेगस्पृष्टाखिलानतभूतिदं
सरसिजजनिश्रीदुर्गादिस्तुतस्वपदाम्बुजम् ।
वरुणनिलयप्रोत्थागाढोपगूढकलेवरं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥५॥

सपदि विहितानम्राभीष्टाधिकर्द्धिवितारणं
निरवधिकृपाजन्मक्षोणीमनोज्ञनिजाशयम् ।
नतनिटिलदुर्लेखव्रातप्रमार्जनपण्डितं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥६॥

त्रिदशललनाव्रातोद्गीतापदानविशिष्टतं
कणभुगहिराण्मुख्यप्रोक्ताखिलार्थततिप्रदम् ।
भ्रमरजलधृद्भोगिच्छायस्वकीयवपुर्वरं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥७॥

श्रुतिनिगदिताशेषार्णर्थोल्लसत्प्रणवाकृतिं
प्रणवमुखरोपायावाप्यस्वपादवनोद्भवम् ।
विषयविमुखस्वान्तान्ताक्षालीस्तुतस्वपदाम्बुजं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥८॥

पुरुनिजरुचा बिम्बन्यक्कृद्रदच्छदभूषितं
भुवि च दिविचाशेषानन्दप्रदानपटुस्मृतिम् ।
अखिलशुभदानिष्टालीघ्नस्वपादरजःकणं
हृदयकमले वन्देऽजस्रं रमाधवमच्युतम् ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरमाधवस्तोत्रम्

[चण्डिका]

भवमुख्यसाध्वससमष्टि (समूह)-
हरणनिपुणं रमाधवम् ।
चित्तसरसिभवे कलये
पदपङ्कजानतनिलिम्पपादपम् ॥१॥
विविधार्त्तिखिन्न (अनुभूतकष्ट) पदनम्र-
करुणहृदयं रमापतिम् ।
पद्मजगिरिशमुख्यनुतं
कलये कृतान्तमुखभीहरस्मृतिम् ॥२॥
शुकनारदादिमुनिगीत-
चरणमहिमानमीश्वरम् ।
स्वर्णमुखसकलेप्सितदं
कलये सुपर्वललनासमर्चितम् ॥३॥
विनतेष्टदातृ भव (य) हन्तृ-
चरणनमनं रमाधवम् ।
शीतकरशिशिरस्वहृदं
कलये कणादमुखशास्त्रबोधदम् ॥४॥

श्रीरमेशगिरीश्वरस्तोत्रम्

कारुण्याब्धी रथगजतुरङ्गमादिवितारकौ
नीरागाप्यौ द्रुहिणकलितौ नवाभ्रहिमप्रभौ ।
देवालीड्यौ कुमतिहरणौ समस्तकलाधिपौ
वन्दे घस्राधिपशशिदृशौ रमेशगिरीश्वरौ ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भूत्यालिदौ प्रमदददपदौ परापरबोधदौ
पाथोजाङ्घ्री स्थिरकुशलदौ कृपामृतनीरधी ।
प्राणभ्राघप्रशमनसुखस्पर्शं प्रियचेतसौ
वन्दे घस्राधिपशशिदृशौ रमेशगिरीश्वरौ ॥२॥

●

श्रीरविप्रमुखनवखेटस्तवः

[दोधकम्]

भक्तसुरावनिजान् भवहर्तॄन्
भृङ्गपयोदकचाञ् छोणकरान् [न् करशोणान्]
शारदमेघपटान् वरदातॄन्
नौमि रवीन्दुमुखान्नव खेटान् ॥१॥

श्राणितकाम्यततीन् सुरनम्यान्
भास्वररम्यगुणान् कृतभव्यान् ।
कृत्तकृतान्तभयान् कृपयाढ्यान्
नौमि रवीन्दुमुखान्नव खेटान् ॥२॥

सन्नतपापहरान् धनदातॄन्
दीनकृपाजलधीन् भयहर्तॄन् ।
शोणनिजाङ्घ्रियुगोजितपद्मान्
नौमि रवीन्दुमुखान्नव खेटान् ॥३॥

आनतमङ्गलदान् मरणघ्नाञ्
छौनकमुख्यनुतान् वनजाक्षान् ।
संसृतिशोकहरान् घनकेशान्
नौमि रवीन्दुमुखान्नव खेटान् ॥४॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधिकायदुकुलावतंसस्तोत्रम्

[पृथ्वी]

मनोभवमुखार्चितौ त्रिभुवनेश्वरीनायकौ
प्रणम्रसकलेष्टदौ नतकृपाजनुर्भूहृदौ ।
परस्पररताशयौ रथगजादिसम्पत्प्रदौ
दधामि हृदि राधिकायदुकुलावतंसौ सदा ॥१॥

मुदम्बुधिसुधाकरौ विजितमानसाप्याङ्घ्रिकौ
भुजङ्गपतिसंस्तुतौ सरससर्वविद्याधिपौ ।
वितीर्णनतवाञ्छितौ विधुकलाधराद्यादृतौ
दधामि हृदि राधिकायदुकुलावतंसौ सदा ॥२॥

अशेषभवभूतिदौ गिरिजवर्ष्मभामाग्रजौ
प्रणम्रसकर्द्धिदौ सुरसमूहसम्भावितौ ।
सरोजजमुखेडितौ षडरितूर्णविध्वंसकौ
दधामि हृदि राधिकायदुकुलावतंसौ सदा ॥३॥

दृगाढ्यनिटिलेडितौ प्रणतकारुणीसागरौ
मनोज्ञतनुलावणीदिविभवाङ्गनासंस्तुतौ ।
कणादमुखशास्त्रदौ दृणिरचित्त्वशीताशयौ
दधामि हृदि राधिकायदुकुलावतंसौ सदा ॥४॥

इहोपरि सुखप्रदौ रुचिजिताशुबिम्बाधरौ
सदा प्रणवसत्कपौ प्रणवनैजनामाकृती ।
सुवर्णजलधृच्छवी विषयपाशहीनप्रियौ
दधामि हृदि राधिकायदुकुलावतंसौ सदा ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराधिकाप्राणकान्तस्तवः

[मालिनी]

चरणशरणगानामादितेयावनीजो
जननमरणमुख्याशेषभीतिप्रभेत्ता ।
भ्रभरभुजगमेघश्यामलच्छायवर्ष्मा
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥१॥

निजकरयुगलश्रीर्ह्रीपिताम्बुप्रजातः
कनकसकलदर्पोच्छेदकस्वीयवासाः ।
विनतविततिकाम्याशेषवस्तुप्रदाता
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥२॥

अखिलभुवनमातुःकाम्यलावण्यमूर्त्ति-
र्निखिलदिविजजालैर्नम्यपादारविन्दः ।
निरुपमगुणारत्नै रम्यनैजान्तरङ्गो
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥३॥

अहितसदसिकृष्णामानरक्षाप्रकीर्त्तिः
सदयहृदयकृत्तानम्रमृत्यादिभीतिः ।
अनिशविहितकृत्स्नप्राणिरक्षःकृपाब्धि-
र्जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥४॥

अमरनगरनारीपाणिपद्मार्चिताङ्घ्रिः
शुकमुखमुनिभूभृद्गीतनैजापदानः ।
कनकनिकरमुख्यश्राणकस्वीयचित्तो
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥५॥

निजचरणरतानां मङ्क्षु सर्वेष्टदाता
निरवधिभववार्धेः पारदातातितूर्णम् ।
निजचिकुरविलासैर्नीरदाहङ्कृतिघ्नो
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदयुगविनतानां सर्वपापापनेता
पदनतविनताभूरूपधृद्वेदयानः ।
शिखरिसदृगुरोभूदाररत्नोपगूढो
जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥७॥

अभयवररथाङ्गाम्भोजधृत्पाणिपद्मो
नयनपदकणादादीडितस्वाङ्घ्रिपद्मः ।
स्मितजितहरिणाङ्कव्रातदर्पाननश्री-
र्जयतु जयतु कृष्णो राधिकाप्राणकान्तः ॥८॥

चरणकमलनम्राखण्डिताभीष्टदाता
सपदि निजकटाक्षोच्छिन्नतत्कष्टजालः ।
निजचरणसरोजस्तोत्ररूपाष्टकस्य
श्रवणजनिततुष्टःश्राणयेदष्टसिद्धीः ॥९॥

श्रीरामकृष्णस्तवः

[शार्दूलविक्रीडितम्]

काम्याप्यान्यपदौ निरस्तधिषणामालिन्यलभ्याङ्घ्रिकौ
गीर्वाणालिनुतौ भजज्जनजरादुष्पञ्चतावारकौ ।
नम्रालीधनगीर्विधूतधनराड्देवावलीदेशिकौ
कारुण्याम्बुनिधी भजामि सततं श्रीरामकृष्णौ मुदा ॥१॥

श्रीदुर्गासहजौ करीन्द्रपूतनाकोशप्रमुख्यस्पृशौ
नम्राघाहिविपौ भुजङ्गपतितत्तल्पाभिनव्याकृती ।
इन्द्वम्भोजरुची पराशरतनूजातात्मजातेडितौ
सर्वज्ञप्रणतौ भजामि सततं श्रीरामकृष्णौ मुदा ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तेष्टव्रजदौ समस्तपुरुषार्थालिविश्राणकौ
पाथोजातदृशौ प्रणम्रहृदयप्रोद्दीपितात्मप्रभौ ।
क्षोणीभारहरौ पयोधिरशनामुख्यत्रिलोकाधिपा-
वाधिव्याधिहरौ भजामि सततं श्रीरामकृष्णौ मुदा ॥३॥

योगिव्रातनुतौ पयोजनिजनुर्गौरीशमुख्येडितौ
शान्तिस्पृङ्नमनौ भवोत्थसकलश्रान्त्यावलीध्वंसकौ ।
भूपीभूतनतौ प्रभूतकृपया सोढानतांहस्तनौ
भीतिव्रातहरौ भजामि सततं श्रीरामकृष्णौ मुदा ॥४॥

श्रीरामस्तोत्रम्

[सुवदना]

रागाढ्यस्वान्तदूरस्वचरणकमलं वैराग्यसुलभं
स्वश्रीवाणीविधूतत्रिदशपतिसुराचार्यीकृतनतम् ।
पादाम्भोजानताघव्रजशमननतिं नागाभचिकुरं
वाक्स्वान्तातीतपूर्णाक्षरपररमणं रामं हृदि भजे ॥१॥

काम्यालीकामिनम्रव्रजवरदपदं धर्मार्थमुखदं
फुल्लाम्भोजादिपूज्यस्वपदसलिलजं ज्ञानस्पृशिपरम् ।
धूतस्वर्णाब्जगर्भस्वरुचिपटवृतं वायूद्भवनुतं
वार्धक्यव्याधिपूगप्रशमननिपुणं रामं हृदि भजे ॥२॥

सर्वक्षोणीपतित्वप्रमुखदनमनं शास्तारमखिल-
ब्रह्माण्डव्रात....... .... ।
संसारोत्थश्रमालीहरपदरजसं क्षान्ताघनिकरं
स्वापाङ्गोन्मूलिताङ्घ्रिप्रणतयमभयं रामं हृदि भजे ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरासलीला

गोपीं गोपीमन्तरा श्रीयदुकुलमणिर्मायियैको विराजन्
मूर्त्तिं मूर्त्तिं चान्तरैवं निजविहृतिकृते स्वीकृतां गोपिकैकाम् ।
इत्थं क्रीडां रासगोष्ठयां शशिकरविलसद्यामिनीषु व्यधत्त
योऽयं पूर्णावतारो दितिदनुजरिपोर्भूरये स्ताद्विभूत्यै ॥१॥

•

श्रीराहुस्तवः

[मेघविस्फूर्जिता]

विराग्याप्यस्वाङ्घ्रिं ग्रहनिकरगं रागवच्चित्तदूरं
भजच्छ्रीगीर्धूतामरपतिगुरुं वार्धकीदुर्मृतिघ्नम् ।
गिरीशाङ्घ्र्यासक्तं द्विरदमुखदं कारुणीनीरराशिं
भजे सिंहीवर्ष्मप्रभववपुषं भक्तिमत्पापनाशम् ॥१॥

षडङ्घ्रिच्छायाङ्गं मुनिगणनुतं भोगिशीर्षस्वरूपं
समस्तेष्टालीदं सकलसुखदं शाश्वतामोददाङ्घ्रिम् ।
वितीर्णात्मज्ञानं नृपतिपददं पुष्पपूगार्च्यपादं
भजे सिंहीवर्ष्मप्रभववपुषं विश्वचक्षुर्द्विषन्तम् ॥२॥

सुरारिक्षोणीशं नतभयहरं नाशितानम्ररोगं
सुपर्वाध्वस्वौकोनिकरगणितं योगिपूगस्तुताङ्घ्रिम् ।
प्रणम्रायासघ्नं भजदघसहं शान्तिदान्त्यादिदाङ्घ्रिं
भजे सिंहीवर्ष्मप्रभववपुषं योगसंसिद्धिदार्चम् ॥३॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीराहुकेतुस्तवः

[द्रुतगतिः]

मनसिजमुखजिज्जनमुदितमति-
तदितरविमुखजयफणिदलयुक् ॥१॥

नतविततिजराकुमरणमुखहृत्
प्रकलितनतरां जय फणिदलयुक् ॥२॥

धनमतिविजितामरपतिगुरुता
यदनिशनतितो जय फणिदलयुक् ॥३॥

धरधवतनयापतिपदनिरत
सकरुणहृदय जय फणिदलयुक् ॥४॥

कृतनतिवृजिनव्रजशमनपटु-
गजमुखवरद जय फणिदलयुक् ॥५॥

तनुरुचिविजितामृतधररजनी
विषनिकरपते जय फणिदलयुक् ॥६॥

भवरतिशिथिलीकृतिपटुचरण
भवसुखदपद जय फणिदलयुक् ॥७॥

नतजनहृदयस्थसकलवरद
धृतिनिधिहृदय जय फणिदलयुक् ॥८॥

हृतनतजननक्षयभयमुखभी
मुदुदधिरजनीट् जय फणिदलयुक् ॥९॥

अमृतपततिगग्रहणविलसत्-
नरपतिविनत जय फणिदलयुक् ॥१०॥

सुररिपुनिचयस्तुतपदवनज
ज्वरमुखशमन जय फांणदलयुक् ॥११॥

भयहर वरदोज्ज्वरकरकमल
हृतमतिविकृति [ते] जय फणिदलयुक् ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतहरिरथपप्रहरणसहन ।
भुजबलरुचिर जय फणिदलयुक् ॥ ॥ १३ ॥

श्रमहृतिनिपुण स्वचरणनमन ।
यमशममुखद जय फणिदलयुक् ॥ १४ ॥

जगदसुशमन प्रमुखजभयहृत ।
नमदघसहन जय फणिदलयुक् ॥ १५ ॥

●

श्रीराहुकेतुस्तवः

(हंसमाला)

दैत्यजात्युद्भवौ खेटमध्यस्थितौ ।
भानुचन्द्राहितौ राहुकेतू भजे ॥ १ ॥

कृष्णकृत्ताकृतौ पन्नगस्वाकृतौ ।
शीर्षपुच्छाकृती राहुकेतू भजे ॥ २ ॥

सिंहिकासम्भवौ विप्रचित्यात्मजौ ।
मानशूरौ सदा राहुकेतू भजे ॥ ३ ॥

वैषविद्येश्वरौ तिर्यगावर्तिनौ ।
दत्तनम्रेप्सितौ राहुकेतू भजे ॥ ४ ॥

●

श्रीरुक्मिणीभामास्तुतिः

(शालिनी)

रागादिस्वान्तमालिन्यहेतु-
श्रेणीदुष्टस्वीयधीदुर्लभाङ्घ्री ।
वैराग्याढ्यस्वाशयाप्यस्वपादे
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शक्राधि [धी] ताम्भोधिनाथाहरीश
शीतांश्वादिस्वर्गिपूगार्चिताङ्घ्री ।
नम्रालीनां जारठीदुर्मृतिघ्न्यौ
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ २ ॥

दारिद्र्याम्भोराशिमग्नातिमन्द-
बुद्धिभ्योऽपिस्त्वर्गिराड्जीवजो-तवम् [तत्त्वम्]
मार्गीभ्यां यत्पादचिन्ता प्रदत्ते
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ३ ॥

भूयः कष्टक्लेशितस्वान्तरङ्ग-
दीनानम्रव्रातकारुण्यवार्धी ।
क्ष्माधृत्कन्यापूर्वसञ्जातकान्ते
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ४ ॥

कुम्भीन्द्रेभक्षोणिधृच्छातकुम्भ-
कुम्भन्यक्कृत्स्वोरसीजातकुम्भे ।
पापारण्यप्लोषिदावाश्रयाशी
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ५ ॥

विश्वप्राणप्रोद्भवाशक्षमाभृद्-
भोगासीनप्रेयसीयुग्मरूपे ।
स्वर्णाम्भोभूगर्भधिक्कृत्स्ववर्णे
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ६ ॥

वीणापाणिद्वीपजातात्मजात-
मुख्यर्षीन्द्रोद्गीतनैजापसाने ।
आनन्दस्पृङ्नामवर्णप्रजापे
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ७ ॥

वायुस्वान्तह्लेपिवेगं वितीर्ण-
कामाल्यर्द्धिस्त्वाङ्घ्रिनम्राखिलेष्टे ।
घर्माद्यर्थव्रातसंस्पर्शसक्ते
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्ताज्ञानग्रन्थिविस्फोटनैक-
प्रीतस्वीयस्वान्तपाथःप्रजाते ।
तत्त्वज्ञानश्राणनासक्तचित्ते
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ९ ॥

कीलालालीमेखलामुख्यसर्व-
लोकव्राताधीशहृत्पद्मभानू ।
लक्ष्मीधात्र्यौ स्पृष्टधात्रीपतित्वे
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १० ॥

भक्ताशेषाभीष्टसंस्पर्शसर्व-
भीतिश्रोणीकृन्तनाढ्यस्वपाणी ।
स्वीयापाङ्गोन्मूलिताशेषम्र [नम्रदुःखे]
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ ११ ॥

हृन्मालिन्यव्रातहृत्स्वीयपाद-
पाथोजातध्यानसक्ताक्षजिष्णू ।
नम्रालीदुर्बुद्धि [?] वृत्तीभसिंहौ
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १२ ॥

श्रीवाग्देवीवल्लभाद्रीन्द्रजाता-
प्राणप्रेष्ठस्वर्गवासीन्द्रमुख्यैः ।
मोदोद्रेकस्तूयमानापदाने
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १३ ॥

शान्तिश्रद्धाक्षान्तिदान्तिप्रमुख्य-
सम्पत्स्पर्शप्रौढपादाब्जसेवे ।
नम्रायासध्वंसकस्वीयवीक्षे
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १४ ॥

सर्वापत्तिव्राततस्त्राणकर्तृ-
स्वाङ्घ्र्याजद्योगसिद्धिप्रदात्र्यौ ।
क्षान्ताशेषस्वीयमन्त्वङ्घ्रिनम्रौ [म्रे]
वन्दे श्रीमद्रुक्मिणीसत्यभामे ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरुक्मिणीप्राणकान्तस्तोत्रम्

[स्रग्धरा]

स्वीयाङ्घ्र्यम्भोजधूलीलवनिरतमनःसङ्घसर्वेप्सितार्थ-
व्रातस्पर्शव्रताढ्यत्रिदिवधरणिभूभूयविभ्रत्कटाक्षः ।
भूयाद् भूयो विभूत्यै पदनतजनताजन्ममृत्यादिभीति-
प्राग्भारव्यालजालद्विजकुलनृपती रुक्मिणीप्राणकान्तः ॥ १ ॥

पीयूषाशिद्विडालीभयददरगदास्यन्दाङ्ग प्रमुख्य-
स्वप्रख्यातायुधालीलसितनिजकराम्भोभवद्वन्द्वयुग्मः ।
भूयाद् भूयैं विभूत्यै जनितमधुकरव्योमभूभुक्तमिस्रा-
कीलालश्राणकादिभ्रमततिचिकुरो रुक्मिणीप्राणकान्तः ॥ २ ॥

स्वर्णन्यक्कृत्सुवर्णोज्ज्वलनिजवसनावेष्टिताम्भोजधिक्कृत्-
कान्तिस्वीयाङ्गराजद्विविधवहुमहारत्नसौवर्णभूषः ।
भूयाद् भूयैं विभूत्यै विधुधरतनयाराजदुत्सङ्गनाकेण्-
मुख्यामर्त्यालिनम्यस्वपदवनजनी रुक्मिणीप्राणकान्तः ॥ ३ ॥

वैदर्भीसत्यभामादिनपतितनुजाजाम्बवद्वर्ष्मजाता-
मुख्यस्त्रीरत्नकाम्यस्वनिरुपमतनूद्भासिलावण्यसिन्धुः ।
भूयाद् भूयैं विभूत्यै चरणसलिलभूभक्तसङ्घातकाङ्क्षा-
पात्रीभूताखिलार्थस्पृशिमुदितमना रुक्मिणीप्राणकान्तः ॥ ४ ॥

लावण्याढ्याङ्गवल्लीनवनवविषयग्राहकोन्मेषभाग्धी-
कारुण्योद्रेकरम्यस्वहृदयकमलप्रोद्भवाद्यैर्मनोज्ञः ।
भूयाद् भूयैं विभूत्यै द्विचरणपशुदुःशासनाकृष्टकेश-
ध्यातस्वीयाङ्घ्रिकृष्णावनविमलयशा रुक्मिणीप्राणकान्तः ॥ ५ ॥

मत्स्याकूपारपोत्रप्रमुखबहुविधस्वावतारावलीभि-
र्लोकोद्धारक्रियार्थं विरचितरुचिरस्वीयलीलाविहारः ।
भूयाद् भूयैं विभूत्यै वृकजठरमहापाशहस्तालिकृष्ट-
स्वीयाङ्घ्र्यम्भोजनम्राखिलभयशमनो रुक्मिणीप्राणकान्तः ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाग्देवीवारिराशिप्रभवतनुधराधारिवर्ष्मप्रजाता-
पौलोमीमेनकादित्रिदिवजललनागीतपादापदानः ।
भूयाद् भूयैँ विभूत्यै स्वचरणशरणप्राप्तदीनावलीनां
कारुण्याम्भोधिलीलाधरनिजहृदयो रुक्मिणीप्राणकान्तः ॥ ७ ॥

पाथोजातप्रजाताविधिनिधिनिटिलोत्सङ्गसञ्जातकाय-
स्वर्णाङ्गच्छायसाध्वीसुतगृहकनकस्वार्गसौभाग्यजातः ।
ब्रह्मज्ञानाप्यमोक्षप्रमुखवरततिश्राणकापाङ्गपातो
व्यासोद्भूशौनकादिस्तुतपदकमलो रुक्मिणीप्राणकान्तः ॥ ८ ॥

अङ्गोत्थक्रोधलोभप्रमुखभयदषड्द्रोहसम्पूर्णताभाक्-
संसाराख्याम्बुराशिप्रपतितनतिकृत्पारदानव्रताढ्यः ।
भूयाद् भूयैँ विभूत्यै सविनयविनतव्रातभूयो भवांहः
पारम्पर्याक्तीभव्रजहरिनमनो रुक्मिणीप्राणकान्तः ॥ ९ ॥

क्षोणीभारायमाणक्षितिपतिपदवींलिङ्गदस्युव्रजानां
निःशेषोच्छेदनार्थं नवतनुविनतावर्ष्मसञ्जातयानः ।
भूयाद् भूयैँ विभूत्यै सुजनवरततिश्राणकाभीतिमुद्रा-
स्पष्टीभूतप्रवृत्तिस्वतनुमतिमना रुक्मिणीप्राणकान्तः ॥ १० ॥

दृक्पादाब्भूकणादप्रथममनुसुतावर्ष्मसञ्जातनागेड्-
जैमिन्यादिप्रणीताखिलनयनिकरज्ञानदस्वप्रसादः ।
भूयाद् भूयैँ विभूत्यै विजितहरिणदृक्सुन्दरीशीर्षरत्न-
व्रातैर्गाढोपगूढस्वनिरुपमतनू रुक्मिणीप्राणकान्तः ॥ ११ ॥

सङ्ख्याहीनस्वपूर्वप्रभवततिचयानुष्ठिताग‍ण्यपाप-
श्रेणीसञ्जातकष्टव्रजनिविडवनप्लोपिदावाश्रयाशः ।
भूयाद् भूयैँ विभूत्यै निजपदनतिनिर्मूलितांहस्ततीनाम्
अष्टैश्वर्याष्टसिद्धिप्रभृतिविभवदो रुक्मिणीप्राणकान्तः ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरुक्मिणी-सुभद्रास्तुतिः

[प्रमदाननम्]

विजितेन्द्रियाशयलभ्यपादयुगे तदन्यसुदुर्लभे
पदपद्मभक्तजराकुमृत्युहरे सुरावलिवन्दिते ।
स्मृतिलेशलभ्यकुबेरजीवतिरस्कृदर्थवचःपदे
हृदि रुक्मिणीवसुदेवजे कलये कृपारसशेवधी ॥ १ ॥

रदनावलाश्वमुखप्रदाङ्घ्रिनती क्षमाधृदुरोजनी
भुजगेशशायिकलत्रसाकभवे हृतानमदंहसौ ।
शुकमुख्यगीतनिजापदानपदे कनत्कनकच्छवी
हृदि रुक्मिणीवसुदेवजे कलये परार्थविबोधते ॥ २ ॥

पुरुषार्थपूगवितारणस्मरणे नतेप्सितदायिके
वसुधाधिपत्यमुखस्पृशिप्रवणे विबोधिततत्त्वके ।
ज्वरमुख्यसर्वविधामयालिहरे समस्तजगत्प्रभू
हृदि रुक्मिणीवसुदेवजे कलये कुबुद्धिनिराकृतौ ॥ ३ ॥

जितधीविकारविचिन्तितस्वपदे वितीर्णवराभये
शमदान्तिमुख्यसमस्तसद्गुणदे गिरीशमुखादृते ।
प्रणतत्पराधपरम्परासहने श्रमघ्नजवारिके
हृदि रुक्मिणीवसुदेवजे कलये यमादिभयापहे ॥ ४ ॥

●

श्रीरेणुकाम्बास्तुतिः

[वंशपत्रललितम्]

सत्यवतीस्नुषे पदरजःस्पृशिमुदितसुरे
श्रीजमदग्निधर्मदयिते भृगुपतिजननि ।
देवकिरीटरत्नरुचियुक्पदसलिलजने
पालय रेणुकाम्ब सततं तव तनुजमिमम् ॥१॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीरेणुकाम्बादेवीस्तोत्रम्

[प्रमदाननम्]

सुमधन्वमुख्यवशीकृताशयदुर्लभस्वपदाम्वुजां
जितचित्तभूमुखशात्रवव्रजलभ्यपादपयोरुहाम् ।
अहिजम्भमुख्यनिषूदनादिसुपर्वसेवितपादुकां
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥१॥

निजपादपङ्कजधूलिसंस्मृतिलभ्यगीःकमलालव
परिभाविताम रदेशिकैडविडेड्यडम्बरसन्ततिम् ।
प्रणतापमृत्युजरादिकाननदग्धृदावधनञ्जयं
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥२॥

पदपद्मसन्नतदीनलोककृपार्णवस्वहृदम्वुजां
गिरिराजवर्ष्मसमुद्भवस्वकलेवराभिनवाकृतिम् ।
करिवाजिकोशचमूमुखाखिलसम्पदावलिदायिनीं
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥३॥

दुरितावलीफलकष्ट[कोश]विमोचिताङ्घ्रिसमाश्रितां
निजकुन्तलच्छविलेशधूतसरीसृपाम्वुदषट्पदान् ।
पुटपाकतप्तकनत्सुवर्णविजित्वरस्वतनुत्विषं
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥४॥

शुकबादरायणशौनकादिमुनिस्तुतस्वपदाम्वुजां
शुकमल्लिकाक्षशिखावलान्यभृताभिमानहरस्वराम् ।
परिपूरिताङ्घ्रिसरोजसंश्रितहृद्गताखिलकामनां
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥५॥

करपल्लवादृतकार्मुकेषुमुखायुधां शवरीतनुं
पदसंस्मृदावलिहृत्सरोजविकासनप्रियघस्रपम् ।
विमलात्वतत्त्वविवोधदीपकदीपितानतहृद्गुहां
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अखिलक्षमैकपतित्वमुख्यसमस्तकाङ्क्षितदार्चनां
धरणीभुवर्मुखसर्वलोकनिवास्यलङ्घितशासनाम् ।
ज्वरकुष्ठभूपतियक्ष्ममुख्यसमस्तरुक्शमनस्मृतिं
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥७॥

अभयेष्टसर्वपदार्थदानपरात्मबोधकमुद्रिका(पाणिका)म्
दितिवंशसम्भवदुष्टनिग्रहशिष्टपालनदीक्षिताम् ।
धिषणाविकारकणातिदूर[सु]चित्तसन्ततचिन्तितां
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥८॥

द्रुहिणप्रियाकमलाशचीप्रमुखेडितस्वपदाम्वुजां
द्रुहिणाब्धिजाधवपार्वतीपतिवासवप्रमुखार्चिताम् ।
शमदान्तिमुख्यसमस्तसद्गुणदानदक्षकटाक्षकां
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥९॥

पदचिन्तनप्रवणाशयश्रमसङ्घसूदनसंस्मृतिं
प्रणतापराधपरम्परासहनाम्वुधिं दुरितापहाम् ।
यममुख्यभीतिहृतिप्रवीणयमादिभोगवितारिणीं
हृतदुष्टभूपतिसन्ततेर्जननीं भजे हृदि रेणुकाम् ॥१०॥

श्रीरेणुकाम्बास्तोत्रम्

[स्रग्धरा]

कोटिब्रह्माण्डकोटिव्रजवसदखिलप्राणिसूस्वीयशक्तिं (मायां)
श्रीहेरम्बाश्रयाशप्रभवमुखनुतस्वाङ्घ्रिपङ्केजयुग्माम् ।
निर्व्याजस्वीयचित्तप्रसृतमितितुलाहीनकारुण्यवाञ्छि-
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥ १ ॥

पादाम्भोजप्रणम्राखिलजनहृदयाभीष्टपूगप्रदात्रीं
हस्त्यश्वाल्यादिसम्राडुचितसकलमास्पर्शसक्तस्वचित्ताम् ।
विश्वामित्राग्रजाताप्रभवनिजवपुर्भार्गवप्राणकान्तां
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रागद्वेषादिशून्याशययमिजनताद्राागवाप्याङ्घ्रिपद्मां
स्वीयाङ्घ्रिद्वन्द्वरेणुप्रणतिपरमनोहर्षवाराशिसोमम् ।
ईशानीं सर्वरीतिप्रकृतिविषयकापारविद्यावलीनां
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥३॥

क्षीराम्भोराशिराजत्फणितनुरुचिरस्वीयशय्यानुजन्म-
क्षीराम्भोराशिमध्यप्रभवतनुकलोत्तंसजायास्वरूपाम् ।
सोद्धर्षिस्वीकृताङ्घ्रिप्रणतजनमनीऽभीष्टपूर्त्तिव्रताढ्यां
कुक्षत्रोच्छेदकश्रीभृगुपति जननीं रेणुकाम्बां भजेहऽहम् ॥४॥

स्वापाङ्गेक्षालवेच्छुत्रिदिवततिशिरोरत्नघृष्टाङ्घ्रिपद्मां
श्वेतद्वीपे विकुण्ठावसथसुतलयोर्लभ्यसर्वर्द्धिदात्रीम् ।
गाधिक्ष्माणीशपुत्रोतनुजकृतपरीरम्भसंहर्षिताङ्गीं
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥५॥

अष्टस्वाङ्गाढ्ययोगद्रविणततिमुखाशेषभूतिप्रदात्रीं
श्रीविघ्नेट्कार्त्तिकेयप्रभृतिशिवजसूनव्यरूपाभिरामाम् ।
लक्ष्मीकान्तस्वकान्तद्रुहिणमुखसुरोत्तंसपूगार्चिताङ्घ्रि
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥६॥

निःसीमाव्याजदीनस्वपदनतकृपासिन्धुनैजान्तरङ्गां
फालाक्षाक्षिप्रदग्धस्मरपुनरसुदस्वीयलीलाकटाक्षाम् ।
लाकिन्यादिस्वशक्तिव्रजकृतसकलाजाण्डसम्बद्धकार्या
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥७॥

श्रीसूनुप्लोषकोग्रस्वविरतिहृदयाकर्षिलावण्यकाष्ठाम्
एणाक्षीमेणचिह्नोल्लसितनिजशिरोवल्लभाकारधर्त्रीम् ।
काणादाक्षस्वपादप्रभृतिनयततिश्राणकस्वप्रसादां
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥ ८ ॥

बिम्बेन्द्वम्भोजनुर्धिक्कृतिविधिनिपुणस्वाधरस्वाङ्घ्रियुग्माम्
ऐहिक्यामुष्मिकी च प्रफलति सकला यत्स्मृतेर्द्राग्विभूतिः ।
ॐकारं यत्स्वरूपं कथयति सततं वेदवेदान्तजालं
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

औदासीन्यादिनैजाखिलगुणविलसत्संयताक्षाप्यपादाम्
ॐकाराम्भोजभृङ्गस्वहृदयजनतानुग्रहोद्रेककर्त्रीम् ।
स्वर्णाशेषाभिमानप्रदलननिपुणच्छायकायाभिरामां
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥१०॥

स्वीयानम्रावतंसप्रशमनशमनस्पष्टभक्तानुकम्पां
क्रोधोद्रेकप्रदग्धप्रणतपुनरसुस्पर्शविद्यानुकम्पाम् ।
सर्वक्लेशप्रणाशाखिलशुभविततश्राणनासक्तचित्तां
कुक्षत्रोच्छेदकश्रीभृगुपतिजननीं रेणुकाम्बां भजेऽहम् ॥११॥

●

श्रीरेवतीस्तवः

[मेघविस्फूर्जिता]

भजत्कल्पोर्वीजं वरविततिदां देवताजालनम्यां
भवाम्भोधेर्नौकां करविजितकां वर्ष्मधीवृत्तिरम्याम् ।
अह्निन्यक्कृद्वेणीं [जल] निकरधृद्वर्णभाग्वस्त्रकाम्यां
भजे कारुण्याब्धिं परमशुभदां रेवतीधर्म्यकर्म्याम् ॥१॥

कृपापूर्णापाङ्गां कनकभतनुं पारदाभाङ्गभाजं
कृतस्वेशप्रीतिं स्तनभरनतां नीरदाभस्ववेणीम् ।
कृतानिष्टध्वंसां वनजनयनां पारदां पापसिन्धोः
भजे कारुण्याब्धिं परमशुभदां रेवतीं धर्म्यकर्म्याम् ॥ २ ॥

करभ्राजद्द्रोणां विनतगरुडां कष्टजालापनेत्रीं
पदाम्भोभूशोणां नतदुरितहामिष्टपूगप्रदात्रीम् ।
स्वनेत्रापास्तैणां घरनिभकुचामष्टसिद्धिप्रदात्रीं
भजे कारुण्याब्धिं परमशुभदां रेवतीं धर्म्यकर्म्याम् ॥ ३ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री रेवतीरौहिणेयस्तुतिः

(स्रग्धरा)

अन्योऽन्यप्रेमबद्धौ करितुरगचमूस्यन्दनादिस्पृगङ्घ्री
क्षान्तानम्राधराशी भुजगपतिकचाभोगिराजस्वरूपौ ।
कीराद्यैर्गीतकीर्त्ती तनुरुचिकणिकाधूतकार्त्तस्वराब्दौ
कारुण्याम्भोधिचित्तौ हृदि मम निदधे रेवतीरौहिणेयौ ॥ १ ॥

रागिव्रातानवाप्यौ शममुखसुलभस्वाङ्घ्रिपद्मप्रसादौ
गीर्वाणालीसमर्च्यौ नतकुमृतिजरारोगविध्वंसदक्षौ ।
लक्ष्मीवाणीपरास्तामरपतिविबुधाचार्यतादस्वभक्तौ
धस्नेशाब्जान्वयोत्थौ हृदि मम कलये रेवतीरौहिणेयौ ॥ २ ॥

सर्वाभीष्टप्रदार्चौ दररथपदधार्यार्यिकापूर्वजातौ
पाथोजाद्यर्च्यपादौ नतजनहृदयोज्ज्वालिविज्ञानदीपौ ।
स्वापाङ्गासृष्टभौप्यौ(राज्यौ)त्रिभुवनजनतोल्लङ्घ्यभिन्नाखिलाज्ञौ
क्लेशव्रातघ्नचिन्तौ मम हृदि कलये रेवतीरौहिणेयौ ॥ ३ ॥

दुष्टालीभीतिहेतू यमिवरनिकरध्येयपादारविन्दौ
ब्रह्मेशानस्तुताङ्घ्री शमदममुखषट्साधनस्पर्शसक्तौ ।
भक्तायासव्रजघ्नौ नतकृतदुरितारण्यदावाश्रयाशौ
उच्छिन्नानम्रदुःखौ मम हृदि निदधे रेवतीरौहिणेयौ ॥ ४ ॥

●

श्रीरेवतीस्तोत्रम्

[स्रग्विणी]

मन्मथाद्यर्यधीनातिदूराङ्घ्रिकां
त्यक्तसर्वैषणाल्याप्यपादाम्बुजाम् ।
इन्द्रमुख्यादृतस्वाङ्घ्रिपङ्केरुहां
मानसाब्जे दधे रेवतीं सन्ततम् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तगी:श्रीलवोद्धूतजीवामरा-
धीश्वराशेषविद्याधनाहङ्कृतिम् ।
भक्तराजीजरादुर्मृतिघ्नार्चनां
मानसाब्जे दधे रेवतीं सन्ततम् ॥२॥

दीनकारुण्यवार्रानिधिस्वाशयां
घूधराशेवमानापहृच्छ्रोणिकाम् ।
दन्तिवक्त्रादिसंसेविताङ्घ्र्यम्बुजां
मानसाब्जे दधे रेवतीं सन्ततम् ॥३॥

पापतापापनोदिस्वपादस्मृतिं
भूधराहीश्वरप्रागकान्तामणिम् ।
कान्तिनिर्धूत्तकार्त्तस्वराब्जोदरां
मानसाब्जे दधे रेवतीं सन्ततम् ॥४॥

नारदव्यासकीरादिमौनीडितां
शेषहीनस्वशेषस्वशक्त्याकृतिम् ।
भक्तकाङ्क्षाधिकाभीप्सितस्पर्शकां
मानसाब्जे दधे रेवतीं सन्ततम् ॥५॥

धर्ममुख्याखिलाभीष्टवस्तुप्रदां
रुक्मिणीरूपपद्मालयासेविताम् ।
तत्त्वविज्ञानरूपप्रकाशस्पृशं
मानसाब्जे दधे रेवतीं सन्ततम् ॥६॥

भूमिपालत्वदां भूतमुख्याघहां
स्वमुखाशेषलोकालिवास्यादृताम् ।
भक्तिकृत्सर्वरोगव्रजोत्सारणीं
मानसाब्जे दधे रेवतीं सन्ततम् ॥ ७ ॥

आसुरस्वान्तवृत्तिप्रणाशप्रियां
पाणिराजद्र्ुयघ्नेप्सितश्राणिकाम् ।
क्षोभहीनाशयध्यातपादाम्बुजां
मानसाब्जे दधे रेवतीं सन्ततम् ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भारतीपद्मभूभार्गवीमाधवो-
माम्बुभूधृच्छचीशक्रमुख्येडिताम् ।
मोक्षसंस्पृक्शमक्षान्तिमुख्यप्रदां
मानसाब्जे दधे रेवतीं सन्ततम् ॥ ९ ॥

श्रान्तिपारम्परीभस्मकृद्वीक्षणां
ध्यातसर्वानमन्मन्तुपूगाशयाम् ।
मृत्युभीमुख्यहृद्योगसिद्धप्रदां
मानसाब्जे दधे रेवतीं सन्ततम् ॥ १० ॥

श्रीलक्ष्मीनारायणस्तुतिः

[हरिणी]

सुरनुतपदाम्भोजद्वन्द्वौ समस्तजगत्पती
विहितविनताल्पाशापूर्त्ती कृपार्णवचेतसौ ।
रुचिरसुगुणप्रीतान्योऽन्यौ गजादिवसुप्रदौ
हृदयकमले लक्ष्मीनारायणौ निदधे सदा ॥ १ ॥

प्रमदजलधेः पीयूषांशू विरक्तजनप्रियौ
द्रुतकृतनताभीष्टस्पर्शौ निलिम्पनमस्कृतौ ।
द्रविणमुखदस्वीयाङ्घ्र्यर्चौ अशेषकलानिधी
हृदयकमले लक्ष्मीनारायणौ निदधे सदा ॥ २ ॥

अखिलविभवस्पर्शासक्तौ परस्परतोषका-
विहपरसुखप्राप्त्यै नित्यं सुपर्वसतीनुतौ ।
अडमकलितस्वाख्यावर्णौ नतप्रणवप्रियौ
हृदयकमले लक्ष्मीनारायणौ निदधे सदा ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीलक्ष्मीनारायणस्तोत्रम्

[हरिणी]

सदयहृदयौ पादानम्राखिलेप्सितदायिनौ
नुतसुरततौ लावण्या(आरुण्या)दिप्रभासिकलेवरौ ।
हिमकरमुखौ काणादाक्षस्त्वपादमुखस्तुतौ
मनसि जलये लक्ष्मीनारायणावनिशं मुद्रा ।। १ ।।

विरतविनुतौ (विरतविनुता नम्र)भक्तानन्दाम्बुराशिसमुद्रजा-
उडुपशिशुभृन्नागाधीशस्वतल्पपदाश्रितौ ।
वशगतकलौ नम्राभीष्टप्रदानधुरन्धरौ
मनसि कलये लक्ष्मीनारायणावनिशं मुदा ।। २ ।।

अमरविनुतौ ऋद्धिव्रातस्पृशिप्रियमानसौ
अरुण (कमल) चरणावक्त्रोर्ध्वं च प्रणम्रशुभप्रदौ ।
यमिजनपरौ स्वर्णविराजितविग्रहौ
मनसि कलये लक्ष्मीनारायणावनिशं मुद्रा ।। ३ ।।

*सदयहृदयाः पादानम्राखिलेप्सितदायिनी-
र्नतसुरसतीर्लावण्यादिप्रभासिकलेवराः ।
हिमकरमुखीः काणादाक्षस्वपादमुखस्तुता
मनसि कलये लक्ष्मीनारायणावनिशं मुदा ।। ४ ।।

---

* अयं श्लोकः प्रथमश्लोकस्य विकल्पे रचित इव प्रतिभाति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीलक्ष्मीदेवीस्तुतिः

[पृथ्वी]

भगीरथमुखार्चिते भजदभीष्टकल्पद्रुम
भुजङ्गघनकुन्तले भ्रमनिवारकाङ्घ्रिस्मृते ।
भवाब्जनयनाम्बुभूभवमुखामराल्यर्चिते
भवाब्जभववल्लभे भवभयापहे भूतये ॥ १ ॥

करास्तकमलस्मयां सरसिजातजातप्रियां
परास्तरुचिपारदां विजितपारदां शारदाम् ।
परात्परविबोधदां स्थिरतरालिभव्यप्रदां
धरातिकठिनस्तनीं हरसहोदरीं भावये ॥ २ ॥

नतान्प्रति सुसौम्यतां गमितसौम्यमुख्यग्रहां
श्रुतिप्रचयगम्यधीलसितगम्यपादाम्बुजाम् ।
मनोजपितृकाम्यतासुभगरम्यवर्ष्माशया-
नुरूपगुणरम्यतां रुचिरधर्म्यधीदां भजे ॥ ३ ॥

कृमिप्रभृतिकान्तसत्कृतपदे कृपाणादिधृत्-
कृताङ्घ्रिनमनव्रजे कृतकृतातिरेकेक्षणे ।
कृतान्तरिपुसोद्भवे कृतकृतान्तभीकृन्तने
कृतार्थनिकरायसृत्कृतनमस्कृते पाहि माम् ॥ ४ ॥

वनप्रियवरप्रदे विनतवीनवाहाद्रिजेड्-
वनप्रभवसम्भवे विनतसर्वशोकापहे ।
घनस्तनकठोरतावनतमस्तकक्ष्माधरे
घनच्छविशिरोरुहे कनककुक्षिकान्तेऽव माम् ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीलक्ष्म्यनन्तसरसीरुहनाभस्तवः

[स्वागता]

भक्तनिर्जरतरू भवनाशी भृङ्गजित्वरकचौ वरदाङ्घ्री ।
नीरजाभचरणौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥१॥

पीतवर्णवसनावृतनैज-स्वर्णवर्णजलदच्छविकायौ ।
काम्यसर्वफलदौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥२॥

रम्यवर्ष्मधिषणौ सुरनम्यौ कृत्तसाध्वसचयौ करुणाब्धी ।
कृष्णनागचिकुरौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥३॥

मेनकादिविनुतौ धनदार्च्यौ शौनकादिकलितौ वनजाक्षौ ।
जन्ममृत्युशमनौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥४॥

नम्रपापहरणौ विनताभू-वाहनौ कलिमलापहपादौ ।
एणचिह्नवदनौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥५॥

इष्टशासकनतौ भवसर्प-दष्टशिष्टजनकृत्तकृतान्तौ ।
अष्टसिद्धिवरदौ कलये श्री-लक्ष्म्यनन्तसरसीरुहनाभौ ॥६॥

श्रीलक्ष्मीनृसिंहप्रह्लादस्तोत्रम्

[हरनर्तनम्]

भक्तकल्पमहीरुहान् भवभीतिभञ्जकभावनान्
भोगिभानुमधुव्रताभकचान् करास्तसरोरुहान् ।
स्वर्णवर्णपरावृतान् वरदानतत्परचेतसो
भार्गवीनरकेसरिप्रह्लादकान् हृदि भावये ॥१॥

नम्रकामसमस्तदाञ् जगदालिनम्यपदद्वयान्
सौम्यरम्यहृदम्बुजान् दिविजामरासुरसपूमान् ।
कृत्तभक्तकृतान्तकान् नतिकृत्कृपाम्बुधिमानसान्
भार्गवीनरकेसरिप्रह्लादकान् हृदि भावये ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेनकादिसमर्चिताञ्छुकशौनकादिमुनीडितान्
स्वर्णमेघघनच्छवीन् नतकाङ्क्षिताखिलवस्तुदान् ।
संसृताम्बुधिपारदान् फणिनीरदद्युतिकुन्तलान्
भार्गवीनरकेसरिप्रह्लादकान् हृदि भावये ॥ ३ ॥

नम्रपापनिकृन्तनान् विनतातनूभवसंस्तुतान्
भक्तिमत्करुणाम्बुधीन् करशोभिभीतिहृमुद्रिकान् ।
सर्वशास्त्रततिप्रदान् हिमरश्मिडम्बरहाननान्
भार्गवीनरकेसरिप्रह्लादकान् हृदि भावये ॥ ४ ॥

श्रीललितास्तवः

(रासः)

भक्ताभीष्टश्राणननिर्जितकल्पलते
भुजगाल्यम्बुदडम्बरभञ्जककेशयुते ।
भवपाथोनिधितारणपण्डितचरणरते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ १ ॥

नीरदसोदरमेचककुन्तलभरलसिते
शारदनीरदनिभपटवेष्टितवर्ष्मलते ।
भारकलेवरमारकपदयुगधूलिरते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ २ ॥

काम्याशेषस्पर्शननन्दितपादनते
सौम्याकृतिगुणललिताखिलनिजकायमते ।
रम्यावयवव्रातावर्जितकान्तमते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ३ ॥

कृष्णभुजङ्गमजित्वरशीर्षरुहोल्लसिते
कृष्णानामयकाङ्क्षकभैमीकृतविनुते ।
कृतनिजभक्तिकृतान्तभयघ्नकृपाभरिते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दीनजनावनिवरदाधिक्कृतनैजगते
कनकन्यक्कृत्कोऽत्युज्ज्वलनिजकायलते ।
शौनकमुखविनुतैनोभञ्जकपदविनुते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ५ ॥

शरणगलोकाभयदानव्रतकरलसिते
नीरदममतोन्मूलकवर्णकचिकुरतते ।
पारददीप्ते भवपारदचरणध्याते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ६ ॥

पीनकठोरोत्तुङ्गस्तनजितधरजाते
विनतातनुसम्भवनिजवाहनसहजाते ।
विनताशेषाघेभमृगाधिपधरजाते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ७ ॥

वीणावादनरसिके चिदनलसञ्जात
शोणाधरजितबिम्बे हिमवत्तनुजाते ।
काणादादिमनयदे यमसूदनकान्ते
भगवति ललिते करुणां कुरु मयि चरणनते ॥ ८ ॥

अष्टकमेतल्ललितादेव्या अनुवेलं
कष्टव्रातक्षोणीधारणशतकोटिम् ।
इष्टश्राणननिपुणं श्रद्धातः पठताम्
अष्टकमैश्वर्याणां दद्याद्द्राग्ललितै [ता] ॥ ९ ॥

श्रीवचनसूसरसिजातनैजासनस्तुतिः

[पृथ्वी]

जगत्त्रितयसूगुरू गणपषण्मुखादीडितौ
अहेतुकरुणाम्बुधी चरणनम्रसर्वेष्टदौ ।
इभाश्वमुखदानती गिरिशसोदरीमामकौ
भजामि वचनप्रसूसरसिजातनैजासनौ ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जिताक्षसुलभाङ्घ्रिकौ नतमुदब्धिराकाविधू
परापरकलाधिपौ कमलहृक्स्नुषावर्ष्मजौ ।
शशाङ्कपितृसूगुरू द्रुतवितीर्णनिश्रेप्सितौ
भजामि वचनप्रसूसरसिजातनैजासनौ ॥२॥

अशेषसुरवन्दितौ नमदनन्तऋद्धिप्रदौ
उमापतिसमादृतौ सकलभूतिदाङ्घ्र्यर्चनौ ।
पडीतिमुखवारकौ जलधिजाहृरिप्रीतिदौ
भजामि वचनप्रसूसरसिजातनैजासनौ ॥३॥

कृपामृतजनिक्षिती निटिललोचनादीडितौ
सुपर्वललनास्तुतौ मतिशरीरलावण्यदौ ।
शशाङ्कशिशिराशयौ कणभुगादिशास्त्रप्रदौ
भजामि वचनप्रसूसरसिजातनैजासनौ ॥४॥

पदापजितपङ्कजौ इहपरत्रसौख्यप्रदौ
महाप्रणवरूपिणौ प्रणवमुख्यमन्त्रात्मकौ ।
विरक्तमुदिताशयौ कनकजिष्णुकायच्छवी
भजामि वचनप्रसूसरसिजातनैजासनौ ॥५॥

श्रीवरुणास्तुतिः

[सिंहविक्रीडितं नाराचं वा]

विषयसुखरताप्यभिन्नाङ्घ्रिकां रागहीनेक्षितां
दिविजदितिजपूगसम्पूजितां व्याधिवार्धक्यहीम् ।
घनदगुरुजितात्ममाधीकृतस्वाङ्घ्रिपद्मानतां
प्रणतजनकृपामृताम्भोनिधिं सिन्धुमीडे मुदा ॥ १ ॥

अचलजनिरमावचःस्वाकृतिं हस्तिमुख्यप्रदां
दुरितविपिनदावहव्याद्वनाम्भोगिराजेडिताम् ।
कनकमाहृदात्मवर्ष्मत्विषं मौनिपूगार्चितां
परमपददपादसंसेवनां सिन्धुमीडे मुदा ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विहितविनतवाञ्छितार्थपूरुषार्थप्रदां
परमपुरुषतत्त्वबोधप्रदां भूपताश्राणकाम् ।
अखिलभुवनवन्दनीयाङ्घ्रिकां सर्वरोगापहां
प्रणतकुमृतिवृत्तिसंहारिणीं सिन्धुमीडे मुदा ॥ ३ ॥

अभयवरदमुद्रिकाधृत्करां योगिपूगार्चितां
द्रुहिणहरिहरप्रसादप्रदां शान्तिमुख्यप्रदाम् ।
चरणकमलसन्नतश्रान्तिहां क्षान्तिपाथोनिधिं
शमनमुखभयघ्नयोगप्रदां सिन्धुमीडे मुदा ॥ ४ ॥

श्रीवरुणस्तुतिः

[प्रमिताक्षरा]

यमितुष्ट रागजितधीविमुख श्रितरुग्जराह सुरपूज्यपद ।
नतवाग्धनापजितजीवजनेड् जलनाथ पाहि करुणाजलधे ॥१॥
गिरिजाधवाहिशयनप्रवणप्रणताघनाश नृपवैभवद ।
शुकमुख्यगीतकनकाभतनो जलनाथ पाहि निखिलाज।(लज्ज)नते ।२।

पुरुषार्थदातरखिलेप्सितद परतत्त्वरूप कलिदन्तिहरे ।
अपमृत्युहर्तरमृताधिपते जलनाथ पाहि हृतदैत्यतते ॥३॥
यनिवन्दिताङ्घ्रियुगपाशधर शममुख्यदादिविबुधाधिपते ।
मतिरोधमुख्यद निखिलश्रमह जलनाथ पाहि नतपापसह ॥४॥

श्रीवरुणस्तवः

(करिणी)

भजदामरलतिकां भवभयभञ्जननिपुणं
भुजगाम्बुदचिकुरं करहसितामृतजनुषम् ।
हृदयङ्गमचरितं पदशरणागतशुभदं
सततं हृदि कलये झपमकरालयनृपतिम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतपातकशमनं नतविनतातनुजनुषं
कनकच्छविरुचिरं वरततिदस्मृतकणिकम् ।
कनकादिमवरदं करलसदिष्टदपिशुनं
सततं हृदि कलये हयचयनीरधिनृपतिम् ॥ २ ॥

शरदम्बुदवसनं [धृतशुभभूषणनिकरं]
निखिलेष्टदनमनं सुरनिकरार्चितचरणं ।
हृतसन्नतशमनं गुरुकविसेवितचरणं
सततं हृदि कलये हरिरमणीपितृजनकम् ॥ ३ ॥

विनतामरवनितं वरनिकरप्रदचरणं
भववारिधिघटजं जलधरमस्तकजनुषम् ।
कणभुङ्मुखनयदं [सकलसुरासुरविनुतं]
सततं हृदि कलये भृगुमुनितल्लजजनकम् ॥ ४ ॥

श्रीवल्लिदेवसेनागुहस्तुतिः

[वसन्ततिलका]

वैराग्यभक्तिमतिदान्तिशरीर····
श्रद्धासितिक्षणमुखाढ्यजनाप्यपादान् ।
साराग्यमुख्यमलिनाशयदुर्लभाङ्घ्रीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १ ॥

नैजङ्घ्रिपद्मयुगलाश्रितदीनलोक-
दुर्मृत्युरोगजरठत्वमुखापनेतॄन् ।
देवव्रजासुरवरेण्यसमर्चिताङ्घ्रीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यत्पादपाथसिजनिप्रणतेर्बलेन
स्वश्रीवचोविजितगुह्यकराजजीवाः ।
सद्यो भवन्त्यतिदरिद्रतमाश्च मूकाः
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ३ ॥

त्यक्तान्यवस्तुपरतं पदपद्मभृङ्गी-
भूतस्वकीयमनसां करुणासुधाब्धीन् ।
प्रालेयशैलतनयाहृदयाब्जभानून्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ४ ॥

नम्रावलीवहुजनूरचिताघपूग-
भस्मीकृतिप्रवणनैजमनोऽरविन्दान् ।
कर्यादिदान् करिमुखस्तुतचित्तवृत्तीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ५ ॥

स्वाङ्गस्फुरद्रुचिलवापहृताब्जगर्भ-
स्वर्णाद्रिजापतिवतंससमस्तदर्पान् ।
स्वीयासनीकृतशिखावलवंशमौलीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ६ ॥

गोत्रच्छिदग्नियमनिर्ऋतिवारिराशि-
क्षोणीशवायुशशिमुख्यहरित्पतीड्यान् ।
मन्त्राक्षरादिजपवोध्यनिजाक्षरार्यान्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ७ ॥

सच्चित्प्रमोदघनरूपनिजात्मतत्त्व-
साक्षात्कृतिप्रदपदाब्जसक्तप्रणामान् ।
भक्तालिवाञ्छितसमस्तपदार्थदातॄन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ८ ॥

मल्लीजलस्थलसमुद्भवपद्मजाती-
पुन्नागचम्पकमुखाखिलपुष्पपूज्यान् ।
सद्योवितीर्णपुरुषार्थचतुष्टयाङ्घ्रीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धात्रीभुवमु खनिजे [ष्ट] समस्तलोका-
ध्यक्षीकृतस्वपदपङ्कजचञ्चरीकान् ।
स्वाज्ञावशंवदसमस्तजगन्निकायान्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १० ॥

स्वाङ्घ्रिप्रसादलववारितनम्रलोक-
कुष्ठज्वरक्षितिपयक्ष्ममुखामयालीन् ।
दोर्दण्डविक्रमनिराकृततारकादीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ ११ ॥

भक्ताभयप्रदसमस्तसमीहितास्पृङ्-
मुद्राविराजिनिजपाणिपयःप्रजातान् ।
तैरेव शास्त्रवविभीषणशस्त्रधर्तॄन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १२ ॥

वाक्यद्मजातकमलाहरिशैलपुत्री-
चन्द्रार्धशेखरमुखप्रमदप्रदातॄन् ।
निर्धूतमानसमलीमसचिन्तिताङ्घ्रीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १३ ॥

यन्नम्रभूरिकरुणार्द्रकटाक्षलेशै-
रायासवर्जितपथैः सुलभीक्रियन्ते ।
शान्तिक्षमोपरतिमुख्यसमीहितार्थान्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १४ ॥

पादाब्जभक्तिविलसद्गणनाद्यतीत-
सर्वाघकाननदवाग्निनतस्वपादान् ।
अङ्घ्रिप्रणम्रवरागीकृतयोगसिद्धीन्
श्रीवल्लिकासुरचमूशुचिजान् प्रपद्ये ॥ १५ ॥

०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवल्लिदेवसेनागुहस्तोत्रम्

[सुवदना]

सर्वब्रह्माण्डजास्थितनमदवनान् गीर्वाणविनुतान्
कारुण्याम्भोधिवेलायितनिजहृदयान् भक्तालिवरदान् ।
हस्त्यश्वस्यन्दनादिप्रचुरविभवदान् अन्योऽन्यहृद:स्तुतान्
श्रीवल्लीदेवसेनादहनभवतनून् वन्देऽहमनिशम् ॥१॥

इहाशून्याशयालीसुलभनिजपादानानन्दजनकान्
विधाम्नाताधिनाथीकृतचरणरतान्नागेशविनुतान् ।
राज्ञीण्मौलिस्नुपायुक्तनुजनितनून्सर्वर्द्धिपपदान्
श्रीवल्लीदेवसेनादहनभवतनून् वन्देऽहमनिशम् ॥२॥

नम्राशेषदानव्रतमुखरुचिरान् पट्शास्त्रवहरान्
पीयूषाशिप्रकाण्डव्रजनुतचरणान् कारुण्यभरितान् ।
अन्योऽन्यप्रेमबन्धातिशयगधिषणान् फालाक्षनिरतान्
श्रीवल्लीदेवसेनादहनभवतनून् वन्देऽहमनिशम् ॥३॥

भक्ताभीष्टाणिमादिस्वविभवदनतीन् स्व:स्त्रीनुतपदान्
श्रीलक्ष्मीशानुजाताप्रियकृतिनिरताँल्लावण्यजलधीन् ।
एणस्वाङ्कीयडिम्भोज्ज्वलनिजशिरस: शास्त्रालिदनतीन्
श्रीवल्लीदेवसेनादहनभवतनून् वन्देऽहमनिशम् ॥४॥

बिम्बाम्भोजधिक्कार्यधरपदयुगाञ्छत्रवत्कुलदान्
ॐकारस्वाभिधानप्रवचननिगमानोंजापिवरदान् ।
चित्तौदासीन्यराजद्यमिवरवरदान् स्वर्णेन्दुभतनून्
श्रीवल्लीदेवसेनादहनभवतनून् वन्देऽहमनिशम् ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीबलिपञ्चचामरस्तुतिः

[पञ्चचामरम्]

पदाम्बुजप्रणामकृन्निकायसर्वकाङ्क्षित····
प्रदापनव्रतावधूतनिर्जरावनीरुहम् ।
मनोभवक्रुधाप्रलोभमुख्यभीदनक्रभाग्-
भवाम्बुराशितारकस्वपादुकं भजे बलिम् ॥१॥

स्ववर्ष्मानसानुरूपसद्गुणावली····
विलासिविन्ध्यकावलीहृदब्जघस्रनायकम् ।
स्वचित्तपङ्कजातनित्यवासकृत्पयोधिजा-
धवाङ्घ्रिपङ्कजातचिन्तनप्रियं भजे बलिम् ॥२॥

समीरणस्वभोजनद्विरेफनीरदायका-
न्धकारकज्जलप्रमुख्यदर्पहृस्वकुन्तलम् ।
शरत्पयोवितारकात्रिनेत्रजेन्दुशेखर-
स्वकीयदेशिकच्छविस्ववाससं भजे बलिम् ॥३॥

त्रिविष्टपस्ववाससङ्घमौनिपूगपूजित-
स्वपादपङ्कजातयुग्मदैत्यपान्वयोद्भवम् ।
जगन्निवासवाञ्छितग्रहीतृतासमुल्लसत्-
प्रदातृतामनोज्ञकीर्त्तिभास्वरं भजे बलिम् ॥४॥

मनोहरस्वसद्गुणालिकृष्टमानसाम्बुज-
त्रिलोकनायकस्वयंकृतस्वकीयसेवनम् ।
निजाङ्घ्रिपङ्कजातसन्नताखिलेप्सितव्रज-
प्रदानमात्रतुष्टमानसाम्बुजं भजे बलिम् ॥५॥

उदारताप्रतिश्रुप्रदानमुख्यसद्गुण-
व्रजालिवश्यमाधवप्रतिश्रुताष्टमेन्द्रतम् ।
पदाम्बुजार्चनातपःप्रभावमोदितेन्दुधृद्-
वितीर्णदोःसहस्रबाणताततकं भजे बलिम् ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निजाश्रितव्रजेप्सिताखिलार्थदायिभीतिहृत्-
प्रशस्तमुद्रिकाद्वयोज्ज्वलस्वपाणिपङ्कजम् ।
हृरिज्जिगीषुतावशस्वपार्श्वसृत्पुलोमजेड्-
विजेतृतातसर्वदर्पकृन्तनं भजे वलिम् ॥७॥

वहुप्रकारकष्टजातमग्नपालवर्जित-
प्रणम्रदीनलोकसर्वशोकहृत्कृपार्णवम् ।
पुनर्भवक्षयादिभीतिसन्ततिप्रमोचित-
स्वपादपङ्कभूसकृन्नमस्कृतं भजे वलिम् ॥८॥

कनत्सुवर्णकामिनीनिवासवर्ष्मसम्भव-
प्रमुख्यवन्धमोक्षणावधीप्सितव्रजप्रदम् ।
पयःपयोविवेक्तृताक्ष्यपुङ्गवस्ववाहन-
प्रमुख्यसर्वदेवताप्रमोददं भजे वलिम् ॥९॥

जयन्ततातमुख्यदेवतावितत्यसूयिता-
खिलप्रकारभोग्यवस्तुपूर्णनैजलोककम् ।
कणादनेत्रपाददेवहूतिभूपतञ्जलि-
प्रमुख्यसर्वशास्त्रदायकं भजे [सदा] वलिम् ॥१०॥

रथाङ्गभूषितस्वहस्तवर्ष्मजातवर्ष्मजा-
निरुद्धमानसापहारिनैजपुत्रपुत्र्युपम् ।
पदाम्बुसम्भवप्रणम्रलोकसर्वदुष्कृत-
व्रजप्रदग्धृतालसत्कटाक्षकं भजे वलिम् ॥११॥

•

श्रीवल्लीदेवसेनास्तवः

[स्रग्धरा]

भृङ्गन्यक्कारिवेण्यौ भजदमरतरू साध्वसघ्न्यौ स्ववस्त्र-
स्पर्धाकृच्छारदाभ्रे करजितवनजे भक्तसर्वेष्टदात्र्यौ ।
वर्ष्मध्वान्तातिरम्ये शुचिभवदयिते देवताव्रातनम्ये
श्रीवल्लीदेवसेने निरुपमकरुणावारिराशी प्रपद्ये ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारुण्याम्भोधिचित्ते पदनतवरदे मेनकाशौनकाद्यै-
र्भक्त्या संसेविताङ्घ्रो सुरवरविनुते भीतिसङ्घातहन्त्र्यौ ।
मर्मोहिङ्कारभेतृस्वरुचिरसुकुचे संसृतेः पारदात्र्यौ
श्रीवल्लीदेवसेने शुचिभवदयिते सन्ततं सन्नतोऽस्मि ॥२॥

छिन्नाशेषानताघे स्तनविजितधरे केशभग्नाब्ददर्पे
वीणापाण्यादिगीतस्वमहिमगुरुते चन्द्रचूडोत्तमाङ्गे ।
कष्टाल्युन्मूलयित्र्यौ स्मरणलववलान्नम्रसर्वेष्टदात्र्यौ
श्रीवल्लीदेवसेने निरुपमकरुणे सर्वदास्मिन् दयेथाम् ॥३॥

श्रीवल्लीस्तवः

[विद्युन्माला]

भृङ्गाम्भोदभ्राजद्वेणीं भीतिक्लेशोच्छेदिस्वाङ्घ्रिम् ।
भक्तव्रातस्वर्भूवल्लीं वन्दे स्कन्दप्रेष्ठां वल्लीम् ॥१॥

पाथोजातन्यक्कृत्पाणिं सर्वाभीष्टस्रष्ट्र्यङ्घ्र्यब्जाम ।
वृष्टिक्षीराम्भोधृद्वस्त्रां वन्दे स्कन्दप्रेष्ठां वल्लीम् ॥२॥

आनम्रालीकाम्यश्राणिस्तोकस्वेक्षां रम्यस्वान्ताम् ।
स्वःसेनानीकाम्याकारं वन्दे देवीं श्रीमद्वल्लीम् ॥३॥

कृष्णादीड्यभ्राजन्मूर्त्ति कृत्तानम्राशेषक्लेशाम् ।
कारुण्याब्धिं पौलिन्देड्यां वन्दे स्कन्दप्रेष्ठां वल्लीम् ॥४॥

मेनारम्भामुख्याराध्यां नानामौनिव्रातेड्याङ्घ्रिम् ।
स्वर्णन्यक्कृद्वर्णश्रेष्ठां वन्दे देवीं श्रीमद् वल्लीम् ॥५॥

नैल्योद्रेकाद्यस्थावेणीं स्वीयाभ्रत्वभ्रान्तिस्रष्ट्रीम् ।
सङ्क्रष्टालीपारस्रष्ट्रीं वन्दे देवीं श्रीमद्वल्लीम् ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्ष्माधृद्धिक्कृद्वक्षोजातां नम्राशेषांहोविच्छेत्रीम् ।
ताक्ष्यारूढस्वस्त्रुद्भूतप्रेष्ठां वन्दे वल्लीदेवीम् ॥७॥

वीणाभ्राजत्पाण्यम्भोभूं मौन्याद्युद्गीतात्मश्रैष्ठ्याम् ।
एणाङ्कोत्तंसात्मोद्भूतप्रेष्ठां वन्दे वल्लीदेवीम् ॥८॥

वल्लीदेवीभक्त्या स्पृष्टं ध्यायेत्पद्यान्येतान्यष्टौ ।
तत्कारुण्यात्कष्टान्मुक्तः सर्वं तूर्णं प्राप्नोतीष्टम् ॥९॥

●

श्रीवल्लीदेवीस्तुतिः

[स्वागता]

पुष्पबाणतदनुद्भवजालहीनचित्तसुलभाङ्घ्रिसरोजाम् ।
तद्वशस्थितजनाल्यनवाप्यां भावयेऽहमनिशं हृदि वल्लीम् ॥१॥

पादपङ्कजनतिप्रवणस्व-स्वान्तदुर्मतिजरामुखहर्त्रि ।
इन्द्रचन्द्रमुखपूजितपादे वल्लि देहि मे पादवलम्बम् ॥२॥

यत्पदाम्बुजरजःस्पृशिमुख्यपूतरङ्कजनिमूकनिकायाः ।
राजराजगुरुतौल्यमयन्ते वल्लि देहि मे पादवलम्बम् ॥३॥

जन्ममृत्युजलशेवधिमग्नदीननम्रततितारकपोत ।
गाढशङ्कुसिततारकशत्रो वल्लि देहि मे पादवलम्बम् ॥४॥

कुम्भिकुम्भमदहृत्कुचकुम्भे कुम्भिवक्त्रसहसम्भवकान्ते ।
कुम्भजातविमनद्वृजिनाब्धे वल्लि देहि मे पादवलम्बम् ॥५॥

काञ्चनामृतसमुद्भवगर्भ सर्वगर्वहरकान्तिशरीरे ।
शेषशायिसहजासुतकान्ते वल्लि देहि मे पादवलम्बम् ॥६॥

पूर्णपूरुषमुखाह्वयवार्च्यभागिनेयकृतपुण्यजभाग्य ।
कीरनारदमुखर्षिततीड्ये वल्लि देहि मे पादवलम्बम् ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ऐहिकादिसुखलेशसमीहाहीनभक्तभवबन्धविमोक्त्रि ।
कामकामिनतकाङ्क्षितदात्रि वल्लि देहि मे पादवलम्बम् ॥८॥

कामनम्रहृदयान्धतमिस्राचण्डभानुपरतत्त्वरहस्यम् ।
दीपयन्ति निजदीधितलेशैर्वल्लि देहि मे पादवलम्बम् ॥९॥

सार्वभौमपदवीक्षणमात्राच्छ्राणयन्ति चरणानतमात्रात् ।
भूमिमुख्यभुवनव्रजशाखि वल्लि देहि मे पादवलम्बम् ॥१०॥

धर्मतत्करणकामविमुक्तिदानदक्षरतपूजितचित्ते ।
सर्वरोगपरिमोचितभक्ते वल्लि देहि मे पादवलम्बम् ॥११॥

शान्तसर्वमतिचापलयोगिध्यातपादसरसीजनियुग्मे ।
भीतिहर्त्रिवरदाञ्चितपाणे वल्लि देहि मे पादवलम्बम् ॥१२॥

मेदिनीजलसमुद्भवपद्म मुख्यदिव्यकुसुमैरनिशार्च्ये ।
गीरमाद्रिजनिगीतचरित्रे वल्लि देहि मे पादवलम्बम् ॥१३॥

संस्कृताख्यबहुघोरसमुद्रमग्ननम्रसकलश्रमहर्त्रि ।
शान्तिमुख्यगुणदायिकटाक्षे वल्लि देहि मे पादवलम्बम् ॥१४॥

पादधूलिलवसंस्पृशिपूतप्राक्तनाघततिमार्जनदक्षे ।
राजयोगमुखदाङ्घ्रिसमर्चे वल्लि देहि मे पादवलम्बम् ॥१५॥

श्रीवल्लीदेवसेनास्तुतिः

[रासः]

परिमितिशून्यब्रह्माण्डालीप्रसवित्र्यौ
विहितक्रौञ्चच्छिद्रहृदम्भोभवदिनपौ ।
व्याजविवर्जितनिरवधिकरुणामृतजलधी
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुण्डालाश्वस्यन्दनपत्तिप्रमुखरमा–
मुख्यानम्राभीष्टव्रजदकटाक्षलवे ।
प्रालेयक्ष्माभृत्तनुजातनुजनिकान्ते
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ २ ॥

कामक्रोधविहीनाप्येनतसम्मददे
विद्याघ्रातश्राणनचुञ्चुस्वपदनती ।
उरगाधीणमुखवर्ण्यस्वाङ्घ्र्यपदानलवे
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ३ ॥

ऊरीकृतनतपालनकाङ्क्षास्पृशिदीक्षे
नैजश्वशुरोडुपतिकलाधृन्निजशीर्षे ।
गीर्वाणव्रजमुकुटनिघृष्टपदाम्भोजे
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ४ ॥

लक्ष्मीपतिनिभविभवीकृतनिजपादनते
पौलीन्देश्वरगीर्वाणेश्वरतनुजाते ।
पङ्कजयोनिप्रमुखनिजाङ्घ्र्यम्भोजाते
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ५ ॥

लावण्याकरकारुण्याम्बुधिवर्ष्मती
श्वश्रूश्वसुरप्रीत्युद्रेकदनिजचरिते ।
मुखनयनाधरविजितैणाङ्कैणीविम्बे
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ६ ॥

कणभुग्द्वयपद कपिलपतञ्जलिमुखनयदे
निजपादार्चासुलभीविहितेहपरसुखे ।
साम्नायान्तश्रुतिततिगीतप्रणवाख्ये
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ७ ॥

प्रणवमुखाखिलमन्त्रध्येयनिजाकारे
प्रणवप्रवणस्वान्तप्रीतःवान्ते ।
वैतृष्ण्यादिसुलक्षणलक्षितजनसुलभे
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तकमुखभवसाध्वसकृन्तकपदविनुते
स्वाङ्गभ्राजच्छविजितराकासितकिरणे
अनिशस्पर्शितनत जनकाङ्क्षितसर्वशुभे
श्रीमद्वल्लीदैवतसेने प्रणतोऽस्मि ॥ ९ ॥

श्रीगुहस्तुतिः

स्रग्धरा

प्रह्लादोत्पत्तिहेतुद्विउहह [द्विउहिहनिवह]ह्लादनोत्पत्तिहेतु-
र्यद्वत्त्वन्मातुलड [लो] ऽसौ भवइहच भवत्तात आस्ते भवारिः ।
अब्जोऽब्जारिर्यथाभूत्तव मुखविषयस्पर्धया नूनमेवं
श्रेष्ठाचानुरानुत्या [चारानुकृत्या] समजनिच भवांस्तारकस्तारकारि ॥ १ ॥

श्रीवल्लीदेवसेनागुहस्तुतिः

(शालिनी)

इष्ट स्प्रष्दृन् पाणिधिवकारिपद्मान्
संसारघ्नाञ्छुभ्रवस्त्रावृताङ्गान् ।
भोगीट्केशान् नम्रसवेष्टदातॄन्
वन्दे वल्लीदेवसेनाषडास्यान् ॥ १ ॥

काम्याकारान् कृत्स्नलोकार्च्यपादान्
नम्यस्वाङ्घ्रीन् कृत्तकृत्तान्तभीतीन् ।
रम्यस्वान्तान् दीनकारुण्यनाधीन्
वन्दे वल्लीदेवसेनाषडास्यान् ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेनाद्यर्च्यान् पादनम्रामरालीन्
देवमातॄन् संसृतेः पारदातॄन् ।
स्वर्णाभाङ्गान् नीरदस्पर्धिकेशान्
वन्दे वल्लीदेवसेनाषडास्यान् ॥ ३ ॥

नम्राघघ्नान् वीणिकाशवितहस्ता
ञ्छिख्यारूढान् वर्वशास्त्रार्थदातॄन् ।
आनन्दाब्धीन् प्राणभीजैतृहोत्रान्
वन्दे वल्लीदेवसेनाषडास्यान् ॥ ४ ॥

श्रीवल्लीश्रीदेवसेनास्तुतिः

(हरिणी)

सुमशररुषामुख्याधीनस्वनित्तसुदुर्लभे
विरतिवनिताकान्तस्वान्तव्रजाप्यपदाम्बुजे ।
अमरनिकराधीशाब्धीशप्रमुख्यसुराद्दते
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ १ ॥

प्रणतजनतावाणी लक्ष्मीनिकृत्तनिजाखिला-
भिमतनिकरीजातस्वर्गि व्रजार्यधनाधिपे ।
नतजनजरादुर्मृत्यादिप्रशामकसंस्मृती
मनसि कलये नित्यं वल्लीसुराधिपपुत्रिके ॥ २ ॥

भवभवमहाकष्टादित्यप्रतप्तकृपाम्बुदौ [धी]
गिरिपतिसुताचन्द्रोत्तंसप्रजातमनोहरे ।
करिमुखरमादानासक्ते करीन्द्रमुखाद्दते
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ ३ ॥

विनमदघहृद्धूलीलेशस्वकीयपदाम्बुजे
तनुरुचिजितस्वर्णाम्भोभूधराभिमतव्रजे ।
स्वरवकणिकाधूतस्वाहङ्कृतान्यभृतोत्तमे
मनसि कलये नित्यं वल्लीसुराधिपपुत्रिके ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भुजगशयनस्वास्त्रेयाहिस्वभोजनवाहने
प्रणतिसुलभीभूतब्रह्मक्षराक्षरबोधने ।
अमरपृतनाव्राताधीशप्रमोदवितारिके
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ ५ ॥

इहपरसुखाकाङ्क्षातः स्वप्रणामकृदिष्टदे
श्रुतिगदितपुंसम्प्रार्थ्यव्रजप्रदचिन्तने ।
प्रणतहृदयाम्भोजाताशुप्रफुल्लकघस्त्रपौ [भास्करौ]
मनसि कलये नित्यं वल्लीसुराधिपपुत्रिके ॥ ६ ॥

विकसितनभद्वृत्पाथोजप्रकाशिततत्त्विके
सपदि शानितप्राणभ्रालीज्वराद्यखिलामये ।
करधृतभयव्रातध्नेष्टप्रदानविबोधिके
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ ७ ॥

विजितविकृतिस्वान्तध्यातस्वपादपयोजनो [रुहे]
कुसुमशरसूवाणीगौरीशचीप्रमुखेडिते ।
शमदममुखस्वान्ताच्छत्वप्रदायकदायिके
मनसि कलये नित्यं वल्लीसुराधिपपुत्रिके ॥ ८ ॥

श्रमततिहरस्वाङ्घ्रिद्वन्द्वप्रजातनमस्कृते
सदयहृदयक्षान्तानम्राखिलाघकलापके ।
यममुखभयोच्छेदप्रौढे यमप्रमुखप्रदे
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ ९ ॥

धरणिधवतामुख्यस्पर्शिस्वधूलिलवाङ्घ्रिके
धरणिसुतलस्वर्गादिस्थाखिलाहृतशासने ।
धरणिधरणीजामात्रङ्गप्रजन्युपगूहिते
मनसि निदधे नित्यं वल्लीसुराधिपपुत्रिके ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवशिष्ठस्तुतिः

[वसन्ततिलका]

रागाढ्यदुर्लभपदं विरताशयाप्यं
गीर्वाणपूगविनुतं हृतदुर्मृतादिम् ।
यक्षेशवाक्पतिविजिद्धनगीप्रदार्चं
कारुण्यपूर्णमनसं कलये वशिष्ठम् ॥१॥

शैलेन्द्रजापतिफणीश्वरतल्परूपं
हस्त्यश्वसैन्यमुखदं विनिवारिताघम् ।
तोयप्रदायकरुचिं सुतपौत्रकीरं
ब्रह्मज्ञताप्रदनतिं कलये वशिष्ठम् ॥२॥

सर्वेष्टदाननिपुणं पुरुषार्थदार्चं
पुष्पालिपूज्यचरणं प्रतिबुद्धतत्त्वम् ।
क्षोणीपतित्वदपदं तृणतुल्यविश्वं
सर्वामयव्रजहरं कलये वशिष्ठम् ॥३॥

इष्टप्रदाभयकरं नतकल्मषघ्नं
क्लृप्तप्रणम्रविकृतिं मुनिपूगपूज्यम् ।
शान्त्यादिदाननिरतं श्रमहृत्पाद [विनतश्रमघ्नं]
योगेश्वरीकृतनतं कलये वशिष्ठम् ॥४॥

श्रीवाणीशशिडिम्भमौलिमणिभाग्गर्भैकदन्तस्तवः

(ॱार्दूलविक्रीडितम्)

अम्भोजातसमस्तदर्पहृकरान् भक्तेष्टकल्पद्रुमान्
अम्भोदात्भुजङ्गभृङ्गचिकुरान् संसारभीत्यन्तकान् ।
वासोर्निर्जितशारदामृतधराञ्छृङ्गाद्रिपीठस्थितान्
छ्रीवाणीशशिडिम्भमौलिर्मणिभाग्गर्भैकदन्तान् भजे ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्स्नक्ष्मागुरुशङ्करार्यकलितान् काम्याखिलेष्टप्रदान्
कृत्स्नात्मत्वमहाविभूतिदजगन्नम्याङ्घ्रिपाथोभवान् ।
कृत्ताज्ञानकृतान्तविघ्ननिकरान् नम्याच्छधीश्राणकान्
छ्रीवाणीशशिडिम्भमौलिमणिभाग्गर्भैकदन्तान् भजे ॥ २ ॥

नीरश्राणकजिष्णुकुन्तलभरान् कीनाशराज्याम्बुधि-
पारप्रापकपादपद्मनमनान् मेनाप्रमुख्यार्चितान् ।
कीराब्जाश्रयभूपिकस्फुटलसद्दीनावनात्मव्रतान्-
छ्रीवाणीशशिडिम्भमौलिमणिभाग्गर्भैकदन्तान् भजे ॥ ३ ॥

एणाङ्कीयकलाधृतिस्फुटनमद्दोषावलीमर्षणान्
काणादाक्षपदाब्जजैमिनिफणीशानादिशास्त्रप्रदान् ।
वीणामुख्यविनोदवाद्यनिकरैर्भक्तस्तुताङ्घ्रिद्वयान्
छ्रीवाणीशशिडिम्भमौलिमणिभाग्गर्भैकदन्तान् भजे ॥ ४ ॥

श्रीवामनबलिस्तुतिः

[अपरान्तिका]

भक्तालीस्वर्धराजौ कररुचिररुचिह्रीमज्जलजनी
संसाराम्भोधिपोतौ शरहतुजलधृच्छुभ्रवसनौ ।
भृङ्गाल्यम्भोदकेशौ वरवरदपदाम्भोजातयुगलौ
श्रीमद्विष्णिवन्द्रसेनौ सुरदितिजवरौ वन्देऽहमनिशम् ॥१॥

स्पृष्टानम्रालिकाम्यौ कृतनिजकृतताविश्राणनपदौ
गीर्वाणव्रातनम्यौ कृतचरणनमत्कार्तान्तिभयहौ ।
हृद्गाम्भीर्यादिरम्यौ कृपणनिजमनःकारुण्यजलधी
श्रीमद्विष्णिवन्द्रसेनौ सुरदितिजवरौ वन्देऽहमनिशम् ॥२॥

श्रीशं विन्ध्यावलीशं पदनतजनताशङ्कृतस्मृतिलवौ
विश्वस्रष्ट्रादिगीतौ भवसलिलनिधेः पारदपदौ ।
अभ्रस्वर्णाभकायौ जलधरपटलभ्राजत्कचभरौ
श्रीमद्विष्णिवन्द्रसेनौ सुरदितिजवरौ वन्देऽहमनिशम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादानम्राघनाशौ करकमललसद्भीतिघ्नवरदौ
नागार्यात्माङ्घ्रयानौ भुजगपतिमुखस्तव्यात्मविभवौ ।
तूर्णं दीनानुकम्पौ सलिलनिधिभवस्पर्धिस्ववदनौ
श्रीमद्विष्णिवन्द्रसेनौ सुरदितिजवरौ वन्देऽहमनिशम् ॥४॥

श्रीवामनमूर्तिहरिस्तोत्रम्

[नन्दनम्]

अगणितकोटिकोटिजलजोद्भवाण्डरक्षाकरं
भवविधिनारदस्मरशुकप्रमुख्यसंसेवितम् ।
वरुणनिकेतसम्भववपुर्हृदीशखर्वीकृति
हृदि कलयामि कश्यपतनुप्रजातकायं हरिम् ॥१॥

उडुपतिसोदरीहृदयवाःसमुद्भवार्कद्युतिं
भुजगकुलावतंसकलितस्वकीयतल्पोत्तमम् ।
झषकमठादिमूर्तिततिधृन्नवीनरूपान्तरं
हृदि कलयामि कश्यपतनुप्रजातकायं हरिम् ॥२॥

मुरमधुकैटभाद्यखिलदुष्टदन्तिपञ्चाननं
बलिमुखधर्म्यवर्त्मनिरतप्रियस्वयंसेवकम् ।
अमृतकृते विलोडितपयोनिधिप्रसूवल्लभं
हृदि कलयामि कश्यपतनुप्रजातकायं हरिम् ॥३॥

श्रीवामनस्तवः

[वसन्ततिलका]

विन्ध्यावलीपतिभविष्यसुरेन्द्रतायै
लक्ष्मीधवाश्रितबटुत्वमनोज्ञवेष ।
विन्ध्याद्रिदेशिक शुकद्रुहिणाङ्कजात-
मुख्यर्षिगीतचरणाम्बुज वामनाव ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सौम्याङ्घ्रिभवतजनताहृदयाब्जकाङ्क्ष्य-
काम्यालिमोक्षमुखसर्वपदार्थदायिन् ।
धर्म्याध्ववर्तिबलिहिंसनलेशशून्य-
रम्याध्वसाधितनतादितिकामिताव ॥ २ ॥

वर्णिव्रतानुसृतितो जननीपदस्थ-
श्रीमेनकातनुभवार्पितनैजभिक्ष ।
स्वर्णोदराद्रितनयापतिनाकनाथ-
सूर्याब्जवह्निमुखसंस्तुत वामनाव ॥ ३ ॥

स्वाज्ञानुसारिविनतातनुसम्भवेन
सप्रेमबन्धितविरोचनसम्भवस्थ ।
दौवारिकत्वविनिवेदितनैजचेतो-
गाम्भीर्य धर्म्यपरताञ्चित वामनाव ॥ ४ ॥

काणादनेत्रपदकापिलमुख्यशास्त्र-
प्राणायितात्मकरुणाविलसत्कटाक्ष ।
वीणाधरात्मकरपङ्कजमुख्यनैज-
प्राणप्रभक्तजनतावन वामनाव ॥ ५ ॥

शोणाम्बुसञ्जनुरशोकमुखप्रसून-
वाणालितातधृतनूतनरम्यरूप ।
शोणाधरद्युतिपराजितविम्बभास्वद्
एणाङ्कनेत्र करुणार्णव वामनाव ॥ ६ ॥

श्रीवासरतिथिसौर्यश्वत्थस्तोत्रम्

[उपजातिः]

सरागलोकव्रजदुर्लभाङ्घ्री विरागिलोकद्रुतलभ्यपादौ ।
सुरोत्तमाराधितपादपद्मौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गिराश्रियानिर्जितजीवशक्रीकृताङ्घ्रिपाथोजसकृद्विनम्रौ ।
जरापमृत्युप्रमुखापहाङ्घ्री शनैश्चराश्वत्थहरी प्रपद्ये ॥ २ ॥

कृपापयोराशिनिजान्तरङ्गौ गिरीन्द्रजाग्रे प्रजनुर्निजाकृती ।
करीन्द्रवाज्यादिवितारिपूजौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ३ ॥

आनम्रलोकाखिलपातकघ्नौ सरीसृपक्ष्मापतितल्परूपौ ।
शरीरकान्त्या विजिताम्बुवाहौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ४ ॥

शुकादिमौनीन्द्रसमर्चिताङ्घ्री निजाक्षराकारविबोधदाङ्घ्री ।
सकामनम्रेष्टवितारिचिन्तौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ५ ॥

चकासतौबाहुचतुष्टयेन विकासिपाथोरुहमुख्यपूज्यौ ।
प्रकाशितानन्तसुखस्वरूपौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ६ ॥

नराधिपत्वप्रदपादपूजी स्वरादिलोकव्रजशास्तृपादौ ।
ज्वरादिरोगव्रजनाशचिन्तौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ७ ॥

निराकृतानेकसुरारिजालौ कराम्बुजन्याहृतशङ्खचक्रौ ।
विकारशून्याशयनाशलीलौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ८ ॥

उमाधवाम्भोजजनुःशचीशमुख्यामरोत्तंसविभाविताङ्घ्री ।
शमादिषाड्गुण्यवितारकार्चौ शनैश्चराश्वत्थहरी प्रपद्ये ॥ ९ ॥

श्रमापनोदक्षमपादधूली पदाब्जनम्राघततिक्षमाब्धी ।
यमादिभीहौ यममुख्यदाङ्घ्री शनैश्चराश्वत्थहरी प्रपद्ये ॥ १० ॥

श्रीवासुकिस्तोत्रम्

[जयानन्दः]

करापास्ताम्भोजं भजदमरभूभूतपूर्जं
शरद्धाधृद्वस्त्रं भवजलनिध [धेः] पोतवर्यम् ।
नतेष्टस्रष्टारं सलिलदनिभस्वीयकान्तिं
महादेवीकण्ठाभरणभुजगं भावयेऽहम् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुपर्णस्वस्निग्धं भुजगमहिषीकाम्यकायं
कृतान्तोच्छेतारं दिविजनिकरैर्नम्यपादम् ।
कृपाम्भोधिस्वान्तं मणिमयफणारम्यकायं
महादेवीकण्ठाभरणभुजगं भावयेऽहम् ॥ २ ॥

करालीदस्वाङ्घ्रि गुणमणिगणाम्भोधिचित्तं
भवाम्भोधेः पारं दशमुखमुखस्तव्यकीर्त्तिम् ।
नवाम्भोधृद्वर्णं कनकनिकरस्पर्शिपूजं
महादेवीकण्ठाभरणभुजगं भावयेऽहम् ॥ ३ ॥

लसन्मुद्रापाणिं विनतदुरितध्वंसदक्षं
सदाचारप्रीतं स्वसखविनतावर्ष्मजातम् ।
महासेनक्रीडाविषयविपयुङ्नैजदन्तं
महादेवीकण्ठाभरणभुजगं भावयेऽहम् ॥ ४ ॥

श्रीवासुदेवादिव्यूहस्तोत्रम्

[प्रमदाननम्]

नतकाम्यसन्ततिदान् सुरार्च्यपदान् मनोहरधीतनून्
हरिपार्श्ववासरतान् कृतान्तहरान कृपाम्बुधिमानसान् ।
सुरभामिनी (दिविजाङ्गना) कलितानजोत्थनुतान् सुवर्णमुखप्रदान्
हृदि वासुदेवबलाङ्गजन्यनिरुद्धकान् कलयेऽन्वहम् ॥१॥

वरदाङ्घ्रिवारिभवान् भवार्त्तिहरान् पयोदशिरोरुहान्
विनताखिलाघहरान् विनाथनुतान् निजप्रमदाञ्चितान् ।
नतकष्टनाशचणानभीप्सितदान् रमाधवपार्श्वगान्
हृदि वासुदेवबलाङ्गजन्यनिरुद्धकान् कलयेऽन्वहम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीविद्याशंकरार्यस्तुतिः

[स्रग्धरा]

भक्तालीस्वर्गवृक्षो भवभयहरणोऽम्भोजधिक्कारिहस्त-
चण्डांशुस्पर्धिवस्त्रो नतवरततिदो देवतानम्यपादः ।।
श्रीवाणीशंकरार्चाप्रवणनिजमतिः पारदाता भवाब्धेः
श्रीविद्याशंकरार्यो निखिलनयगण- श्राणकः स्ताद्विभूत्यै ।।

योगारूढाग्रयायी रुचिरगुणगणो भारतीकृष्णतीर्थ-
विद्यारण्यार्चिताङ्घ्रिर्निरवधिकरुणः स्वर्णमुख्येष्टदायी ।।
कष्टव्रातापनेता विनतदुरितहृच्छिन्नमृत्यादिभीतिः
श्रीविद्याशंकरार्यः शशिशिशिरमनाः सर्वदा स्ताद्विभूत्यै ।।

श्रीविधिप्रियाश्रीहरिप्रियाश्रीशिवप्रियास्तोत्रम्

[पञ्चचामरम्]

भजत्कदम्बसर्वकांक्षितार्थदानदीक्षिता
भवाभिधानभीकराम्बुराशिकुम्भसम्भवान् ।
भुजङ्गभृङ्गनीरवाहनीलकान्तिकुन्तला
भजेऽनिशं विधि प्रियाहरिप्रियाशिवप्रियाः ।।१।।

करप्रभाप्रभावनिर्जिताम्बुजातडम्बराः
शरत्पयःप्रदायकव्रजावधीरकाम्बराः ।
वरप्रदानरूपनैजधर्मपालनप्रिया
भजेऽनिशं विधिप्रियाहरिप्रियाशिवप्रियाः ।।२।।

नमज्जनव्रतेष्टसर्वकाम्यजालदापन-
प्रसादकर्तृताकृपादिरम्यसद्गुणाञ्चिताः ।
सुधानिजाशनावलीप्रणम्यपादुका भजे
पयोजभूपयोजहृत्पयोजशत्रुधृत्प्रियाः ।।३।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतान्तमुख्यजन्यभीनिकृन्तनप्रियाशया:
कृतार्थतल्लजीकृताङ्घ्रिपङ्कसम्भवानताः ।
कृपाम्बुराशिमग्ननैजचित्तपाथसिभवा(?)
भजेऽनिशं विधिप्रियाहरिप्रियाशिवप्रियाः ॥४॥

तिलोत्तमाप्रमुख्यदिव्यभामिनीसमर्चिताः
पराशरात्मसम्भवादिमौनिपूगपूजिताः ।
कनत्सुवर्णवर्णधिक्कृदात्मविग्रहच्छवी-
र्भजेऽनिशं विधिप्रियाहरिप्रियाशिवप्रियाः ॥५॥

पदाम्बुभूनतावलीवरप्रदानतत्परा
भवाम्बुराशिपारदापनैकधीपटीयसीः ।
घनाभकेशपारदाभकान्तिमुख्यरञ्जिता
भजेऽनिशं विधिप्रियाहरिप्रियाशिवप्रियाः ॥६॥

अतुल्यमङ्गलस्नसद्गुणाल्यधीनितप्रियाः
प्रणम्रलोकसर्वपापदन्तिकेसरिव्रजाः ।
मरालताक्ष्यपुङ्गवस्ववाहनाधरस्तनी-
र्भजेऽनिश विधिप्रियाहरिप्रियाशिवप्रियाः ॥७॥

कणादगौतमादिनाथदेवहूतिवर्ष्मज-
प्रमुख्यशास्त्रदानपण्डिताः स्वहृग्जितैणिकाः ।
कराम्बुजातमध्यशोभिवीणिकाक्वणन्नखा
भजेऽनिशं विधिप्रियाहरिप्रियाशिवप्रियाः ॥८॥

प्रणम्रसर्वकष्टतापदानसक्तचेतसाम्
अदोऽष्टकं तदापदानगापनैकतत्परम् ।
अभीष्टदायकं पठंस्तदीयभूर्यनुग्रहाद्
अनिष्टनाशपूर्वकेष्टसिद्धिभाजनं भवेत् ॥९॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीविधिमाधवशङ्करस्तुतिः

[द्रुतविलम्बितम्]

अखिललोकपतीन् सुरपूजितान् करुणयार्द्रहृदः प्रणतेष्टदान् ।
वचनसूकमलागिरिजाधवान् हृदि दधे द्रुहिणाच्युतशङ्करान् ॥१॥

इभमुखाखिलदान् वशसत्कलान् नतमुदब्धिविधून् विरतिप्रियान् ।
कमलभूफणिशाय्युडुनायकान्(रांघ्ररान्) हृदि दधे द्रुहिणाच्युतशङ्करान् ।२।

अमरकोटिनतान् सकलर्द्धिभाग्-भवविमोचनमुख्यपदार्थदान् ।
तनुजनारदमन्मथषण्मुखान् (विघ्नपान्) हृदि दधे द्रुहिणाच्युतशङ्करान् ।३।

नतकृपाञ्चितहृत्तनुलावणी-प्रमुखरम्यगुणालिजनिक्षितीः ।
कमलजाम्वुजदृङ्टिलेक्षणान् हृदि दधे द्रुहिणाच्युतशङ्करान् ॥४॥

अधरकान्तिपराजितविम्बमान् सुरसतीविनुतान्नयपूगदान् ।
तुहिनकृद्वदनान् स्थिरसौख्यदान् हृदि दधे द्रुहिणाच्युतशङ्करान् ॥५॥

प्रणवजापिपरान् (रतान्) प्रणवाकृतीन् विरतिमत्सुलभान् जगदीश्वरान् ।
जितसुवर्णधनेन्दुतनुच्छवीन् हृदि दधे द्रुहिणाच्युतशङ्करान् ॥६॥

त्रिजगती(भुवनी)सृजिरक्षणसंहृति-स्वकृतिचालितकर्म[लोक]रथाङ्गकान् ।
प्रणतसर्वशुभस्पृशितत्परान् हृदि रधे द्रुहिणाच्युतशङ्करान् ॥७॥

●

श्रीविधिरमणीस्तुतिः

मनसिजतदनुजवश्यस्वहृदयजनततिदूरे ।
अव विधिरमणिजिताक्ष व्रजजनसुलभपदाब्जे ॥ १ ॥

अदितिजदितिदनुजातोत्तमततिफलितनिजाङ्घ्रे ।
अव दितिजदितिकटाक्षप्रशमितकुमृतिजरादे ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धनलवविरहितमूका अपि जितधनपतिजीवाः ।
गदमणिपदनतिमात्राद् भगवति विधिदयितेऽव ॥३॥

क्षितिधरधरणिपवर्ष्मोद्भवतनुपतिसहजाते ।
क्षितिधरधरणिपदाम्बूद्भवनतजनकरुणाब्धे ॥४॥

करिरथहयचमुमुख्यस्पृशिरतनिजहृदयाब्जे ।
क्षितिधरधरणिहताङ्घ्रिश्रितजनकृतदुरिताले ॥५॥

निजपतिनिजसहजाताग्निजफणिपतिमुखवन्द्ये ।
क्षितिधरधरणिशरीरच्छविलवविजितसुवर्णे ॥६॥

परभृतशिखिशुकहंसा-भिमतिहृनिजरवलेशे ।
क्षितिधरधरणिशुकादिस्तुतनिजचरणसरोजे ॥७॥

पदयुगनतजनसर्वेप्सिततततिवितरणशक्ते ।
क्षितिधरधरणिवरस्पृग्भयहरमुखधरहस्ते ॥८॥

निरवधिनिरुपमसच्चित्सुखघनपरमपदार्थे ।
क्षितिधरधरणिसुमालीविलसितनिजशिरसीजे ॥९॥

क्षितिमुखभुवनचयालीसृजिमुखकृतिरतचित्ते ।
क्षितिधरधरणिपयोधिस्वरशनधरणिपतादे ॥१०॥

ज्वरमुखसकलनतार्त्तिप्रशमनपटुचरणार्चे ।
क्षितिधरधरणिनतालीहृदयगतमदनकान्ते ॥ ११ ॥

धृत विलिखितजपमालामृतघटमुखकरयुग्मे ।
क्षितिधरणिविकारव्रजलवरहितमनोऽब्जे ॥१२॥

स्वरमणदितिजहगौरीपतिमुखविबुधवरेण्ये ।
क्षितिधरधरणिपदाब्जे भगवति विधिदयितेऽव ॥१३॥

शमदममुखगणरत्नस्पृशिरतहृदयपयोजे ।
क्षितिधरधरणिविनम्रश्रमततिहरणनिषक्ते ॥१४॥

रवितनुभवमुङ्मुख्याखिलभयहरपदचिन्ते ।
क्षितिधरधरणिनताथ व्रजसहृनिजहृदयाब्जे ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तनुबलधनसदनायुर्गृहसुतसकलकलादिम् ।
स्वचरणनुतिपठनाद् गीर्वितरति सकलमभीष्टम् ॥१६॥

●

श्रीविधिहरिहरस्तवः

स्मरक्रुधागृधिमदमोहमुख्यनि-
र्जितालिदुर्लभचरणाम्बुसम्भवान् ।
विरागिसन्ततिसुलभाङ्घ्रितोयजान्
सरोजभूसरसिजदृग्धरान् भजे ॥१॥

उमारमावचनततिप्रसूशची-
मुखाङ्गनाकुलमणिगीतवैभवान् ।
भजत्कुमृत्यखिलरुजाजराहरान्
सरोजभूहरिगिरिशान् विभावये ॥२॥

निराकृतामरगुरुयक्षपेडह-
ङ्कृतिस्ववाग्धनकणिका भवन्त्यरम् ।
जडस्वधीधनरहिता यदानतेः
पयोजनुर्जनिहरिशङ्करान् भजे ॥३॥

सुवर्णभूधरनिवसद्धिमाद्रिभू-
सहप्रभूहिमधरसम्भवाधवान् ।
कृपार्णवस्वहृदयनीरसम्भवान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥४॥

पदाम्बुजस्मृतिसुलभीकृतेभराट्-
तुरङ्गमद्रविणचमूरथादिमान् ।
भजत्कृताखिलवृजिनव्रजापहान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

फणिप्रसूश्वशुरगुरूरगाधिप-
स्वविष्टराहिमणिकृतस्वभूषणान् ।
सुवर्णवार्धरशशिजिन्निजच्छवीन्
सरोजनुर्जनिहरिशङ्करान् भजे ॥६॥

स्वरुल्लसत्करवनभूपराशरो-
द्भवाङ्गभूप्रमथगणादिसंस्तुतान् ।
पुमुत्तमाभिधपरमाक्षराकृतीन्
सरोजनुर्जनिहरिशङ्करान् भजे ॥७॥

निराकृताभिमतिखगाधिराण्मरुन्-
मनोजवं नतसकलेप्सितप्रदान् ।
श्रुतिव्रजोदितपुरुषार्थदायकान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥८॥

त्रिविष्टपक्षितिरुहसंजनुःसुम-
व्रजार्चितस्वपदपयःसमुद्भवान् ।
नताशयस्थगितनिजाङ्घ्रिपल्लवान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥९॥

वसुन्धराप्रमुखसमस्तलोकसं-
चयातलप्रभृतितलव्रजाधिपान् ।
वसुन्धराधवपदभाक्पदानतान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥१०॥

कराम्वुजादृतवरदाभयादिम-
स्वमुद्रिकाविशदितहृत्प्रवृत्तिकान् ।
अपस्मृतिज्वरमुखरुङ्निवर्हणान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥११॥

निराकृतासुरमतिवृत्तिकीकृत-
स्वपादुकाप्रणतिपराशयव्रजान् ।
भजन्मनोविकृतिहरस्वसंस्मृतीन्
सरोजनुर्जनिहरिशङ्करान् भजे ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुलोमभूधवदिविभूमुखार्कभू-
जलाधिपानिलमुखदेवमण्डलैः ।
समर्चितस्वचरणपाथउद्भवान्
सरोजनुर्जनिहरिशङ्करान् भजे ॥१३॥

पदामृतप्रभवयुगीसमर्चना-
कणार्पितप्रशमदमादिसद्गुणान् ।
नतश्रमव्रजहृतिचुञ्चुसंस्मृतीन्
सरोजनुर्जनिहरिशङ्करान् भजे ॥१४॥

यमादिभीनिकरहृतिप्रभाविता-
समुल्लसद्यमनियमादिदायकान् ।
नतव्रजाखिलदुरितक्षमानिधीन्
सरोजनुर्जनिहरिशङ्करान् भजे ॥१५॥

श्रीविधिहरिशंकरस्तवः

[प्रहर्षिणी]

वाग्देवीजलनिधिजाशिवाभिकाम्यान्
वृत्रघ्नप्रभृतिनिलिम्पकोटिनम्यान् ।
कारुण्यप्रमुखगुणोत्तमालिरम्यान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥१॥

वाग्जालप्रसभकृदब्धिजातकाया-
मीनाक्षीहृदयसरोजघस्रनाथान् ।
हैरण्योदरजलशायिनीलकण्ठान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥२॥

घस्रेशामृतधरशर्वरीशकान्तीन्
कञ्जोत्थाम्बुजदृगबुद्भवारिमौलीन् ।
मारीचस्मरशुचिजातमुख्यतातान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाथोजामृतनिधिभूधरस्ववासा–
हंसीशद्यु गपतिपुङ्गवस्ववाहान् ।
जिह्वाग्रस्वहृदयसक्थिकान्तान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥४॥

वीणाधृद्विरचितवेणुवल्लकीधृद्–
वाणीमाधरणिधरेशसम्भवानाम् ।
पीनोरःप्रभवकलेवरोपगूढान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥५॥

एकाङ्कप्रजनकताशीतरश्मि–
भामाब्धिप्रभवविराजितोत्तमाङ्गान् ।
भानुश्रीघननिभपारदाभकायान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥६॥

काणादाक्षचरणदेवहूतिपुत्र–
वाय्वाशिक्षितिपतिरूपजैमिनीनाम् ।
व्यासस्य प्रथितनयालिबोधदातॄन्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥७॥

भक्तेष्टस्पृशिधूतकल्पवृक्षान्
संसाराभिधजलराशिवाडवाग्नीन् ।
भृङ्गाम्भोदरभुजगाभशीर्षजातान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥८॥

हस्तश्रीविभवपरास्तपङ्कजातान्
वस्त्रन्यक्कृतशरदम्बुवाहजालान् ।
पादाम्भः प्रभवनमद्वरप्रदातॄन्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥९॥

निर्दग्धप्रणतकृताखिलाघपूगान्
संसारामृतनिधिपारदातृपादान् ।
मूर्द्धोत्थच्छविजितनीरदातृदर्पान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णाहिद्युतिनिजकुन्तलाढ्यशीर्षान्
कृत्ताङ्घ्रिप्रणतकृतान्तभीतिपाशान् ।
कार्पण्यक्षपणकृपाम्बुराशिचित्तान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥११॥

इष्टालीवितरणदीक्षितैकचिन्तान्
कष्टालीप्रशमनकार्यपूर्वभारान् ।
शिष्टालीसततसमर्चिताङ्घ्रियुग्मान्
वन्देऽहं विधिहरिशङ्करानजस्रम् ॥१२॥

श्रीविधुस्तुतिः

[माणवकम्]

पादयुगीभक्तिमतामध्वरभुग्भूमिरुहम् ।
संसृतिभीमुख्यहरस्वाङ्घ्रिनुतिं नौमि विधुम् ॥१॥

व्योमजनुर्भोजिपयोधारिलसन्मस्तकजं (शीर्षरुहम्) ।
अम्बुजनेर्जातिरिपुस्वीयकरं नौमि विधुम् ॥२॥

शारदवाःश्राणकभादर्पहरस्वीयपटम् ।
नैजपदाम्भोजनताभीप्सितदं नौमि विधुम् ॥३॥

दक्षतनूजाविततिह्लादभरस्पर्शिकरम् ।
देवगणप्रीतिकरं श्रीवसुधं नौमि विधुम् ॥४॥

तप्तजनव्रातसुखश्राणिसुधादीधितिकम् ।
पद्मजहृत्क्सम्भवहृग्जाततनुं नौमि विधुम् ॥५॥

पादपयोजातनमन् मृत्युभयाद्यार्तिहरम् ।
दीननतव्रातकृपाम्भोधिहृदं नौमि विधुम् ॥६॥

पर्वतजाहृत्कमलादीप्यशिरोरत्नकलम् ।
व्यासतनूजातमुखस्तव्यपदं नौमि विधुम् ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतजनाभीष्टकनत्स्वर्णमुखस्प्रष्टृनतिम् ।
संसृतिसञ्ज्ञाम्वुनिधेः पोतमहं नौमि विधुम् ॥८॥

भीतिहराभीष्टततिस्पर्शचणस्वीयकरम् ।
लोचन[1]पन्मुख्यनयश्राणिपदं नौमि विधुम् ॥१०॥

●

श्रीविश्वामित्रर्षिस्तुतिः

[स्रग्धरा]

गीर्वाणेड्यस्वशक्ति हृतकुमतिजरं नम्रमार्गीविधूत–
स्वर्गीशाचार्यदर्पं स्मरमुखविमुखं रागहीनाप्यपादम् ।
हृस्त्यादिस्प्रष्टृपूजं नतदुरितहरं तापसोत्तंसरत्नं
विश्वामित्रं प्रपद्ये सकरुणहृदयं चित्तपाथोजमध्ये ॥१॥

श्रीकाकुत्स्थार्चिताङ्घ्रि कलिफणिगरुडं कान्तिधूताम्वुवाहं
यं शं श्रीचक्रपाणिर्निरवधिशुभदं पादभक्तक्षमाजम् ।
भक्तक्षोणीशतादं सुमशरविमुखं बोधिनम्रस्वरूपं
विश्वामित्रं प्रपद्ये त्रिभुवनविदितं चित्तपाथोजमध्ये ॥२॥

सच्चिन्मुद्राढ्यहस्तं मतिशमलहरं रोगसङ्घातनाशं
कान्तात्रेयावतंसं यमिनुतविभव शोषितव्रह्मलक्ष्मीम् ।
मन्तुव्रातक्षमाब्धि श्रम [हृति] मुखदं कृत्तनम्रश्रमालि
विश्वामित्रं प्रपद्ये यममुखजलधिं चित्तपाथोजमध्ये ॥३॥

●

विष्णुस्तोत्रम्

[विद्युन्माला]

पादाम्भोभूभक्ताशेषा–भीष्टस्प्र (स्पृ) ष्टृस्वर्गक्ष्माजम् ।
भूयोजन्मप्राणोत्क्रान्ति–भीतिघ्नं श्रीविष्णुं वन्दे ॥१॥

---

१. अक्षपाद न्याय

२३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अम्भोभूगर्भशेषाहङ्कारन्यक्कृत्पादद्वन्द्वम् ।
भृङ्गाम्भोधृद्भोगिभ्राजच्छीर्षोद्भूतं विष्णुं वन्दे ॥२॥

नम्राशेषाभीष्टव्रात–स्पर्शाद्युक्तस्वीयस्वान्तम् ।
स्वर्णाहिङ्कृत्युच्छ्रद्वर्ण–भ्राजद्वस्त्रं विष्णुं वन्दे ॥३॥

पीयूषाशिव्राताधीशा–नम्यस्वीयाङ्घ्र्यम्भोजातम् ।
पाथोरायंगोद्भूताङ्घ्रि–काम्यस्वाणं विष्णुं वन्दे ॥४॥

भक्तव्रातोऽभ्युद्धृद्वीक्षा–रम्यस्वीयस्वाताम्भोजम् ।
लङ्केशच्छित्कंसाराति–मुख्याकारं विष्णुं वन्दे ॥५॥

कृत्तस्वाङ्घ्रिप्राणम्राली–मृत्युक्लेशस्वीयापाङ्गम् ।
कारुण्यो (याम्)भोराशीभूत–स्वान्ताम्भोजं विष्णुं वन्दे ॥७॥
मेनारम्भोर्वश्यादिस्व–र्नारीजालाराध्यस्वाङ्घ्रिम् ।
स्वर्गिज्येष्ठोत्सङ्गोद्भूता–दीड्यं (शान्तं) विष्णुं वन्दे ॥७॥
स्वर्णन्यक्कृत्पर्णस्वर्ण–श्राणिस्वर्णाधीश्रीकान्तम् ।
संसाराम्भोराशौ मग्ना–नम्रोत्तारं विष्णुं वन्दे ॥८॥
यानीभूतव्योमोद्भूत–स्वाहारालीवंशारातिम् ।
पादाम्भोजप्राणम्राली–पापालिघ्नं विष्णुं वन्दे ॥९॥
चक्राम्भोजाम्भोजद्वन्द्व–भ्राजद्धस्ताम्भोजव्रातम् ।
स्वीयश्यालन्यक्कृत्क्रान्ति–स्वास्याम्भोजं विष्णुं वन्दे ॥१०॥
काणादाक्षस्वान्ध्यम्भोभू–कृष्णद्वीपोद्भूताद्यार्च्यम् ।
पीनोत्तुङ्गोरोजश्लेपि–स्वीयोरस्कं विष्णुं वन्दे ॥११॥
ईषन्मात्रं नम्रालीनां सद्यः कष्टव्रातघ्नाङ्घ्रिम् ।
सर्वाभीष्टव्रातश्राणि–स्वेक्षालेशं विष्णुं वन्दे ॥१२॥

•

श्रीविष्णुत्रिविक्रमाष्टकस्तुतिः

[हरिणी]

प्रणतजनतासर्वाभीष्टप्रदायिसुरद्रुमौ
भवजलनिधौ मग्नानम्रोद्धृतिव्रत नाविकौ ।
निजकररुचा भग्नस्वाहंकृताम्बुसमुद्भवौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदनतवरव्रातस्पर्शप्रतुष्टहृदम्बुजौ
चरणविनमत्काम्याधीदस्वपादरजःस्मृती
दिनकरकरभ्राजत्स्वीयाम्बरवृत्तवर्ष्मकौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥२॥

त्रिभुवनवसन्रम्यस्वीयाङ्घ्रिनीरजनुयुगौ
नतजनकृपारम्यस्वान्तप्रवृत्तिपरम्परौ ।
निजपुरूतपःकृतस्वीयप्रणम्रकृतान्तकौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥३॥

यमनियमभृद्वर्यस्तव्यस्वपादपयोजनी
चरणकमलोद्भूतद्वन्द्वप्रणम्रवरप्रदौ ।
कनकविमुखस्वान्तौ स्वर्णप्रदस्वपदार्चनौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥४॥

अमितकरुणापारावारस्वचित्तपयोरुहौ
सुगतिरहितप्राणम्रालीभवाम्बुधिपारदौ ।
हृदयदहनक्लेशव्रातप्रतप्तकृपाम्बुधी
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥५॥

दृशिपदकणाद्देवाह्वाभूपतञ्जलिजैमिनि-
श्रुतिततिपृथक्कर्तृकार्यस्पृगङ्घ्रियुगस्मृती ।
चरणविनमत्पापारण्यप्रदग्धृदवानलौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥६॥

रचित विनतावर्ष्मोद्भूतस्ववाहसमर्चनौ
करतललसद्धात्रीतुल्यात्मतत्त्वविबोधनौ ।
करविशदिताभीतिज्ञानप्रसादकमुद्रिकौ
परगुरुगुरू वन्दे विष्णुत्रिविक्रमतीर्थपौ ॥७॥

चरणनलिनद्वन्द्वभक्तव्रजार्तिदकष्टकृद्-
दुरितशमनभ्राजन्मोदप्रसूनिखिलेष्टदौ ।
प्रभवतमदःपादाम्भोभूपरायणमष्टकं
झटिति (सपदि) पठतामष्टैश्वर्यप्रदानजतुष्टिदौ ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवीरभद्रस्तवः

नैजपदाम्वुजन्मयुगलीस्मृतिलवकृतां
सर्वमनोरथस्पृशिविधौविजितसुरतरो ।
पालय वीरभद्र सततप्रभवमृतिजनुः
साध्वसमुख्यशान्तिकरणस्वचरणशरभूः ॥१॥

भीकरशस्त्रसन्ततिलसन्निजकरवनभू
धारितनम्रकाङ्क्षितवरप्रदभयशमन (हरणम्) ।
दारशरीरनाशजरुषा विवशशिवजटा-
सम्भव वीरभद्र मामव सततम् ॥२॥

पादविनम्रसर्वजनताहृदयगसकला-
भीष्टकदम्वदानमुदितस्वहृदयकमल ।
साध्वसवेपमानदिविषन्मुनिमुखज-
वन्दितवीरभद्र सततप्रभवमृतिजनुः ॥३॥

दुष्टविनाशनव्रतधरस्वचरणशरण
प्राप्तजनावनादिनियमव्रजरुचिरमते ।
वन्दनकृत्कृतान्तभयहृत्स्मृतिपद पयसि-
सम्भव वीरभद्र सतत प्रभवमृतिजनुः ॥४॥

संसृतिसम्भवागणितशुक्कलिमलसहन
क्लेशितदीननम्रकरुणाजलनिधिहृदय ।
मामव वीरभद्र करुणप्रणयविनययुग्
दक्षकलत्रदक्षविहितस्तुतिमृदिलीनहृदय ॥५॥

अङ्घ्रिपयोरुहानतमनोरथकनकसती-
वर्ष्मजगेहमुख्यसकलप्रदनिजचरण ।
पारविवर्जितार्तिभयहृत्पद्मनिघेवसति-
पारद वीरभद्र सततप्रभवमृतिजनुः ॥६॥

जन्मसहस्रकोटिविहितामितवृजिन
वनप्लोषकदावदेववदनस्मृतिकणचरण ।
रुद्रपदाब्जसेविसकलप्रमथगणगणा-
धीश्वर वीरभद्र सततप्रभवमृतिजनुः ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम्रसमस्तकष्टनिकरप्रशमनसहिता-
भीष्टसमस्तदापनपटुस्वचरणविनते ।
व्यासकणात्पतञ्जलिमुखग्रथितनयचय-
ज्ञानद वीरभद्र सततप्रभवमृतिजनुः ॥८॥

•

श्री वेदं वेंकटरायशास्त्रीस्तवः

[प्रमदाननम्]

मतिदोषहान्विजितान्तरारिनिकायलब्धपदाम्बुजान्
बुधसंस्तुतान्प्रणमज्जराकुमृतिप्रमुख्यहराङ्घ्रिकान्
सुरदेशिकद्रविणेशजिद्वचनार्थदस्वपदार्चनान्
करुणानिधीन्हृदि नौमि वेंकटरायशास्त्र्यभिधान्गुरून् ॥१॥

भुजगेशशायिगिरीन्द्रजारमणादिनिर्जररूपकान्
विदधीश्वरान् प्रणताखिलाघनिवारणप्रवणाशयान्
कनकद्युतीन्गणनाविवर्जितपण्डितव्रजदेशिकान्
परमार्थदान् हृदि नौमि वेंकटरायशास्त्र्यभिधान्गुरून् ॥२॥

निखिलेष्टदान् पुरुषार्थदानपरायणस्वहृदम्बुजान्
वनजेक्षणान्प्रणतावलीहृदयेप्रकाशिततत्त्वकान्
जगदाहृताञ्जरमुख्यसर्वरुजानिवर्हकपत्स्मृतीन्
हृतकल्मषान् हृदि नौमि वेंकटरायशास्त्र्यभिधान्गुरून् ॥३॥

अभयप्रदान्धिषणाविकारविवर्जितत्वमुखप्रदान्
कविपुंगवान् शमदान्तिमुख्यसमस्तसद्गुणशेवधीन्
श्रमकृन्तकान्प्रणमत्कृताखिलमन्तुसंततिमर्षकान्
यममुख्यदान् हृदि नौमि वेंकटरायशास्त्र्यभिधान्गुरून् ॥४॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीवेंकटरायशास्त्रिचरणस्तवः

[शार्दूलविक्रीडितं]

पादाब्जश्रितपोषकान्भवभयप्रध्वंसनैकव्रतान्
विद्यादानपरायणान्कलिहराङ्घ्रिद्वयावलीपूजितान् ॥
साहित्यादिकदम्बपण्डिततते: पाण्डित्यगर्वापहा-
ञ्छ्रीमद्वेंकटरायशास्त्रचरणान्विद्यासमष्टीन् भजे ॥१॥

संख्याहीनमनोज्ञसद्गुणलसच्चित्तादिराज (भास्व) न्महा-
विद्वद्वृन्दगुरून्नतेष्टवरदान्संसारपारप्रदान् ॥
आस्तिक्यादि गुणार्णवान्हरिहराङ्घ्र्यम्भोजभृङ्गाशयान्
श्रीमद्वेंकटरायशास्त्रिचरणान्विद्याम्बुधीन्भावये ॥२॥

कारुण्यार्द्रहृदः कलङ्करहितान्कार्तस्वराङ्गच्छवीन्
भक्ताघौघभुजङ्गगारुडमणीञ्छास्त्रालिवैदुष्यदान् ॥
एणाङ्काधिकशीतलस्वहृदयान्वाणीविलासास्पदं
वेदं वेंकटरायशास्त्रिचरणान्प्रत्यक्षवाणीं श्रये ॥३॥

●

अथ श्रीवेङ्कटेशस्तवः

[शालिनी]

ब्रह्माण्डालिसृष्टिरक्षोपसंहृत्यादिस्वीयाशेषकार्यप्रवीणम् ।
ब्रह्मोमेशानङ्गमुख्यार्चिताङ्घ्र्यम्भोजद्वन्द्वं वेङ्कटेशं प्रणौमि ॥ १ ॥

हस्त्यश्वादिश्रीसमस्तावनीशश्रेष्ठत्वस्पृक्स्वप्रणामाद्युपायम् ।
अम्भोराशिप्रोद्भवाहृत्सरोभूधस्त्राधीशं वेङ्कटेशं प्रणौमि ॥ २ ॥

विद्याव्राताधीश्वरीकारितस्वपादाम्भोजोद्भूतधूलीप्रणम्रम् ।
स्वीयश्यालालङ्कृतस्वीयशीर्षश्यालीभूतं वेङ्कटेशं प्रणौमि ॥ ३ ॥

आत्मोद्भूतप्रोद्भवस्वीयजग्धिव्रातक्षौणीपालभोगस्वतल्पम् ।
पादाम्भोजानम्रसर्वेप्सितालीस्पर्शप्रीतं वेङ्कटेशं प्रणौमि ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीर्वाणालीमस्तकोद्भास्यनर्घकोटीरालीरत्ननीराजिताङ्घ्रिम् ।
नम्रालीनां तूर्णसंस्पृष्टसर्वस्पर्द्धिव्रातं वेङ्कटेशं प्रपद्ये ॥ ५ ॥

त्रैलोक्यस्थाशेषभूतिस्वरूपश्रीलक्ष्मीसंश्लिष्टदिव्यस्वकायम् ।
तद्धस्ताब्जस्पर्शितस्वानतेष्टं द्रव्यव्रातं वेङ्कटेशं भजेऽहम् ॥ ६ ॥

विघ्नध्वान्तादित्यनैजाङ्घ्रिधूलिक्रौञ्चाद्रिच्छिन्मातुलस्वीयरूपम् ।
अब्जोद्भूताब्जारिधृत्पूज्यमानस्वाङ्घ्रिद्वन्द्वं वेङ्कटेशं प्रपद्ये ॥ ७ ॥

निर्व्याजादिस्वीयभक्तानुकम्पाप्रेमोद्रेकानुग्रहोत्पत्तिधात्रीम् ।
श्रीवाग्देवीनैजकान्तानुजातापौलोमोड्यं वेङ्कटेशं प्रपद्ये ॥ ८ ॥

फालस्थाक्षोत्पत्तिभूनैजफालजन्माधारस्वीयनाभ्युत्थपद्मम् ।
लावण्याम्भोराशिवेलानिजाङ्गमुह्यत्पद्मं वेङ्कटेशं प्रपद्ये ॥ ९ ॥

एणैणाङ्कोत्तप्तकायाभिमानोच्छेदिप्रेयस्यक्षियुग्मस्वनेत्रम् ।
अङ्गच्छायालेशनिर्भत्सिताभ्राहाङ्कारालि वेङ्कटेशं प्रपद्ये ॥ १० ॥

बिम्बन्यक्कृद्वल्लभास्वाधरोष्ठपीयूषांशुस्वीयकान्तीयजिह्वम् ।
पद्युग्मार्चालेशसम्प्राप्यसर्वभद्रव्रातं वेङ्कटेशं प्रपद्ये ॥ ११ ॥

निर्व्याजाङ्घ्रिप्राणताशेषदीनकारुण्याब्धिस्वीयचेतोऽम्बुजातम् ।
भक्तालीष्टव्रातसंस्पर्शनाङ्घ्रिदीक्षाबद्धं वेङ्कटेशं प्रपद्ये ॥ १२ ॥

रागद्वेषोन्मुक्तनैजान्तरङ्गयोगिव्रातप्राप्यपादारविन्दम् ।
नम्रानन्दोद्रेकपीयूषसिन्धो राकाचन्द्रं वेङ्कटेशं प्रपद्ये ॥ १३ ॥

ॐकारार्णमन्त्रवर्णाः समस्ता यन्नानाख्याकारसम्बोधनार्थाः ।
ॐकारादिध्यानसक्तान्तरङ्गप्रीतात्मानं वेङ्कटेशं प्रपद्ये ॥ १४ ॥

आन्तर्मुख्योद्रेकजाशेषबाह्यवस्तूपेक्षस्वान्तवृत्त्याशुलभ्यम् ।
काणादाक्षस्वाङ्घ्रिमुख्योक्तसर्वशास्त्रालीढं वेङ्कटेशं प्रपद्ये ॥ १५ ॥

अङ्गोद्भूतानन्तकोऽयब्जजाण्डवर्तिव्राताहङ्कृतिच्छेददक्षम् ।
भक्तव्राताशेषसन्तापनाशाभीष्टालीढं वेङ्कटेशं प्रपद्ये ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ श्रीवेंकटेशी-तिरुपतिस्तोत्रम् ॥

[मालिनी]

चरणसलिलजन्मद्वन्द्वयुग्मार्चनादि-
प्रवणहृदयकाङ्क्षापूर्त्तिकृत्कल्पवल्लीम् ।
अनिशजनिमृतिस्वाकारसंसारसिन्धु-
प्रपतितजननौकां वेङ्कटेशीं भजेऽहम् ॥१॥

निजनमदखिलेष्टश्राणनाभीतिदान-
स्वकृतियुगचिन्हभ्राजदम्भोजपाणिम् ।
सलिलधरषडङ्घ्रिव्योमजाताशिरात्रि-
च्छविलसितशिरोजां वेङ्कटेशीं भजेऽहम् ॥२॥

दिनकरकरदीप्तस्वर्णवर्णस्ववासो-
वृतकनकमयालङ्कारभाग्मर्मगात्रीम् ।
निजपदनतसङ्घप्रार्थिताशेषवस्तु-
वितरणनियमाढ्यां वेङ्कटेशीं भजेऽहम् ॥३॥

भुवननिकररक्षाभारभर्तृप्रभाव-
परमपुरुषकाम्यस्वीयसर्वाङ्गरम्याम् ।
वचनततिसवित्रीजानिगौरीशशक्र-
प्रमुखदिविजनभ्यां वेङ्कटेशीं भजेऽहम् ॥४॥

चरणशरणगालीपालनस्वीयदीक्षा-
प्रभृतिनियमबद्धस्वीयकृत्यालिरम्याम् ।
जनकतनुसमुत्थां रुक्मिणीरूपधर्त्रीं-
धृतनिजनवरूपां वेङ्कटेशीं भजेऽहम् ॥५॥

सकरुणनिजवीक्षालेशकृत्तानतालो-
यमभयमुखसर्वक्लेशपारम्परीं द्राक् ।
पदनतजनरक्षाजागरूकस्वचित्ता-
कृतिपुरुकरुणाब्धिं वेङ्कटेशीं प्रपद्ये ॥६॥

कमलभवनकान्तामेनकावर्ष्मजाता-
त्रिदशनृपतिपत्नीमेनकाद्यर्चिताङ्घ्रिम् ।
त्रिभुवनसृजिकर्त्तृत्सङ्गभूव्यासपुत्र-
प्रकथितमहिमानं वेङ्कटेशीं प्रपद्ये ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निजपदवनजन्मासक्तिभागीप्सितार्थ-
द्रुतवितरणमात्रप्रीतनैजान्तरङ्गम् ।
भ्रमरभुजगवारिश्राणकाशेषदर्प-
हृतिचरणनिजवेणीं वेङ्कटेशीं भजेऽहम् ॥८॥

तटपरिमितिहीनागाधसंसारपाथो-
निधितटदपदाम्भोजातयुग्मप्रसादाम् ।
अगणितजनिजालव्रातसम्पादितांहो-
निकरवनदवाग्निं वेङ्कटेशीं भजेऽहम् ॥९॥

कठिनघननिजोरोजातपैवर्यतौङ्ग्या-
पहृतधरणिधर्तृव्रातसर्वाभिमानाम् ।
कमलयुगलशङ्खस्यन्दनाङ्कादिराज-
न्निजकरकमलालिं वेङ्कटेशीं भजेऽहम् ॥१०॥

अधरविजितबिम्बां स्वास्यधूतामृतांशुं
नयनजितकुरङ्गीं दन्तनिर्धूतकुन्दाम् ।
नयनपदकणादव्यासजैमिन्यहीश-
प्रमुखविनुतपादां वेङ्कटेशीं भजेऽहम् ॥११॥

करुणनिजकटाक्षाकारवाणालिरीण-
प्रणतविततिकष्टाकारशत्रुव्रजासुम् ।
नतजननिखिलेष्टस्पष्टपस्तोत्रचिन्ता-
प्रमुखसुलभकृत्यां वेङ्कटेशीं भजेऽहम् ॥१२॥

श्रीवैरोचनिश्रीवामनस्तोत्रम्

[भाराक्रान्ता]

विन्ध्यालयम्भोनिधिजनिधवौ दन्तावलादिप्रदौ
पापघ्नाङ्घ्री भुजगपतिसंस्तव्यमाहात्म्यलेशौ ।
अभ्रच्छायौ शुकमुखमुनिव्रातगीतापदानौ
कारुण्याब्धी मनसि कलये वैरोचनिं वामनम् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योगिध्येयौ विधिहरमुखस्वर्गिप्रकाण्डेडितौ
रागघ्नाङ्घ्री विरतिनिरतप्राप्याङ्घ्रिपाथोसहौ ।
देवाल्यर्च्यौ कृतनतिजराद्दुर्मृत्युमुख्यापहौ
विश्वात्मानौ मनसि कलये वैरोचनिं वामनम् ॥२॥

यक्षाधीशत्रिदशगुरुधिक्कर्तृनम्रार्थवाचौ
विज्ञानार्कौ प्रणतजनताभीष्टालिसंस्पर्शकौ ।
भक्तोर्वीशौ त्रिभुवनगताशेषात्मबोधप्रदौ
रोगालिघ्नौ मनसि कलये वैरोचनिं वामनम् ॥३॥

भीत्यालिघ्नौ कुजनदमनप्रौढात्मविक्रान्तकौ
देवैः शान्त्यै स्थलजलसरोजातादिपुष्पार्चितौ ।
संसारघ्नौ प्रणतवृजिनव्रातक्षमासागरौ
योगालीदौ मनसि कलये वैरोचनिं वामनम् ॥४॥

●

श्रीव्यासकीरस्तुतिः

[सुवदना]

कृष्णादीड्यस्वबोधौ त्रिदशदितिजराट्काम्यस्वविभवौ
कृम्यादिब्रह्मरूपाहृतनतमृति (भव) तारतम्यात्मसुगुणौ ॥
कृत्स्नाज्ञानीकृपाब्धी त्रिभुवनजनतानम्यस्वचरणौ (नम्याङ्घ्रिकमलौ)
वन्दे श्रीव्यासकीरौ श्रुतिशिखरसुधास्पर्शप्रियहृदौ ॥१॥

रात्रीशाभ (पीयूषांशु) स्वकेशौ सलिलधरशुकच्छायाञ्चिततनू
वीणापाण्यात्मभूतौ नतजनदुरितक्ष्माजातपरशू ॥
एणाक्षीपीनवक्षोभवमुखविमुखस्वान्ताम्बुजनुषौ
वन्दे श्रीव्यासकीरौ श्रुतिशिखरसुधास्पर्शप्रियहृदौ ॥२॥

प्रालेयव्योमवस्त्रौ भवभयशमनस्वीयाङ्घ्रिविनती
भक्ताभीष्टालिदार्यौ हिमकरकररुक्केशौ हृदि भजे
श्रीवेदव्यासकीरौ श्रुतिशिखरसुधास्पर्शप्रियहृदौ ॥३॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीव्यासादिपञ्चकस्तोत्रम्

[हरिणी]

अखिलविदं शुकादिकलितं करुणाम्बुनिधिं
शुभविभवदं गणेशविनुतं कमलेशकलाम् ।
श्रुतिततिशीर्षं सूत्ररचनोद्धृतमुक्तिरतं
हृदिकलये पराशरसुतं निजशिष्ययुतम् ॥१॥

[ताटङ्कम्]

करुणारम्यज्ञानसुधाब्धीन्कृष्णादीडितनिजबोधान् ।
माधिपधवलःस्वजटाजूटान्करकांतिन्यक्कृतपद्मान् ॥
शरदंभोधरजित्वर वलनान् वरवरदापनतुष्टधियो ।
व्यासं जैमिनिवैशंपायनपैलसुमन्तून्वन्देऽहम् ॥१॥

नतजनकाम्यश्राणननिपुणानास्तिकनम्यस्वपदाब्जान् ।
मेनाद्याकृत्यचलितचित्तान्शौनकमुख्यादृतविभवान् ॥
खरभवपारदपादाम्भोजान् शारदशर (शश) [जल]
धरनिभकेशान् ॥ व्यासं..............................

श्रीशृंगगिरिक्षेत्रे श्रीगिरिजापतिशारदास्तवः

[द्रुतविलम्बितम्]

भजदभीप्सितदे भवभीहरे भुजगभृङ्गकचे जलभूकरे ।
वरवितारिपदे सितवाससी हृदि भजे गिरिजापतिशारदे ॥१॥

प्रणतकामितदे सुरपूजिते बहुलरम्यगुणे हरिसत्कृते ।
कृतकृतान्तहृते करुणार्णवौ हृदि दधे गिरिजापतिशारदे ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदनतोर्वशिके तुहिनप्रभे कनकदानरते कमलेक्षणे ।
भवपयोनिधिपारदसंस्मृते हृदि भजे गिरिजापतिशारदे ॥३॥
विनतपापहरे घनकुन्तले वृषमरालगते शशिशेखरे ।
डमरुशोभिकरं धृतवेणिकां हृदि दधे गिरिजापतिशारदे ॥४॥

●

श्रीशृङ्गगिरिपीठाधीश्वर-श्रीदेशिकभूपस्तोत्रम्

[कुसुमविचित्रा]

विषयविरागप्रथितजिताक्षव्रजनुतपादाम्बुजभवधूलिम् ॥
नतजनवन्धच्चिदिचणवीक्षंकलये हृदि देशिकभूपम् ॥ १ ॥

निजचरणाम्भः प्रभवनताचीनिखिलहृदिष्टप्रदपदचिन्तम् ॥
अतटकृपाम्बुधिनिजहृदयाब्जं कलये हृदि देशिकराजम् ॥ २ ॥

अगणितविद्यागणलसितास्यंविषयनिकायस्पृहिरहिताप्यम् ॥
प्रणतजनाची मृदुदधिचन्द्रं कलये हृदि देशिककुलदीपम् ॥ ३ ॥

उडुपसगर्भ्या धृदुडुपगङ्गाधरविधिमुख्यामरततिरूपम् ॥
नमदखिलार्तिव्रजफणिताक्ष्यं (गरुडं)हृदि कलये श्रीदेशिकभूपम् ॥४॥

तृणलघुताधीकलितसुरालीपतिमुखशीर्षस्थमणिकिरीटम् ॥
नतवरदानव्रतकृतदीक्षंहृदि कलये श्रीदेशिकराजम् ॥ ५ ॥

नतजनकाङ्क्षाविषयपदार्थप्रदकरुणाढ्यस्वलवकटाक्षम् ॥
गुरुपतिमोदप्रदमतितैक्ष्ण्यं हृदि कलये देशिककुलदीपम् ॥ ६ ॥
अविरतकष्टानुभवविषण्णप्रणतजनालीकरुणहृदब्जम् ॥
अधिगतविद्योकृतपदनम्रं हृदि कलये श्रीदेशिकभूपम् ॥ ७ ॥

अपजितशोणाम्बुभवनिजाङ्घ्रिद्वयभवधूलीहृतनतपापम् ॥
कणभुगहीन्द्राद्यखिलनयज्ञंहृदि कलये श्रीदेशिकराजम् ॥ ८ ॥

अखिलविधार्तिप्रचयनिदानप्रजनकभेदच्छिदिपटुवाक्यम् ॥
विजितनिजाक्षव्रजकलिताङ्घ्रि हृदि कलये देशिककुलदीपम् ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शमनजमुख्याखिलभयपूगप्रशमनदक्षस्वचरणभक्तिम् ॥
मनसिजरोषाधीनविदूरं हृदि कलये श्रीदेशिकभूपम् ॥ १० ॥

वचनसवित्रीजलधितनूजागिरिजनिपादाम्बुरुहमराल (षडङ्घ्रि) म् ॥
झटिति वितीर्णाखिलविधभूतिंहृदि कलये श्रीदेशिकराजम् ॥ ११ ॥

भपतिकलाधृद्धृतयतिरूपं क्षितिगुरुपादामृतभवभृङ्ग (हंस) म् ॥
इहपरसौख्यप्रदपदपूजं हृदि कलये देशिककुलदीपम् ॥ १२ ॥

श्रीशृंगपीठाधीश्वर
श्रीक्षितिगुरु-श्रीनृसिंहगुरु-दशकस्तोत्रम्

[द्रुतविलम्बितम्]

पदनमत्करुणार्णवचेतसः श्रुतिशिरःकथितात्मपरायणान् ॥
परमवस्तुसमिच्छुवनव्रतान्क्षितिगुरून्नरसिंहपदान्भजे ॥ १ ॥

नतजनेष्टरथभतुरङ्गम-प्रभृतिदापनशक्तिभराञ्चितान्॥ (मुखप्रदान्)॥
तुहिनदीधितिशीतहृदम्बुजान्सितिगुरुन्नरसिंहपदाञ्छ्रये ॥ २ ॥

भुजगनायकभोगनिवासकृद्भुजगभूषणमुख्य सुराकृतीन् ॥
विजितचित्तजमुख्यजनप्रियान्क्षितिगुरून्नरसिंहपदान्स्तुवे ॥ ३ ॥

मनसिसंभवरुणमुखशात्रवव्रजविनिग्रहशक्तिवितारकान् ॥
कनकजित्वरकान्ति कलेवरान्क्षितिगुरून्नरसिंहपदान्भजे ॥ ४ ॥

अखिलमस्करि पूजितपादुकान् निखिलवैभवपूगवितारकान् ॥
नमदशेषमनोरथपूरकान्क्षितिगुरून्नरसिंहपदाञ्छ्रये ॥ ५ ॥

तृणलघुगणितनिर्जररराट्पदान्प्रणवजापिजनार्च्यपदाम्बुजान् ॥
प्रणवलक्ष्यपरात्पररूपिणः क्षितिगुरून्नरसिंहपदान्स्तुवे ॥ ६ ॥

अवधिहीनकृपाजनिभूहृदः स्ववशवर्तिसमस्तकलावलीन् ॥
कलितभक्तसमीहितसिद्धिदान्क्षितिगुरून्नरसिंहपदान्भजे ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विषयपूगपराङ्मुखताप्रदान्विषमदृग्रहिताब्जिजशेखरान् ॥
उपनिषल्ललनारतमानसान्क्षितिगुरून्नरसिंहपदाञ्छ्रये ॥ ८ ॥

चरणनिर्जितशोणसरोरूहान्प्रणतकष्टहसौख्यदपूजनान् ॥
स्वधिषणाजितनिर्जरदेशिकान्क्षितिगुरून्नरसिंहपदान्स्तुवे ॥ ९ ॥

नयनपन्मुखशास्त्रदपत्स्मृतीन्सुलभितानिशसौख्य परम्परान् ॥
हसितलेशविनिर्जितवार्धिजान्क्षितिगुरून्नरसिंहपदान्भजे ॥ १० ॥

●

श्रीरमणस्तोत्रम्

[शार्दूलविक्रीडितम्]

वैराग्याप्यपदं सरागमतिभिर्लभ्येतराङ्घ्र्यम्बुजं
दुर्भृत्यादिहरं त्रिविष्टपपतिप्रह्लादमुख्यार्चितम् ।
श्रीगीर्निर्जितराजराजधिषणाहङ्कारताश्राणकं
वन्दे श्रीरमणं प्रणम्रकरुणापाथोनिधिस्वाशयम् ॥ १ ॥

श्रीस्पृष्टाभमुखं धरा ··············
नागाधीट्शयनं नताघनयनश्रोत्राण्डजाताधिपम् ।
कीरादिप्रणुतं नवीनवनदन्यक्कृत्तनूरोचिषां
वन्दे श्रीरमणं क्षराक्षरपरब्रह्मत्वधीदायकम् ॥ २ ॥

चक्रादाढ्यकरं प्रणामपरधीकांक्षादिकस्पर्शकं
ज्ञानानन्दघनं सरोजतुलसीमल्लीमुखैरर्चितम् ।
ब्रह्माण्डाधिपतिं हिरण्यशयनस्वर्णाक्षकंसान्तकं
वन्दे श्रीरमणं पदानतजराशेषाधिरोगापहम् ॥ ३ ॥

ब्रह्मोमेशनुतं यताक्षधिषणध्याताङ्घ्रिपद्मद्वयं
भक्तायासहरं नमच्छमदमक्षान्तिप्रमुख्यप्रदम् ।
मन्तुव्रातसहं समस्तधरणीनाथत्वदोपासनं
वन्दे श्रीरमणं भवाब्धिघटभूयोगप्रदातृस्मृतिम् ॥ ४ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशृंगगिरिपीठाधिष्ठितश्रीजगद्गुरु श्रीविद्यातीर्थ–श्रीभारतीकृष्ण–श्रीविद्यारण्यस्तोत्रम्

[मात्रिकदण्डकम्]

भवभवभयचयभञ्जननिपुणान्भक्तजनामर-
भूरुहपादाम्भोजनतान्
वरकरजित्वरभाञ्चितवसनान्वरवरततिदां-
श्चरणविनिर्जितपाथोजान् ॥
वन्दे कुशलाकाङ्क्षकनम्यान्गुणमणिरम्या-
न्विश्राणितनतजनकाम्या-
ञ्छ्रीमद्विद्यातीर्थश्रीमद्भारतिकृष्णश्रीम-
द्विद्यारण्यार्यान् ॥ १ ॥

कृत्तानम्रकृतान्तजभीतीन्कृपाब्धी-
न्कृष्णगवाच्युतशिवमूर्तीन्
सनकसनन्दनतुल्यज्ञानान्कनकदनमना-
न्कनकन्यक्कृत्तनुकान्तीन् ॥
करविध्वंसितनलिनाभिमतीन्स्मरजिद्धिषणा-
ञ्छरणागतापालान्वदे
श्रीमद्विद्यातीर्थ..........॥ २ ॥

मनसिजबाणावेध्यस्वहृदो घनविज्ञाना-
न्विनताल्यघततिसंहर्तॄं-
निष्टव्रातश्राणननिपुणानष्टैश्वर्यप्रदकष्टव्रजह-
कटाक्षलवान् ॥
वाणीकमलागिरिजाभक्तान्वाणीकमलाश्रेणी-
वसतीन्वन्देऽहं
श्रीमद्विद्यातीर्थ..........॥ ३ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री शृङ्गगिरिपीठाधिष्ठित-
श्रीविद्यातीर्थक्षमागुरुशेखरषट्पदी स्तुतिः

[हरिणी]

यतिततिनुतान्विभ्वाकारप्रमुख्यविभूतिदान् ।
न्प्रणतवरदान्कारुण्याम्भोनिधिस्वहृदम्बुजान् ॥
शिवनिकरदान्साम्राज्य श्रीप्रदान् धुरंन्धरान्
मनसि कलये विद्यातीर्थं क्षमापतिशेखरान् ॥१॥

प्रमदजनकानीहाशून्याशयाप्यपदाम्वुजान्
खगपरिवृढासीनर्क्षेशावतंसभिदापहान्
कुशलचयदान्विद्याव्राताधिपत्यविभास्वरान्
मनसि············॥२॥

सकलसुखदान्गोर्वाणालीसमर्च्यतपोनिधीन्
विभवदनतीन्क्षोणीधृज्जा (क्षमाधृत्कन्या) हृदीशनवाकृतीन्
कमलजहरिवर्गाध्यक्षप्रमुख्यसुरार्चितान्
मनसि············॥३॥

भसितनिटिलान्वैराग्याद्युद्भवक्षितिमानसान्
रूचिरधिषणान्मेनारम्भाप्रमुख्यविरागदान्
निखिलनयदान्हृशौशर्यविधूतनिशाधिपान्
मनसि··········॥४॥

स्थिरकुशलदान्पादच्छायापरास्तवने भवान्
प्रणवमुदितानोंकारार्थप्रदान पटुस्मृतीन्
हिमकर (विधुतनु) रुचीनौदासीन्यप्रमुख्यगुणप्रदान्
चरणविनमद्विधारण्य प्रमुख्ययमीश्वरान्
मनसि············॥५॥

प्रणतजनताभीष्टस्प्रष्टॄंस्त्रिलोकसमर्चितान्
स्मरणलवतो दन्त्यश्वादिक्षितीश्वरपदप्रदान्
मनसि············॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशृंगगिरि-पीठपारम्परीण-श्रीविद्याशंकरदेशिकस्तुतिः

[अनुष्टुप्]

कृतवाणीशिवाद्यर्चं कृतकृत्योकृतार्चकम् ।।
कृपार्द्रहृदयं वन्दे विद्याशंकरदेशिकम् ।।१।।
सिन्दूरारुणवस्त्राढ्यंभवमुख्यभयापह(यान्तक)म् ।।
नतकल्पतरुं वन्दे विद्या० ।।२।।
वरदानरतस्वान्तं सज्जनार्जितपादुकम्
मनोहरगुणं वन्दे विद्या....।।३।।
नाशिताखिलपापालिं निवारितशुभेतरम्
अशेषशुभदं वन्दे....।।४।।
मस्करीन्द्रनुतस्वाङ्घ्रिं सुवर्णादीष्टदायिनम्
भवाब्धिपारदं वन्दे....।।५।।

•

श्रीशृंगगिरिपीठाधीश्वर-श्रीजगद्गुरु-श्रीभारतीकृष्णदेवस्तुतिः

[मालिनी]

भजदमरमहीजं भस्मभूषं भयघ्नं
यमिजनविततीडयस्वाङ्घ्रिकं स्वर्णवर्णम् ।
कलितविनतकाम्यं रम्यमुर्वीशनम्यं
क्षितिगुरुवरमीडे भारतीकृष्णसंज्ञम् ।।१।।
करजितवनजातं शारदाङ्घ्र्यब्जभृङ्गं
वरदचरणचिन्तं पारदाङ्घ्रिं भवाब्धेः ।
सततकलितकृष्णं कृत्तमृत्युं कृपाब्धिं
क्षितिगुरुवरमीडे भारतीकृष्णतीर्थम् ।।२।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनतदुरितनाशं वैनतेयेशरूपं
त्रिभुवनगुरुविद्यातीर्थशिष्यं स्मितास्यम्।
हृतपदनतकष्टं दत्तसर्वानतेष्टं
क्षितिगुरुवरमीडे भारतीकृष्णदेवम् ॥३॥
(शरणमहमये श्री)

श्रीशृंगगिरिपीठाधीश्वर-
श्रीभारतीकृष्ण-श्रीविद्यारण्याष्टकस्तोत्रम्

[आर्या]

भवभीतिविभेत्तारं भवभूतिप्रदकटाक्षलवलेशम् ॥
श्रीभारतिकृष्णगुरुं (श्रीविद्यारण्यगुरुं) भजे भजत्कल्पभूमिरुहम् ॥१॥

खरदीधितिनिभवसनं वरदानरतस्वकीयचित्ताब्जम् ॥
श्रीभारतिकृष्णगुरुं स्मरामि करनिर्जिताम्बुसंजातम् ॥ २ ॥

करवदरिततर्कद्वयसांख्यद्वयजैमिनीयवेदान्तम् ॥
श्रीभारतिकृष्णगुरुं कलयाम्येणाङ्कशीतलस्वान्तम् ॥ ३ ॥

विजयपुरीवैभवदं प्रार्थितमाकृतसुवर्णघनवृष्ट्या ॥
श्रीविद्यारण्यगुरुं कलयेऽहं राजराजिकलिताङ्घ्रिम् ॥ ४ ॥

विनतातनुभववाहनवनितानुग्रहविशेषततिपात्रम् ॥
श्रीविद्यारण्यगुरुं विनताघवज्रविनाशकं वन्दे ॥ ५ ॥

कृत्तकृतान्तादिभयं कृम्यादिनिखिलकृपासुधाब्धिहृदयम् ॥
श्रीभारतिकृष्णगुरुं कृत्स्नजगत्कृष्णताबुधं कलये ॥ ६ ॥

संयमिमणिगणनम्यं चेष्टितवाणीहृदङ्गमतिरम्यम् ॥
भारतिकृष्णं (विद्यारण्यं) सौम्यं वन्देऽजस्रं वितीर्णनतकाम्यम् ॥ ७ ॥

पारदजनिमृतसिन्धोः सारदनिगमान्तवेद्यतत्त्वस्य ॥
श्रीभारतिकृष्णगुरो श्रीविद्यारण्यगुरो वरदाभयधृत्कराम्बुजाताव ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशृंगगिरिपीठाधिष्ठितश्रीपरमगुरु-श्रीनरहरिशुकस्तोत्रम्

[भाराक्रान्ता]

हस्त्यश्वादीप्सितसकलदान्नम्राल्यघध्वंसकान्
नव्यश्रीमन्नरहरितनूनमुवत्यङ्गनावल्लभान् ॥
सच्चिन्मोदक्षितिगुरुगुरून्प्रोद्यद्दिनेशत्त्विषो
नौमि श्रीमन्नरहरिगुरूनोंकारलग्नाशयान् ॥१॥

●

श्रीशृंगगिरिपीठाधिष्ठित श्रीनरहरिसच्चिदानन्दभारतीगुरुस्तोत्रम्

[मात्रिकं दण्डकम्]

कनकमहामणिकलित-किरीटावेणाङ्कास्यौ
नाशितनिखिलश्रितकष्टौ
दिनकरकनकच्छविनिजकायौ शोणाब्ज-
पदौ दत्तानम्रजनाभीष्टौ ॥
वीनप्रभुहररूपौ हरिसुतवाणाभेद्यौ
मोक्षाकाङ्क्षिव्रजजुष्टौ
भारत्तिरत्ने कलये नरहरिसच्चित्सुखशिव-
नूतननरहरि-भारत्यौ ॥१॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशृंगगिरिपीठाधिष्ठित-
श्रीनरहरिसच्चिदानन्दगुरुस्तवः

[नन्दनम्]

यमिसुलभौ सरागजनतासुदुर्लभाङ्घ्रिद्वयौ
सुरविनतौ निकृत्तविनमज्जरापमृत्यामयौ ।
नरहरिशंकराकृतिधरौ कृपासुधातोयधी
नरहरिसच्चिदादिभसुखौ भजामि धात्रीगुरू ॥१॥

•

श्रीशृंगगिरिपीठपारम्परीणश्रीपरमगुरु-
श्रीनृसिंहगुरुस्तवः

[पृथ्वी]

कृपाम्बुधिमहर्निशं कृततपःप्रभावैर्वशी-
कृताब्जभववल्लभाकृतमहामहोऽनुग्रहम् ॥
कृतान्तकरमोचितस्वकृतपाथसीसंजनु-
र्भविष्यदवनीगुरुं हृदि भजे नृसिंहं गुरुम् ॥१॥

तथाविधतपोबलप्रसभरक्षितोर्वीगुरु-
प्रबोधितपदाब्जनुर्महिमलेशलेशो न्वहम् ॥
सुवर्णमुखमोक्षकृत्स्वपरबोधनान्ताखिल-
प्रदायिचरणस्मृतिं हृदि दधे नृसिंहं गुरुम् ॥२॥

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री श्रृंगगिरिपीठाधीश्वरश्रीजगद्गुरु श्रीनृसिंहगुरूत्तमस्तवः

[द्रुतविलम्बितम्]

निजपदाश्रितसर्वमनोरथप्रचयपूरणसक्तहृदम्बुजम् ॥
निखिलविश्वपरात्मनिरीक्षकं हृदि करोमि नृसिंहगुरूत्तमम् ॥१॥

निजशिखासहितश्रुतिवल्लभासततचिन्तकनैजमनोऽम्बुजम् ॥
रथगजादिनतेप्सितदायकं हृदि भजामि.........॥ २ ॥

भुवनवर्तिसमस्तनयावलीमुखकलानिकुरुम्बकपारगम् ॥
प्रणतमोदमहार्णवभाधिपं हृदि नमामि ॥ ३ ॥

अखिलनिर्जरपूगसमाहृतप्रचुरशाश्वततत्त्वविबोधनम् ॥
प्रणतकामितदापनदीक्षितं हृदि दधामि... ......॥ ४ ॥

निजपदामृतसंभवभक्तिकृत्कृपणलोककृपाजनि भूहृदम् ॥
विभवदातृपुनर्भवकृन्तकं हृदि नमामि.........॥ ५ ॥

त्रिदिवसल्ललनामुखसुन्दरीमुखमुखाचलितस्वविरागकम् ॥
सनकमुख्यमहामुनिकोटिगं हृदि दधामि.........॥ ६ ॥

समशिलाकनकोरगमालिकारिपुसुहृत्कृमिनिर्जरभावनम् ॥
भवनिजाख्यमहो भवभञ्जनं हृदि भजामि.........॥ ७ ॥

प्रणततत्यनुभूतशुगावलीप्रशमनेष्टवितारणपण्डितम् ॥
प्रणमवैहिकनाकगभोग्यदं हृदि भजामि.........॥ ८ ॥

श्रुतिशिखोदितलक्ष्यविवेधकप्रणवकार्मुकमुख्यदपत्स्मृतिम् ॥
धिषणजिद्धिषणाप्रतिभाप्रदं
(स्मितपराजितकोटिनिशाकरं) हृदि नमामि.........॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री शृंगगिरिपीठाधीश्वर श्रीनृसिंहद्वयस्तुतिः

(हरिणी)

हृदयविलसच्छ्रीचक्रेशीपदाम्बुरुहद्वयौ ।
कमलनयनाम्भोजालीद्विड्धराकृतिधारणौ ॥
दिविजललनालावण्यालीविरागवितारकौ ।
परगुरुगुरू वन्दे श्रीमन्नृसिंहनिजाभिधौ ॥१॥

श्री शृंगगिरिपीठाधिष्ठित श्रीनृहरिगुरुस्तुतिः

(द्रुतगतिः)

अवशगमदना—दिमरिपुविमुख ।
जितमतिसुलभ जय नृहरिगुरो ॥१॥

रथगजतुरग—प्रमुखदनमन ।
अघततिशमन जय............॥२॥

नतजननिखिले—प्सितवरवितते: ।
वितरणनिपुण जय............॥३॥

क्षितिपतिचरणा—मृतभवनतिकृत ।
स्ववशग भुवन जय............॥४॥

ज्वरमुखनतरुक्—प्रशमनपटुपत् ।
परिहृतकुमते जय............॥५॥

यममुखविलसन्—मतिशममुखद ।
श्रमचयशमन जय............॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतकृतदुरित—व्रजसहहृदय ।
यममुखभयहृत्—जय..........॥७॥

प्रकलितयमिपा—कृतिधरगिरिश ।
सुमशरमुखजिज्जय जय..........॥८॥

धनपतिधिषणा—धिकधनधिषणे ।
प्रणमति-वितर—ञ्जय..........॥९॥

श्रीशृङ्गगिरिपीठाधीश्वरश्रीजद्गुरु-श्रीसच्चित्सुखपरमहंसस्तोत्रम्

[पादाकुलकं]

नम्रजनाशयचिन्तित-वैभववितरणयोजितसकलसुरालिम् ।
सफलीकृतनवशम्भुशरीरं वन्दे सच्चित्सुखपरहंसम्.......॥१॥

विद्याधीशीकृतपदभक्तं धरणिपमुकुटं गणभाढ्यपदम् ।
निजमुखवार्जपराजितवार्जं-(धिक्कृतवार्जस्वाननवार्जं)
वन्दे.......॥२॥

वाणीमोमापदवनजाता-
सक्तस्वान्ताभ्युदयनिषक्तम्
विधिहरिशंकरनव्याकारं
वन्दे.......॥३॥

कारुण्याकरलावण्याम्भा
निधिनिजनिर्मलधिषणाकायम्
नरहरिगुरुपति-मोदद-चरितं
वन्दे.......॥४॥

अधरित-विम्बस्वाधरबिम्बं
कणभुङ्मुखनयचयपारीणम् ।
इन्दुन्यक्कृन्निजमुखपद्मं
वन्दे.......॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसच्चित्सुखपरहंसस्तुतिः

[पादाकुलकं]

अगणितकोटि-प्रणतजनोद्धृति-
सफलितवर्ष्म ग्रहणगिरीशम् ।
संख्यावर्जितयतिविनुताङ्घ्रि-
वन्दे सच्चित्सुखपरहंसम् ॥१॥

आश्रितजनतापरिमितिहीना-
व्याजकृपामृतपारावारम् ।
आशापूरणनन्दितसर्वं
वन्दे सच्चित्सुख·······॥२॥
इभरथवाजिस्यन्दनसेना (मुख्या)-
खिलसाम्राज्यश्रीदकटाक्षम् ।
निस्तुलमुक्तिस्त्रीमणिरमणं
वन्दे सच्चित्सुख·······॥३॥
ईहावर्जितभक्तजनाढ्यं
नम्रानन्दाम्भोधिसुधांशुम् ।
ईक्षालवहृतनिखिलानिष्टं
वन्दे सच्चित्सुख·······॥४॥
उरगाधीशाशक्यस्वपदा-
म्वुजनुर्माहात्म्यस्तोत्रलवम् ।
उडुपतिशेखरनव्याकारं
वन्दे सच्चित्सुख·······॥५॥
ऊरीकृतनिजनम्रजनेष्ट-
व्रातस्पर्शव्रतनिजदीक्षम् ।
ऊहापोहनपाटवदाङ्घ्रि
वन्दे सच्चित्सुख·······॥६॥
ऋद्धिदमञ्जजवर्ष्मसवित्र्या
पदनतकाङ्क्षाधिकमतितूर्णम् ।
ऋक्षपकोटिन्यक्कृद्धासं,
वन्दे·······॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एनःपर्वतभिदुरस्मरणं
दृढवैराग्योज्ज्वलधिषणादम् ।
कृतकृत्यीकृतयतिपतिकायं, वन्दे·······॥ ८ ॥

ऐहिकपारत्रिकमुखसौख्य-
व्रातप्रदनिजचरणपराग (युगार्चं)म्
हिमकरकोटिपराजिद्धसितं, वन्दे·······॥ ९ ॥

ओंकाराक्षरवर्णिततनैजा-
कारं सशिखश्रुतिगीर्निकरैः
ओंमुखमनुतनिजपसन्तुष्टं, वन्दे·······॥१० ॥

औशनसाङ्गिरसादिमविद्या-
झटितिप्रापककरुणालेश(कणिक)म्
औदासीन्याञ्चितमतिलभ्यं, वन्दे·······॥ ११ ॥

अङ्गगसुषमच्छविर्निधूता-
नङ्गाहर्पतिकोटयभिमानम्
अन्तकमुखभयविच्छेत्तारं वन्दे····॥१२॥

श्रीसच्चिन्मुखनवनृसिंहगुरुस्तुतिः

[आर्या]

संस्कृतिभीतिप्रमुख्यनाशकरम्
नतजननिर्जरवृक्षं (जनताकल्पतरुं)
श्रीचन्द्रचूडभक्तं वन्दे सच्चिन्मुखनवनृसिंहगुरुम् ॥१॥

शोणाम्भोजस्वपदं शोणाम्बरवेष्टितस्वतनुम् ।
काङ्क्षाधिकदातारं वन्दे··········॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धनमुखसर्वेप्सितदं भवपाथोराशिपारदातारम् ।
विनताखिलपापहरं वन्दे............॥३॥

श्राणितनतजनकाभ्यं मोचकविद्याभिकाङ्क्षिजननम्यम् ।
सौम्यान्तरङ्गरम्यं वन्दे............॥४॥

कृतकृत्यत्वदनमनं कृतचरणानतिकृतान्तभयशमनम् ।
कृत्स्नप्राणिकृपाब्धिं वन्दे............॥५॥

श्रीसच्चित्सुखशिवनवनृसिंहस्तोत्रम्

[आर्या]

भव्यदकटाक्षकणिकान्सच्चित्सुखशिवनवनरसिंहगुरून् ।
भक्तामरधात्रीजान्भजामि भवभीतिभेदिपदविनतीन् ॥१॥

वरततिदाननिषक्तान्सच्चित्सुख............
करानिर्जितपाथोजानरणीसुरुचिपटान्कलये ॥२॥

कनकाभगात्रकान्तीन्सच्चित्सुख............
नृपगणकोटीरगमणिनीराजितपादपयसिजान्वन्दे ॥३॥

नयसन्ततिपारीणान्सच्चित्सुख............
वरदानसक्तचित्तान्भवसागरपारदान्वन्दे ॥४॥

दापितकनकादीष्टान्सच्चित्सुख............
विनताघहरान्वनजजविनताजगशंकरकृतीन्वन्दे ॥५॥

हरिणाङ्कजिष्णुवदनान्सच्चित्सुख............
त्रैलोक्यार्च्यपदाब्जान्कलये गौतमकणादमुखनयदान् ॥६॥

तनुवाङ्मतिकृतिरम्यान्सच्चित्सुख............
श्राणितकाम्यान्सौम्यान्कलये मस्करिवतंसगणनम्यान् ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवा.........
निगमान्तसारदातॄन्सच्चित्सुख
आकृतिधिषणासौम्यान्वन्दे श्राणितसमस्तनतकाम्यान् ॥८॥

कृमितः सर्वंकृपाब्धी (कृत्स्नजनव्रजतुल्या)न्सच्चित्सुख....
कृत्स्नात्मकत्वधीदान्कृत्तकृतान्तादिसाध्वसान्कलये ॥९॥

श्रीसच्चिदानन्दजगद्गुरुस्तोत्रम्

[उपजाति]

स्वद्रव्यवाग्वैभवनिर्जितामर-
क्षोणीशजीवत्वमरं प्रयान्त्यहो ॥
दरिद्रमूका अपि यत्पदस्मृतेः
श्रीसच्चिदानन्दजगद्गुरून्भजे ॥१॥

निजाङ्गविभ्राजदमेयकान्तिनि-
र्धूताखिलाहंकृतितप्तकाञ्चना(हाटका)न् ।
कृतानमत्कुण्डलिनीविनिग्रहान्
श्रीसच्चिदानन्दगुरून्विभावये ॥२॥

धर्मार्थकामाखिलबन्धमोक्षरू-
प्यशेषकाङ्क्ष्यव्रजदाङ्घ्रिसंस्मृतीन् ॥
नम्राखिलेष्टव्रजदानदीक्षितान्
श्रीसच्चिदानन्दधरान्गुरून्भजे ॥३॥

भक्तालिहृत्कोशतमोनिबर्हण-
तत्पद्मफुल्लीकरणे विधाय ये ॥
प्रकाशयन्त्यात्मरुचा दिनेशव-
च्छ्रीसच्चिदानन्दमहीगुरून्भजे ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकामनम्रालिसमीहितक्षमा-
पतित्वमुख्यस्पृशिपाण्डितस्मृतीन् ॥
विवर्तसिद्धान्तसरोजभास्करा-
न्श्रीसच्चिदानन्दगुरून्समाश्रये ॥५॥

सद्योनिरस्ताङ्घ्रिसमाश्रितावली-
चेतोऽन्धकारव्रजपादपङ्कजान् ॥
अज्ञाशयव्याधिभिषक्शिरोमणी-
न्श्री सच्चिदानन्दघना............॥६॥

विकारशून्यस्वमनोऽम्बुसंभवद्-
योगिप्रकाण्डार्चितपत्पयोरुहान् ॥
चिन्मुद्रिकेष्टस्पृशिचिह्नधृत्करा-
न्श्रीसच्चिदानन्द .. ..॥७॥

कारुण्यसिन्धुस्वकटाक्षलेशनि-
धूँताङ्घ्रिनम्राखिलखेदसन्ततीन् ॥
शमादिषाड्गुण्यवितारिसंस्मृतो-
न्श्रीसच्चिदानन्द............॥८॥

कृपासुधाम्भोनिधिनैजमानस-
क्षान्तानमन्मानविवर्जितांहसः ॥
यमादिभीहृद्यममुख्यदायका-
न्श्रीसच्चिदानन्द............॥९॥

विश्वंभराधर्तृशिरोऽवतंसजा-
सिन्धूद्भवावाग्जननीप्रसाददान्
अपारकारुण्यपयोधिमानसा-
न्श्रीसच्चिदानन्द............॥१०॥

वाणीरमापर्वतराजवर्ष्मजा-
श्रीचक्रराजार्चनमन्त्रसिद्धिदान् ॥
अघावलीदावहुतालिवाहना-
न्श्रीसच्चिदानन्द............॥११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्त्यादिदान्पद्मजनूरमाधव-
हस्त्याननाय निखिलामराकृतीन् ।
सुरावलीपूज्यपदामृतोद्भवा-
ञ्छ्रीसच्चिदानन्द..........॥१२॥

श्रीक्षितिगुरुनृसिंहचरणनवरत्नमालिकास्तुतिः

[अश्वललितम्]

विजितमनोजरोषमुखभीकरणरिनिकराप्यनैजचरणान्
चरणपरागसक्तजनताप्रमोदजलराशिशीतकिरणान्
किरणसहस्रभास्ववपुषो नताखिलकलाप्तिनीरजनुषः
क्षितिपगुरुपान्नृसिंहचरणान्भजामि सततं मुमुक्षुशरणान् ॥ १ ॥

परमविवर्तातामतिलसद्विबोधविदिताखिलत्रिभुवना-
न्विषयविरक्तिरञ्जितमनोनिजान्तनसादावलीपरिवृतान् ॥
पदजलभूनमस्कृतिकृतामहेतुकरुणार्णवात्महृदया-
न्क्षितिगुरू..........॥ २ ॥

रथगजवाजिसैनिकमुखक्षितीशविभवप्रदाङ्घ्रिरजसः
प्रणतजनेप्सितार्थनिकरस्पृशि व्रतलसत्कटाक्षकणिकान् ॥
दृढपरिरब्धदान्तिहृदयप्रशान्तिमुखयुक्तमुक्तिरचना-
न्क्षितिगुरु..........॥ ३ ॥

सरिदधिनाथमध्यविलसद्भुजङ्गपतिभोगनैजशयन-
द्रुहिणविलोचनप्रभवदृक्प्रजातशिशुधृन्मुखाकृतिधरान् ॥
सुजनसमीहितार्थविततिप्रदानविषयव्रताढ्यचरिता-
न्क्षितिगुरु..........॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अखिलविभूतिदापनपटुस्वपादपयसीरुहीयरजसः
स्मरमुखषण्महोर्मिविलसत्करालभवसागौर्वंदहनान् ॥
द्रुहिणमुखात्मबोधमहापुमालिसदृशात्मतत्त्वकथना-
न्क्षितिगुरु..........॥ ५ ॥

अगतिकदीननैजचरणप्रणम्रकरुणाजनिक्षितिहृदो
दुरितफलायितात्मनिटिलप्रदुष्टलिपिमुख्यमोचितनतान् ॥
सुरचिरयोषिदादिसकलप्रकारविषयावलीविरतिदा-
न्क्षितिगुरु..........॥ ६ ॥

अरुणसरोजतुल्यचरणप्रजातरतिधूतनम्रदुरिता-
न्निहपरसौख्यसुलभीकृतिप्रवणपादसंस्मृतिस्तवान्
अनिशमुदासिताखिलबहिःप्रवृत्तिसुलभस्वपादवनजा
न्क्षितिगुरु..........॥ ७ ॥

निजतनुदिव्यकान्तिलहरीनिवारितसुवर्णडम्बरतती-
न्बहुलविधाखिलर्द्धिनिकरप्रदानपतिपादपूजनलवान् ॥
हसितमृगाङ्ककोटिहसितप्रकाशहतनम्रताहरीशहार्दतिमिरा
न्क्षितिगुरु..........॥ ८ ॥

विषमविलोचनासितगलप्रमुख्यविरहेऽपि नम्रविततेः
स्मरशमनादिसूदनधुरन्धरात्मचरणाकरुणाप्रसादकणिकान् ॥
कृतचरणाब्जभक्तिजनताल्यशेषशुभदायिवीक्षणलवा-
न्क्षितिगुरु..........॥ ९ ॥

भजदमरद्रुमस्वचरणान्विरक्तिपिशुनार्ककान्तिवसना-
ञ्जितसरसीरुहपादयुगलेष्टवरदान्भवाब्धिघटजान् ॥
श्रितजनकाम्यवरदान्यमितत्तिप्रणम्यचरणान्सुरम्यचरिता-
न्क्षितिगुरूपान्भजामि सततं जिलाक्षमणिपान्नृसिंहचरणान् ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनृसिंहगुरूत्तमस्तवः

[प्रमदाननम्]

कलितात्मबोधपदाननाखिलहृद्गतेप्सितमण्डली-
प्रतिपादनव्रजमुद्रिकायुतनैजपाणिसरोरुहम् ।।
कलये नृसिंहगुरूत्तमं रचकहा(?)श्वलेशनिवारिता-
नतजन्ममृत्युजरादिसर्वभयव्रजादिमकारणम् ।।१।।

धरणीधरालिकिरीटभास्वररत्नरत्नणनोल्लस-
च्छविसंचयैः शबलीकृतारुणपादनीरभवद्वयम् ।।
कलये नृसिंहगुरूत्तमं निजचित्तपाथसिभूलस-
त्सर्व(?)भोज्यविरक्तिसूचकरागरञ्जितवाससम् ।।२।।

निजपादनीरसमुद्भवानतमृत्युमुख्यसमस्तभी-
व्रजनाशनव्रतदीक्षितस्वकराक्षलेशकलेशकम् (लोचनपङ्कजम्) ।।
कलये नृसिंहगुरूत्तमं भवराशिरागिनिसर्गजा-
गणिनार्तिसन्तनिमग्ननिर्गतिदीनलोककृपार्णवम् ।।३।।

कनकप्रभस्वकलेवरं कनकावलीविमुखाशयं
कनकप्रमुख्यसमस्तभाग्यवितारणोद्धृतगेहिनम् ।।
कलये नृसिंहगुरूत्तमं परमार्थतत्त्वविबोधनै-
र्भवसिन्धुमध्यसमुद्धृतानतमोक्षकाङ्क्षकमण्डलम् ।।४।।

पदभक्तिपूरितलोकसंमतविघ्नसन्ततिहेतुदं-
चरितावलीद्रुतभस्मसत्कृतिपण्डिताङ्घ्रिरजःस्मृतिम् ।।
कलये नृसिंहगुरूत्तमं यतिशीर्षरत्नपरम्परा-
करपङ्कसंभवपूजितात्मपदाम्बुसंभवयुग्मकम् ।।५।।

परतत्त्वबोधनधर्मवर्त्मविरुद्धमानसशासन-
प्रमुखाखिलाश्रमधर्मसूचकवेणुदण्डलसत्करम् ।।
कलये नृसिंहगुरूत्तमं कमलाक्षपादकजैमिनि-
प्रमुखाखिलोवतसमस्तशास्त्ररहस्यबोधनतत्पर (पण्डित)म् ।।६।।

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनृसिंहशशाङ्कशेखरभारतीगुरुस्तवः

[हरनर्तनं]

काम्यमोक्षकृते प्रणम्यपदं नतेष्टदरम्यधी-
धूतकल्पतसंभवाखिलभीहरं भवपूजकम् ॥
नीरजाभकरं खरांशुलसत्पटं वरदायकं
श्रीनृसिंहशशाङ्कशेखरभारतीगुरुमाश्रये ॥ १ ॥

भक्तकाङ्क्षितदं भवाम्बुधिपारदं भगवत्परं [त्प्रियं]
नम्रपापहरस्मृतिं नतदीनपालनदीक्षितं
कष्टनाशकरं नतेष्टसमस्तदं जिनतुष्टदं
श्रीनृसिंह ॥ २ ॥

श्रीसच्चिदानन्दनरहरिस्तवः

[नन्दनम्]

धनजितयक्षयोक्तिजितगीष्पतोक्तस्वानतं
गजमुखदं प्रणम्रदुरितच्छटाहिपक्षीश्वरम् ॥
हृतशमलं शरीररुचिनिर्जिताकंकार्तस्वरं
भज भज सच्चिदादिमसुखं मनोधरित्रीगुरुम् ॥ १ ॥

पुरुपुरुषं त्रिलोकनिवसज्जनार्च्यपादाम्बुजं
भवशमनं नताखिलमनोरथालिपूर्तिव्रतम् ॥
अखिलविदं सरोजनयनाब्जधृन्नवीनाकृतिं
भज भज सच्चिदादिमसुखं मनोधरित्रीगुरुम् ॥ २ ॥

त्रिभुवनपं प्रणम्रसुलभाखिलावनिपालकं
हृतनतरुक्कुबुद्धिकुमृतिप्रमुख्यपास्मृतिम्
भज भज ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीनरहरिगुरुस्तवः

[भाराक्रान्ता]

वैराग्याप्यस्वपदकमलं दूरं तदन्यादृशां
वीक्षोच्छिन्नानतभृतिजरं त्रैलोक्यवन्द्याङ्घ्रिकम् ।
नैजश्रीगर्वविजितसुरराड्जीवीकृतस्वानतं
नौमि श्रीमन्नरहरिगुरुं कारुण्यपाथोनिधिम् ॥१॥

आतमज्योतिःप्रदपदनतं नम्रेष्टविश्राणकं
विश्वोत्तंसायितनिजपदं क्षोणीपतित्वप्रदम् ॥
अज्ञानाख्यासुरहरगिरं व्याधिव्रजोन्मूलकं
नौमि श्रीमन्नरहरिगुरुं दण्डाढ्यहस्ताम्बुजम् ॥२॥

वाणीमेशाब्जधरनिरतं वक्षाशवर्गेडितं
छिन्नानङ्गाखिलमदर्ताति भीमूलविच्छेदकम् ॥
क्षान्तस्वाङ्घ्रिप्रणतदुरितं सर्वश्रमालीहरं
नौमि श्रीमन्नरहरिगुरुं शान्त्यादिसंपत्तिदम् ॥३॥

श्रीसच्चिन्मोदनृसिंहदेशिकयतिस्तोत्रम्

[भाराक्रान्ता]

आस्तिक्याढ्याखिलजननुतं ब्रह्माच्युतेशाकृतिं
भक्तव्रातेप्सितसकलदं कारुण्यपीयूषधिम् ॥
साम्राज्यश्रीमुखविभवदं मुक्त्याख्यकान्तारतं
सच्चिन्मोदनृसिंहदेशिकपतिं वन्दे जगत्पावनम् ॥१॥

रागद्वेषप्रमुखशमनं हर्षाब्धिचन्द्रोदयं
नानाविद्याप्रचयरुचिरं नम्रेष्टदानव्रतम् ।
क्षोणीपालव्रजनतपदं सर्वर्द्धिविश्राणकं
सच्चिन्मोद·······॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारुण्याम्बोनिधिनिजहृदं फालाक्षपूजारतं
वैराग्याम्भःप्रभवदिनपं हासाञ्चितास्याम्बुजम् ।
रात्रीतुल्यं शिशिरहृदयं शास्त्रावलीबोधदं
सच्चिन्मोद········॥३॥

ओंकारार्थंप्रजपनपरं तद्गूढतात्पर्यदं
सोमोद्भासिस्वहसितमुखं शश्वच्छुभालिप्रदम् ।
औदासीन्योज्ज्वलनिजमतिं कामादिशून्याशयं (कामारिरूपान्तरं)
सच्चिन्मोद········॥४॥

●

श्रीनृसिंहदेशिकेन्द्रषट्पदीस्तुतिः

[मन्दाक्रान्ता]

अङ्गोद्भूत(पुष्पस्वेषु)प्रभृतिकलुष (मलिन)-स्वान्तरङ्गातिदूरं
तादृग्दोषव्रजविहितजस्वान्तरङ्गैकरङ्गम् ॥
भक्तालीनां कुमरणजरामुख्यविच्छेददक्षं
वन्दे नित्यं हृदयकमले देशिकेन्द्रं नृसिंहम् ॥१॥

स्वीयश्रीगीर्विभवविजितस्वर्गिसाम्राज्यसम्रा
ड्गीर्वाणार्थीकृतनिजपदाम्भोजभृङ्गस्वचित्तम् ।
कष्टव्राताार्दितनतकृपाम्भोधिचेतोऽम्बुजातं
वन्दे···········॥२॥

भक्ताल्यंहोनिकरविपिनप्लोषिदावाग्निवीक्षं
पीयूषांशुत्रिदिवगजनिर्जिष्णुवर्णस्वकायम् ।
काम्याभ्यर्थिप्रणतसकलाभीष्टदानप्रतुष्टं
वन्दे···········॥३॥

नम्रस्वान्तामृतजनिसमुज्ज्वालितज्ञानदीपं
भक्तव्राताखिलविधरुजाक्रन्तकस्वाङ्घ्रिधूलिम्
हस्तभ्राजन्नभयदहराभीष्टसंस्पर्शिमुद्रं
वन्दे···········॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अज्ञानाख्याकृतिधरमहादुष्टदैत्यप्रणाशं
चित्तोद्भूतोद्भवविकृतिनिर्जेतृगीतापदानम् ।
शान्त्यादीष्टाखिलरुचिरसंपत्तिदानैकसक्तं
वन्दे............॥५॥

अज्ञानाम्भोनिधिनिपतितानम्रसर्वश्रमघ्नं
क्षान्तानम्रव्रजविरचिताशेषगण्येतराघम् ।
भक्तालीनां यमभयहृतिप्रौढयोगप्रदाङ्घ्रि
वन्दे..........॥६॥

●

संयमिक्षितिपतिस्तुतिः

[पृथ्वी]

कटाक्षलवदापितामरपजीवजिन्मागिरं
प्रणम्रजनपातकव्रजहरं रमेशाचकम् ॥
मुरघ्नजपकृद्वशंवदहृदं गजादिप्रदं
भजामि हृदि संयमिक्षितिपतिं स्तुवद्भोगिपम् ॥१॥

अखण्डपरतत्त्ववित्कुलमणीकृतस्वानतं
कुबुद्धिमुखकृन्तकस्वनमनं नृपत्वप्रदम् ॥
विबोधदभयघ्नभृत्करयुगंनताघापहं
भजामि हृदि संयमिक्षितिपतिं नतेष्टप्रदम् ॥२॥

विकारततिजिष्णुधीप्रदपदं सरोजाङ्घ्रिकं
विधिस्मरगुरुत्रिदृक्तनुधरं समाधि(प्रनुतमूर्ति)प्रदम् ॥
यमप्रमुखसिद्धिसंस्पृशिरतं श्रमालिच्छिदं
भजामि हृदि संयमिक्षितिपतिं जगत्पावनम् ॥३॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीशिवनवनृहरिस्तोत्रम्

[वंशपत्रललितम्]

भक्तजनामरावनिरुहोभवभयशमनाम्
चण्डनिजाण्डसुवर्णवससान्वरततिदनतीन् ॥
आस्तिकमण्डलाहृतपदाञ्छुभकृतिनिरतान्
नौमि जगद्गुरून्यमिमणीञ्छिवनवनृहरीन् ॥१॥

श्राणितनन्तृकाम्यनिकरान्यंतिततिविनुतान्-
ब्रह्मविबोधरम्यधिषणान्करजितकमलान् ॥
भक्तकृतान्तभीतिहरणान्सकरुणहृदयान्
नौमि········॥२॥

आनतपापवारणहरीन्नतसुजनतती-
ञ्छास्त्रपरम्परोचितमतीन्वदनजितविधून् ॥
संसृति सिन्धुपारदपदान्निरवधिकरुणान्
नौमि····॥३॥

श्रीनृसिंहचरणस्तवम्

[वसन्ततिलका]

वैराग्यलभ्यचरणानजितात्मदूरान्
दुर्मृत्युमुख्यशमनान्मुनिसेविताङ्घ्रीन्
नम्रोक्तिमार्जितसुधार्यधनाधिनाथाद्
वन्दे नृसिंहचरणान्वरदाभयघ्नान् ॥१॥
धर्मादिमुक्त्यवधिदान्निखिलेष्टदातॄ-
ल्लोकव्रजावनकरान्करिमुख्यमादान् ॥
कल्याणदाननिरतान्कलिकल्मषघ्नान्
वन्दे नृसिंहचरणान्करुणासुधाब्धीन् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्तव्रजाश्रुहरणाञ्छममुख्यदातॄन्
सर्वेप्सितस्पृशिरतान्यमसाध्वसघ्नान् ॥
कारुण्यपूर्णहृदयान्क्षितिपालतादान्
न्वन्दे नृसिंहचरणान्गुरुसार्वभौमान् ॥३॥

श्रीजगद्गुरुस्तोत्रम्

[रुचिरा]

सरागदुर्लभचरणो विराजिप-
स्तपोधनव्रजविनुतो ज्वरादिहृत् ॥
गिराश्रियानतजिनजीवयक्षपः
कृपार्जनिक्षितिहृदयोऽवताद्गुरुः ॥१॥

प्रसादितक्षितिधरजो गजादिदो
भवाह्वयाहिहरिरथः सुवर्णरुक् ॥
विरागितातुलितशुकोऽक्षराकृति-
र्नतेप्सितप्रदनमनोऽवताद्गुरुः ॥२॥

निराकृताखिलकुकृतिर्विकारहृ-
द्वचःप्रसूनहरनिरतः शमादिदः ॥
निवारितश्रमविनतिःक्षमानिधि-
र्यमादिभीहरयमदोऽवताद्गुरुः ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री सच्चिदानन्दस्तुतिः

[मालिनी]

विहितविनतकाम्यस्वर्गविध्वंसराजं
त्रिभुवनजननम्यं संसृतिध्वान्तभानुम् ॥
सकलसुगणरम्यं शंकरार्यावतारं
धरणिगुरुधरेशं सच्चिदानन्दमीडे ॥१॥

अबुधजनकृपाब्धिं भानुसिन्दूरवस्त्रं
हृतविनतकृतान्तं पाणिधूताम्बुजातम् ॥
स्मृतनिजरजसाश्चर्यर्द्धिसिद्ध्यादिदाङ्घ्रिं
धरणिगुरुधरेशं............॥२॥

यतिततिकलिताङ्घ्रिं भक्तपापेभसिंहं
कविगुणनुतकीर्तिं भूपपूगार्चिताङ्घ्रिम् ।
अतुलरुचिरमूर्तिं स्वर्णधिक्कारिवर्णं
धरणिगुरुधरेशं............॥३॥

अधरविजितबिम्बं संनताभव्यनाशं
सरसरुचिकवित्वं पारदं संसृताब्धेः ।
वदनजितशशाङ्कं सच्चिदानन्दमूर्तिं
धरणिगुरुधरेशं............॥४॥

श्रीदेशिकेन्द्राष्टकस्तवः

[चित्रम्]

नैजपादभक्तलोककाङ्क्षिताखिलार्थजाल-
संस्पृशिव्रतावधूतनिर्जरक्षमाप्रजात ॥
देशिकेन्द्र पाहि रोगशुग्वियोगमुख्यकष्ट-
रूपवीचिपूगपूर्णसंसृताम्बुराशिपोत ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मबोधदानचिह्ननम्रलोकवाञ्छितार्थ-
पूरणव्रतप्रकाशलिङ्गशोभिपाणिपद्म ॥२॥

देशिकेन्द्र पाहि घस्रनाथतुल्यबाह्य (राग) वस्त्र
सूचितस्वचित्तवारिसंभवोल्लसद्विराग ॥
नित्यनित्यभिन्नबोधशान्तिमुख्यतत्त्वसाध्य-
बन्धमुक्तिरूपवल्लभाललामकान्तताढ्य ॥३॥

देशिकेन्द्र पाहि तत्त्वबोधकाङ्क्षसंयताक्ष-
रत्नराजिरम्यनैजपादपङ्कजातयुग्म ॥
सर्वकष्टमूलजालहेत्वबोधवृक्षमूल-
कृन्तनव्रतप्रमुख्यचुञ्चुवृत्तिनैजचित्त ॥४॥

देशिकेन्द्र पाहि पद्मजातविष्णुशम्भुमुख्य-
देववर्गपादपङ्कजप्रसादहेतुपूज ॥
ब्रह्मबोधदापनादिहापिताङ्घ्रिपङ्कजन्म-
संततालिजन्ममृत्युभीतिमुख्यदुःखजात ॥५॥

देशिकेन्द्र पाहि कष्टपूगरूपवारिराशि-
मग्नदीनकारुणीसमुद्ररूपनैजचित्त ॥
रागरोषलोभमोहदर्पमत्सरादिनक्र-
सन्ततोल्लसद्भवाख्यनोरराशिपार (दान) दक्ष ॥॥६॥

अच्छपक्षवैनतेयपुङ्गवस्ववाहनादि-
सर्वदेवतात्मगूढतात्त्विकैकवस्तुरूप ॥
देशिकेन्द्र पाहि नेत्रपादनीरभूकणाद-
कर्दमात्मभूपतञ्जलिप्रमुख्यशास्त्रदार्च ॥७॥

वेणुदण्डजापमालिकादिधर्तृ (रम्य) पाणि-
पद्मरुद्रनेत्रमालिकाविराजमानकण्ठ ॥
देशिकेन्द्र पहि पादनम्रसर्वकष्टनाश-
पूर्वमिष्टदानतत्परात्मचितवारिजात ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीदेशिकराजनवरत्नमालिकास्तुतिः

[मयूरगतिः]

वक्त्रजबाहुजवैश्यचतुर्थमुखाद्ब्राह्मणभूपतिखिलपण्डितपामर-
रूपाशेषजगत्स्थितभक्तजनव्रजरक्षणदक्षिणपादपयोज ।।
मस्करिपुङ्गवगेहिशिखामणि वर्णि-
मुखाखिलवर्गनुताङ्घ्रे (वरादिसमस्तनुताङ्घ्रे)
देशिकराज दयार्णव देहि तवाङ्घ्रिसरोरुहदास्यम् ॥
सन्नतकाङ्क्षितवस्तुचयप्रतिपादनदीक्षितनैजकटाक्षा-
पारमहत्त्ववितीर्णरथद्विरदाश्वपदातिमुखाखिलभूते ।।
बन्धविमोचनकाङ्क्षजनावलिमोक्षवितारकबोधवितारिन्
देशिकराज········॥२॥
नम्रजनप्रमदाब्धिविधो परिरब्धविरक्तिनिजाभिधकान्त
चन्द्रपितामहचन्द्रसहप्रभवाधवचन्द्रकलाधर (शिरोमणि) रूप ।।
पन्नगतातपितामह पन्नगतल्पक पन्नगभूषणमूर्ते
देशिकराज········॥३॥
योगिगणाहृतपादरजोनिखिलैहिकमुख्यपदार्थविरक्तजनाप्य-
क्ष्मापतिकोटिकिरीटतटाग्रनिघृष्टपदामृतसंभवयुग्म ।।
शीतकराधिक शीतलहृत्करगामलकीविहिताखिलविद्य (वेद्य)
देशिकराज········॥४॥
तत्तदभीप्सितवस्तुनिकायवितारणरूपनिजव्रतयोग्या-
त्यद्भुतवेगवितीर्णमहर्द्धिचयप्रणमज्जनकोटिगतानाम् ।।
पादरजोनतकाङ्क्षितसर्वपदार्थचय-स्पृशिदीक्षितवीक्ष
देशिकराज········॥५॥
दिव्य (रम्य) शरीरमनोधिषणा हृदयाखिललक्षणजन्मधरित्रि
स्वीकृतदक्षिणदिङ्मुखदत्तगुरुव्रजवल्लभशंकरमूर्ते ।।
अङ्घ्रिरजःशरणागतदीनजनालिशुगावलिकृन्तनदीक्ष
देशिकराज········॥६॥
आनतिकृत्सुलभीकृतमोक्षपदस्वरदच्छदनिर्जितवम्ब
लोचनपादकणादमुखोक्तनयव्रजपारगतादकटाक्ष (पण्डितराज) ।।
शान्तिमुखाखिलसाधनपूगवितारकनैजपदस्मृतिलेश
देशिकराज दयार्णव········॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ मनुरूपसरोरुहतत्परभृङ्गनिजाकृतिमानसवृत्ते ।
ॐ मनुराजमुखाखिलतारकमन्त्ररहस्य विबोधदवाक्यैः (वितारिन्) ॥
ॐ निनदामृतपानपरायण भक्तजनव्रजमोक्षद तूण
देशिकराज........॥८॥

श्रीनृसिंह भारतीयद्वयस्तोत्रम्

[हरनर्तनं]

एणडिम्भधराकृतां गुणदायकौगणपार्चकौ ।
कृष्णशम्भुसमौ कृतान्तभयापहौ करुणम्बुधी ॥
संयताक्षसमर्चितौ समलोचनं विषमेक्षणम् ।
श्रीनृसिंहशशाङ्कशेखरभूगुरुं हृदि भावये ॥१॥

श्रीसच्चिदानन्दशिवनवनृसिंहभारती स्तवः

[मात्रिकं दण्डकम्]

भक्तजननामरभूरुहमुद्राकरकञ्जानुग्रहदत्तानतकाम्यं
भवभयभञ्जनमुखनिखिलेप्सितवरतति-
पूरण वाञ्छकजनमस्तकनभ्यम् ॥
भास्करभास्वरकाषायाम्बरकर धृत-
दण्डगलस्थित मालामुखरम्यं
हृदये कलये सततं सच्चित्सुखशिवनूतननरहरिगुरुदेवम् ॥१॥

कृतकृतान्तप्रमुखभयालीविनतभवा-
म्बुधिपारदनिजपदधूलिलवं ।
कृत्स्नपदानत दीनकृपाब्धिं कनकोदर-
हरनारदकीरनिभज्ञानम् ॥
कृष्णद्वैपायनमुखसूत्रितसनकादीक्षित-
साक्षात्कारात्मकधीदं हृदये कलये सततं........॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीः शृंगगिरिगुरुस्तवाः

[शार्दूलविक्रीडितम्]

अक्षांघ्र्यब्जकणादकापिलमुखश्रुत्यन्तशास्त्रालिदा
न्देहारोग्यदृढत्वपूर्ण कमलाबुद्ध्यात्मबोधप्रदान् ।।
संसाराब्धिनिमग्नतारणपटून्भक्तेष्टविश्राणकान्
अष्टैश्वर्यमहविभूतिततिदान्नौमि क्षमादेशिकान् ।।१।।

इष्टव्रातवितारिधूलिचरणान्कष्टावलीकृन्तनाञ्छिष्ट
शेषजनार्चितांघ्रिकमलान्भ्रष्टावलीपावनान् ।।
साष्टस्वांसमस्तयोगदपदांस्तुष्टाशयान्साधकै ।
रष्टैश्वर्यमहाविभूनिततये जुष्टान्भजे क्षमागुरून् ।।२।।

भक्तेष्टस्पृशिधूतकल्पदपान्पायोजधिक्कृत्करान्
काणादाक्षपदादिशास्त्रनिकरज्ञानप्रदानुग्रहान् ।।
श्रीमन्माधवमेनकातनुजनुमुख्यांघ्रिपद्माचार्यकान् ।
क्षोण्याचार्यपदस्थितान्यतिपतीन्वन्दे नृसिंहाभिधान् ।।३।।

अज्ञानाख्यनिदाधपीडिततनून्कीनाशपाशास्पद-
प्राणम्रावनबोधनीरधरदान्संसारपारप्रदान् ।।
वीनस्वाम्यजमुख्यनिर्जरनवाकारायितस्वाकृतीन्
अष्टे··· ····।।४।।

रम्यानन्तगुणोत्तमांचितमतीन्कृत्ताखिलातञ्जीग
न्नभ्यांघ्र्यंबुभवान्कृपाजलनिधीन्कृत्स्नात्मताभूतिदान् ।।
काम्याशेषपदार्थदाननिपुणान् विष्ण्वादिनम्याकृतीन्-
त्रैविष्टपाल्यार्चतान ।।५।।

कष्टव्रातसमाष्टनष्टिकरणानिष्टार्थसंस्पर्शकान् (विश्राण) ।
म्रष्टालीद्रुतपावनान्पदनमच्छिष्टाखिलेष्टप्रदान् ।।
तुष्टस्वान्ततयासकृत्स्मरणतोऽप्यष्टांगयागस्पृशः
क्षोण्याचार्य·······।।६।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीकृष्णानन्दतीर्थस्तवः

[उपजातिः]

श्रीवेणुगोपालकदत्तराजराजेश्वरीमुख्यसुरव्रजानाम् ।
उपासकांछ्रीशकटाभिधानक्षेत्रोल्लसच्छ्रीमठपान्प्रपद्ये ॥१॥
भक्तप्रमोदप्रदचित्तवृत्तीन्भवार्कतप्तानववारिवाहान् ।
सिन्दूरशोणाम्बरवेष्टिताङ्गान्कृष्णदिमानन्दयतीन्प्रपद्ये ॥२॥
वैराग्यपूर्णान्हरिपादभक्तान्कारुण्यसिन्धून्प्रणताघनाशान् ।
करात्तदण्डान्कलिकल्मषघ्नांस्तीर्थप्रकाण्डान्कलयामि चित्ते ॥३॥

●

श्रीशकटपुरक्षेत्रे श्रीवेणुगोपालदत्तात्रेयस्तोत्रम्

[मात्रिकं दण्डकम्]

भक्तश्रेणीकाङ्क्षापूरणचणकल्पद्रूभवभवभयततिभेत्तारौ
भोगिक्ष्मापतिघस्राधीश्वरसन्निभकेशी चरणन्यक्कृतशोणाब्जौ ।
पीताम्बरधरसिन्दूरारुणपटवृतकायौ पादानतवरदानरतौ
वन्दे श्रीमद्वेणुधराधरगोपालार्भकदत्तात्रेयक्षोणिगुरू ॥ १ ॥

पादाम्भोजस्मृतिलवलभ्याखिलनतकाम्यौ गृहियतिलीलाकृतिरम्यौ
कुन्तीमाद्रीवर्ष्मजहैहयभूपतिनम्यौ कृष्णकलेवररक्ततनू(लोहितकायौ) ।
कृजौमचराचरयोगक्षेमप्रवणहृदस्त्न कृपयाभरितौ कृत्तकृतान्तौ
वन्दे श्रीमद्वेणुधराधरगोपालार्भकदत्तात्रेयक्षोणिगुरू ॥ २ ॥

वैदर्भीमणिमुक्तिस्त्रीमणिविरचितमोदौ नारदशुकगोरक्षेड्यौ
कनकनिकायश्राणनपण्डितपादपरागौ चरणयुगानतवरदातारौ ।
संसृतिपारदसाधनदापनतत्परचित्तौ नीरदभास्करनिजचिकुरौ
वन्दे श्रीमद्वेणुधराधरगोपालार्भकदत्तात्रेयक्षोणिगुरू ॥ ३ ॥

चरणाम्भोभवसन्ततविरचितपापालिहरौ विनतासुतनिजपदयानौ
दीनानन्यगनिजशरणागतरक्षणदीक्षौ मुरलीगायकतस्करिणौ ।
कणभुक्फणिपतिजैमिनिशुकगुरुमुखनयदार्चौ एणाङ्कव्रजरुचिरास्यौ
वन्दे श्रीमद्वेणुधराधरगोपालार्भकदत्तात्रेयक्षोणिगुरू ॥ ४ ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ अथ श्रीशक्रस्तवः

[मयूरगतिः]

व्याजविहीनकृपार्णवहस्तितुरङ्गमुखाखिलनम्रजनाशा-
पूरणसक्तहृदब्जपुलोमसुतारमणात्मभवेश षडास्य ।
निर्जरजातिजनुर्निखिलक्षितिपालाम्भोहरिदीश्वरमुख्या-
तावकपादपयोरुहनम्रमिमं कृपया परिपालय शक्र ॥१॥

आत्मविबोधपरप्रणतप्रमदाब्धिविधो कलिताखिलविद्य
पन्नगसूसहजन्मतनुप्रजनेनिजतातपितृव्यज चन्द्र ।
आनतकाङ्क्षितपूरक सर्वसुपर्वसमादृतपादपयोज
तावकपादपयोरुहनम्रमिमं कृपया परिपालय शक्र ॥२॥

आशुयथेष्टवितीर्णविनम्रमनोरथ शच्युपगूढशरीर
सर्वविदर्द्धिदादुक षण्मुखकाम्यसुत स्वसहोद्भवविष्णो ।
दीनकृपाजनिवार्दविभूललनागणसेवितसुन्दरमूर्त्ते
तावकपादपयोरुहनम्रमिमं कृपया परिपालय शक्र ॥३॥

भानुसहोदरतत्त्वविबोधनतत्परबिम्बविजिष्णु [षणव] धराढ्य
पादनमज्जनतासुलभीविहितैहिकनाकगभोग्यनिकाय ।
ॐ जपतत्परमानसमस्करिमण्डलमोदितमानसपद्य
तावकपादपयोरुहनम्रमिमं कृपया परिपालय शक्र ॥४॥

सर्वबहिर्विषयालिपराङ्मुखमानसवृत्तियतिप्रियचित्त
वर्ष्मंमनोहरताञ्चितवृत्रमुखासुरसूदनसाधनकृत् ।
पादनताखिलकष्टनिवारक सर्वशुभालिवितारकपाद
तावकपादपयोरुहनम्रमिमं कृपया परिपालय शक्र ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शफरावारस्तवः

[सिंहविक्रीडितम्]

विजितविषयभोगकाङ्क्षार्चितं रागिदूराङ्घ्रिकं
प्रणतकुमृतिवार्धकीवारकं देवताल्यर्चितम् ।
द्रविणमतिविधूतयक्षेशजीवीकृतस्वानतं
शफरवपुषमाश्रये केश दीनकारुण्यधिम् ॥ १ ॥

द्विरदथतुरङ्गकोशादिदं पार्वतीसोदरं
भुजगनृपतिभोगनैजासशं वेदरक्षाकरम् ।
विधिजशुकमुखर्षिवर्येडितं पातकोन्मूलकं
शाश्वतानन्ददं केशवं दीनकारुण्यधिम् ॥२॥

द्रविडनृपतिवर्यसंरक्षकं धर्मकर्मादिदं
नृपतिपदमुखोन्नतस्थानदं ज्ञानविज्ञानदम्
विनतजनसमस्तरोगच्छिदं सर्वलोकाधिपं
वाजिकण्ठासुहं केशव दीनकारुण्यधिम् ॥३॥

यमितधिषणलोकसञ्चिन्तितं भीतिहाभीष्टदं
प्रशममुखगुणोत्तमस्पर्शकं ब्रह्मशम्भ्वर्चकम् ।
परमकरुणायांहसां मर्षणं श्रान्तिपूगापहं
योगसिद्ध्यादिदं केशवं दीनकारुण्यधिम् ॥४॥

श्रीशरवणभवस्तवः

पदयुगनतसुरवृक्षं भवभवभयचयनाशम् ।
अलिजलधरनिभकेशं शरवणभवमहमीडे ॥१॥

करजितजलजनिगर्वं शरदृतुजलधरवस्त्रम् ।
कामितवरततिदानं शरवणभवमहमीडे ॥२॥

अदितिजवरचमुनाथं हृतनतयममुखभीतिम् ।
पदनतनिकरकृपाब्धि शरवणभवमहमीडे ॥३॥

सुरगणविहितपदार्चं मुनिततिकृतनुतपादम् ।
तनुरुचिविजितसुवर्णं शरवणभवमहमीडे ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नतजनवरदनिजाङ्घ्रि भवजलनिधिघटजातम् ।
अमृतदनिभनिजकेशं शरवणभवमहमीडे ॥५॥

हृतनतजनकृतपापं त्रिभुवनहितकरपादम् ।
अविरतमवितनतालिं शरवणभवमहमीडे ॥६॥

करलसदभयदमुद्रं दृशिपदमुखनयदाङ्घ्रिम् ।
मुखजियजलनिधिजातं शरवणभवमहमीडे ॥७॥

दिविभवनृपजनकाम्यं दिविभववरततिनम्यम् ।
गुणमणिगणमुखरम्यं शरवणभवमहमीडे ॥८॥

हृतनतजनततिकष्टः प्रकलितनतसकलेष्टः ।
निजपदनुतपठनाद्द्राग् वितरति विभवसमष्टिम् ॥९॥

●

श्रीशंकराचार्यनवपत्नमालिकास्तवः

[मेघस्फूर्जिता]

पदाम्भोजद्वन्द्वप्रणतजनताचित्तपद्मान्तरस्था-
खिलाशालीपूर्तिव्रतधरसुधापायिधात्रीप्रजातम् ॥
पुनर्भूयोभूयःप्रभवनिधनाकारसंसारभीति-
प्रदाविद्योर्वी भूपरकरुणं शंकराचार्यमीडे ॥१॥

भजन्मूलाविद्याच्छिदविधिपटुज्ञानमुद्राप्रणम्र-
व्रजाभीष्टस्पर्शव्रतपिशुनधृद्दक्षवामस्वहस्तम् ॥
नमत्कल्याणालीवितरणकृते कङ्कणाबद्धदीक्ष-
स्वपाणिद्वन्द्वश्रीविजितवनजं शंकराचार्यमीडे ॥२॥

विरक्तिप्राग्भारोल्लसितहृदयाम्भोजतासूचिदण्ड-
स्वकीयांशुन्यक्कृच्छविपटधृतस्वर्णवर्णस्वगात्रम् ॥
दयाशान्तिक्षान्तिप्रभृतिनिखिलस्वीयभृत्यावलीयु-
ग्विमुक्तिस्त्रीकाभ्यस्वरुचिरधियं शङ्कराचार्यमीडे ॥३॥

पयोजाङ्घ्र्याचार्यत्रिदिवभवरात्टोटकाचार्यहस्त-
स्फुरद्धात्रीतत्त्वप्रमुखयतिराट्पूजितस्वाङ्घ्रिपद्मम् ॥
भुवि प्रायोनष्टश्रुतिपथपुनःस्थापनायावतीर्णं
कृतान्तोच्छेत्तारं यतितनुभृतं शंकराचार्यमीडे ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वहस्ताम्भोजातप्रणयविहिताराधनातुष्टरात्री-
ट्कलोत्तंसाम्भोजप्रभवरमणीकृष्णमुख्यामरालिम् ॥
महालावण्यश्रीलसदवयवस्वाश्रितप्रेमिताभा-
ङ्मनीषारम्यत्वप्रभृतिरुचिरं शंकराचार्यमीडे ॥५॥

अविद्याम्भोराशिप्रपतनजनुःकष्टसाहस्रपारं-
परीनिर्विण्णान्तःकरणचरणानम्रकारुण्यसिन्धुम् ॥
इहत्यानन्दाप्तिप्रियमतिनमद्वर्गकाङ्क्षाधिकेष्ट-
प्रभूतैश्वर्यादिप्रदनतिलवं शंकराचार्यमीडे ॥६॥

हृदन्तस्तमिस्रक्षपणदिनपब्रह्ममुद्राघभू भृत्
कुठारैस्तद्वन्द्वप्रभृतिविलसद्वेणुदण्डाढ्यपाणिम् ॥
दृगङ्घ्र्याद्यादिव्यासावधिकृतनयग्रन्थपारी (निष्णात)
ङ्महापाण्डित्यानुग्रहकरपदं शंकराचार्यमीडे ॥७॥

समस्तप्रज्ञानप्रथितधिषणाम्नायभाग्यादिकीर्त्ति-
स्फुरद्विद्यारण्यप्रभृतियतिराट्पूगगीतस्वकीर्तिम् ॥
स्वकीयाङ्घ्र्यम्भोभूयुगलनतिकृज्जन्मसाहस्रकोटि
व्रजोत्पन्नाघाली भुजगगरुडं शंकराचार्यमीडे ॥८॥

पयोजातोद्भूतस्वतनुविनभावर्ष्मसंजातवाह-
क्षमाधर्तृव्रातक्षितिपतिसुतावल्लभादिस्वरूपम् ॥
स्वरूपानन्दाब्धि वहुविधबहुक्लेशपारम्परीभा-
ग्भवाम्भोधेः पारस्पृशिचणनतिं शंकराचार्यमीडे ॥९॥

●

श्रीशंकरादिपकस्तवः

[मात्रिकं दण्डकम्]

भक्ताभीष्टश्राणककल्पक्षोणीजातान्भूयो भवमृतिभीतिघ्ना-
न्भास्करभास्वरसिन्दूरारुणवस्त्रविराजितकार्तस्वररुचिरुचिरतनून् ॥
निर्जरनारीनरकोटीरगमणिनीराजितपादपराजितपाथोजा-
ञ्छ्रीमच्छंकरपङ्कजचरणसुरेश्वरतोटकहस्तामलकान्कलयेऽहम् ॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ अथ श्रीशारदाब्जधरवालुकेश्वरस्तवः

[रथोद्धता]

शारदाब्जधरवालुकेश्वरान् भक्तकल्पधरणीरुहस्मृतीन् ।
संस्मृताङ्घ्रिवढवामुखानतीन् भृङ्गभोगिचिकुरान् भजेऽनिशम् ।। १ ।।

नीरदाभिमतिहृत्करान्विताञ्छारदाभ्रनिभवस्त्रवेष्टितान् ।
पादनम्रवरदान् भजेऽनिशं शारदाब्जधरवालुकेश्वरान् ।। २ ।।

देवतानिकरनम्यपादुकान् प्रेमपूर्णमतिरम्यमानसान् ।
भक्तियुक्तजनकाम्यदान् भजे शारदाब्जधरवालुकेश्वरान् ।। ३ ।।

कृष्णमुख्यसुरसेविताङ्घ्रिकान् कृत्तसन्नतकृतान्तसाध्वसान् ।
कृत्स्नलोकशुभकारकान् भजे शारदाब्जधरवालुकेश्वरान् ।। ४ ।।

मेनकादिदिविजाप्सरोव्रजैः शौनकादिमुनिभिश्च पूजितान् ।
मानहीनकरुणाम्बुधीन् भजे शारदाब्जधरवालुकेश्वरान् ।। ५ ।।

घोरभीकरभवाभिधानभाङ्नीरराशिपतिताशुपारदान् ।
दीनरक्षणपरायणान् भजे शारदाब्जधरवालुकेश्वरान् ।। ६ ।।

पादनम्रविनतातनुप्रभूमुख्यसर्वविनतेप्सितप्रदान् ।
दीनरक्षणपरायणान् भजे शारदाब्जधरवालुकेश्वरान् ।। ७ ।।

एणनीरजनुरम्बुजेक्षणाञ् छोणवारिजनिजिष्णुपाणिकान् ।
शोणताविजितविद्रुमान् भजे शारदाब्जधरवालुकेश्वरान् ।। ८ ।।

अङ्घ्रिनम्रजनकष्टनाशकं प्रेमभक्तिनमदिष्टदायकम् ।
श्रद्धयास्तवपराष्टकं पठञ्जायतेऽतिजवमष्टसिद्धिभाक् ।। ९ ।।

०

श्रीशारदास्तुतिः

[शार्दूलविक्रीडितम्]

फालाक्षीयललाटलोचनशिखिज्वालाप्रदग्धावनीए
धृद्योज्जीवितशेषमुख्यविजितस्वान्तातिदूराङ्घ्रिकीम्
नित्यानित्यविवेकपूर्णधिषणासंन्यस्तसर्वैषणा-
व्रातावाप्यपदारविन्दयुगलां श्रीशारदाम्बां भजे ।। १ ।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पाकाहित्प्रमुखासुरासुहृतिकृत्पाथोनिधीट्पावक-
पीयूषांशुसहस्रदीधितिमरुन्मुख्यार्चिताङ्घ्रिद्वयाम् ।
स्वीयाङ्घ्र्यम्बुसमुद्भवोद्भवरजोलेशस्मृदालीजरा-
दुर्मृत्युप्रमुखाखिलार्त्तिशमनीं श्रीशारदाम्बां भजे ॥ २ ॥

अप्यत्यन्तदरिद्रमन्दधिषणो वाचा श्रिया च स्वया
देवाचार्यधनाधिनाथनिखिलाहङ्कारसंहर्तृताम् ।
यत्पादाब्जसकृत्प्रणामकणिकामात्रप्रभावादहो-
सम्प्राप्याशु विराजते पुरुयशास्तांशारदाम्बां भजे ॥ ३ ॥

नानाकष्टसहस्रकोटिनिकरस्वाकारनक्रावली-
सम्पूर्णप्रभवाब्धिमग्नविनमत्कारुण्यकीलालधिम् ।
पूर्णक्षोणिधरोद्भवावरखिधृद्वंशावतंसोद्भव-
हृत्पाथोजदिवाकरानुजनुषं श्रीशारदाम्बां भजे ॥ ४ ॥

हस्तीन्द्राननवीरभद्रदिविषद्वक्त्रप्रभासेवितां
हस्तिस्यन्दनवाजिकोशपृतनामुख्याखिलश्रीप्रदाम् ।
पादाम्भोजमधुव्रताशयजनुःपारम्परीसञ्चित-
सर्वांहोवितततीभपञ्चवदनं श्रीशारदाम्बां भजे ॥ ५ ॥

आत्मोद्भूतसमुद्भवाशिनिचयक्षोणीधरस्वासना-
कान्तारत्नमयोद्भवामुखसुरस्त्रीरत्नसंसेविताम् ।
मानातीतमनोहरत्वविलसल्लावण्यवारांनिधि-
स्वीयाङ्गच्छविधूततप्तकनकां श्रीशारदाम्बां भजे ॥ ६ ॥

क्षीराम्भोनिधिसम्भवाशिनिकरज्येष्ठोरुजाताङ्कक-
पाराशर्यसमुत्थशौनकमुखैर्मौनीश्वरैः संस्तुताम् ।
भैमीशाय दवासिभीमसहभूकायाय वस्तुक्षरा-
तद्भिन्नाच्च परं तदाकृतिधरां श्रीशारदाम्बां भजे ॥ ७ ॥

तत्तत्काम्यपरम्परेप्सुचरणाम्भोजातनम्रावली-
सर्वाभीष्टवितारकत्वविलसल्लेशस्ववीक्षाव्रजाम् ।
आम्नायालितदुत्तमाङ्गगदितत्रैवर्ग्यमोक्षाभिधा-
शेषार्थव्रजदानतत्परपदां श्रीशारदाम्बां भजे ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जातीचम्पकपद्मभूमिकमलप्रत्यग्रमल्लीमनः-
प्रह्लादप्रदकर्णकुण्डलसुमव्रातार्चिताङ्घ्रिद्वयाम् ।
आधारादिनिजाभिधानसरसीसञ्जातमध्योल्लसत्-
स्वीयावासनिवेदिपद्मसदनां श्रीशारदाम्बां भजे ॥९॥

पादाम्भोभवयुग्मभृङ्गहृदयग्रन्थिप्रभेदक्रिया-
प्रौढात्युग्रपरश्वधाकृतिधरस्वापाङ्गलीलालवाम् ।
अम्भोराशिचतुष्टयस्वरशनाक्षोणीतलाधीश्वर-
स्थानश्राणनपण्डितस्वनमनां श्रीशारदाम्बां भजे ॥१०॥

सर्वक्षोणिभुवःस्वरादिभुवनव्रातस्वसद्मप्रजा-
सङ्घातादृतशासनाढ्यचरणाम्भोजातयुग्मस्मृताम् ।
कुष्ठापस्मृतिराजयक्ष्मविविधप्रज्वारमुख्यामय-
व्रातध्वंसनतत्परस्वचरणां श्रीशारदाम्बां भजे ॥११॥

नम्रालीहृदयान्धकारविततिस्वाकारदैत्याधम-
प्राणोच्छेदनसक्तपण्डितनिजस्वान्ताङ्घ्रिपाथोरुहाम् ।
वीणापुस्तकमुद्रिकाद्वयसुधावार्धातयुक्पाणिका-
स्पष्टीभूतसमस्तवृत्तिमनसं श्रीशारदाम्बां भजे ॥१२॥

रागद्वेषविमोहलोभमदयुङ्मात्सर्यनैजाकृति-
स्पष्टीभूतविकारलेशरहितध्यातस्वपादाम्बुजाम् ।
स्वीयस्वान्तसरोजघस्रमणश्रीकान्तदाक्षायणीट्-
पौलोमीशधनञ्जयादिकलितां श्रीशारदाम्बां भजे ॥१३॥

चेतःशान्तिसमस्तबाह्यखदमश्रद्धातितिक्षामुख-
मोक्षश्राणकतत्त्वबोधकरणव्रातप्रदाङ्घ्रिस्मृतिम् ।
संसारस्य निसर्गतः प्रभवतः सर्वंश्रमान् सत्वरं
हृत्वा शाश्वतसौख्यमाशु ददतीं श्रीशारदाम्बां भजे ॥१४॥

अज्ञानप्रभवाः प्रणम्रचिता जन्मस्वसङ्ख्येषु या
सोधोन्मूल्य महाद्रिकोटिविततीरप्याशु कारुण्यतः ।
निःशेषं यममुख्यसाध्वसचयोच्छेदाय योगेशतां
द्राग् दत्ते यममुख्यरञ्जितमलं श्रीशरदाम्बां भजे ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्ताभीष्टनिकायदानरसिकस्वाङ्घ्रिस्मृतेः शारदा-
देव्याः पादयुगींप्रणम्य पठतामेनां तदीयस्तुतिम् ।
विद्वद्वृन्दशिरोमणित्वतुलनाहीनाखिलश्रीतति-
नीरोगत्वकलत्ररत्नसुयशःपुत्रादिसम्पद् भवेत् ॥१६॥

•

ॐ अथ श्रीशास्तृस्तवः

[मन्दाक्रान्ता]

नेजाङ्घ्र्यम्भः प्रभवयुगलीनम्रपारम्परीणां
सर्वाभीष्टव्रजवितरणोद्भूतगीर्वाणवृक्षम् ।
श्रीशास्तारं जननमरणा वृत्तिमच्चक्रतौल्य-
भ्राजत्संसृत्युदितभयनिर्मूलकाङ्घ्रिं भजेऽहम् ॥१॥

अम्भोदातृभ्रमरनयनश्रोत्रमुख्याखिलानां
सर्वाहङ्कृत्यपनयनकृत्स्वीयशीर्षप्रजातम् ।
श्रीशास्तारं चरणयुगलीदिव्यलावण्यदीप्त्यु-
त्कर्षोद्रेकापहृतकमलाशेषदर्पंभजेऽहम् ॥२॥

मल्लीनेत्रामृतनिधिजनुः शारदाम्भोदकम्बु-
क्षीरन्यक्कृच्छविनिजपटालङ्कृतस्वीयकायम् ।
श्रीशास्तारं चरणविनतव्रातकाङ्क्षातिशायि-
सर्वेष्टार्थव्रजवितरणासक्तचित्तंभजेऽहम् ॥३॥

जम्भत्वाष्ट्रप्रमुखदनुजप्राणहर्तृस्ववज्र-
स्वाहाकान्ताहरिणतनुभूमुख्यनम्याङ्घ्रिपद्मम् ।
श्रीशास्तारं रतिनिभतनूपुष्कलाम्बासमेत-
श्रीपूर्णाम्बाहृदयवनभूकाम्यलावण्यमीडे ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादाम्भोजप्रणतिरतधीभक्तवात्सल्यहेतु-
स्वीयापाराम्बुधिनिभकृपारम्यनैजान्तरङ्गम् ।
श्रीशास्तारं निजपृथुकताकालयोग्यस्वनाना-
लीलाजालप्रमुदितमनोविष्णुशम्भुं प्रपद्ये ॥५॥

कृत्ताशेषस्वचरणनतव्रातमृत्युप्रमुख्या-
शेषानर्थव्रजनिजकृपापूरपूर्णान्तरङ्गम् ।
श्रीशास्तारं चरणशरणाशेषदीनाशयाली-
कृच्छ्रव्रातप्रशमनकृपासागरं भावयेऽहम् ॥६॥

अम्भोजातप्रभनलिनस्वाक्षणोत्सङ्गशम्भु-
वारां [निध्यु]द्भवमुखनुतस्वाङ्घ्रिपाथः प्रजातम् ।
श्रीशास्तारं दिविजवनितायक्षगन्धर्वयुग्म-
श्रेणीगीतस्वपदकमलद्वन्द्वमीडेऽनुघस्रम् ॥७॥

शोणाम्भोजच्छविनिजपदाम्भोजयुग्मप्रपन्न-
व्रातानांद्राग्भवजलनिधेः पारदानप्रवीणम् ।
श्रीशास्तारं कनकनिकरश्राणनासक्तियुक्त-
स्वीयस्वान्तानुगुणकनकद्योतिवर्ष्माणमीडे ॥८॥

स्वाङ्घ्रिध्यानप्रणमनमुखैर्योगिपद्यप्रजात-
स्वांहोराशिप्रदहनविभ्रह्लादितानम्रलोकम् ।
श्रीशास्तारं विनतविनतावर्ष्मसञ्जातनन्दी-
ण्मुख्याशेषाच्युतहरपरीवारलोकंप्रपद्ये ॥९॥

अज्ञानाम्धोनिधिघटजनुर्वोभनम्रेप्सितस्पृङ्-
मुद्राद्वन्द्वस्फुटितनिजकृत्यावलीवस्तुतत्त्वम् ।
श्रीशास्तारं प्रभवकणभुग्देवहूतीतनूभू-
व्यासाचार्यप्रमुखनयदस्वाङ्घ्रिपद्मांभजेऽहम् ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ अथ श्रीशास्तृपत्नीस्तुतिः

[मेघविस्फूर्जित]

योगिनम्यपदां सुरालिनमस्कृतां जितधीत्वदां
धूतजीवकुबेरगीर्धनदायिनीं हृतदुर्मृतिम् ।
शास्तृचित्तहरां करिप्रमुखप्रदां करुणार्णवं
धूतजीवकुबेरगीर्धनदायिनीं निखिलाघहाम् ॥१॥

स्वर्णवर्णतनुं मुनिव्रजसंस्तुतामहिकुन्तलां
भक्तकाङ्क्षितदां समस्तपुमर्थदां स्थिरभव्यदाम् ।
तत्त्वबोधनभूपतित्वमुखप्रदां हरिणेक्षणां
धूतजीवकुबेरगीर्धनदायिनीं त्रिजगन्नुताम् ॥२॥

दैत्यवृत्तिहरां जितेन्द्रियचिन्तितां हृतरुग्ज्वरां
शान्तिसंस्पृशिहापितश्रमसन्तर्तिं विबुधेडिताम् ।
पुष्पगर्भकचां भजद्वृजिनापहामभयप्रदां
धूतजीवकुबेरगीर्धनदायिनीयममुख्यदाम् ॥३॥

श्री शिवगङ्गास्तुतिः

[स्वागता]

रागहीनसुलभान् यमसक्तान् कृत्तदुर्मृतिहरान् सुरदीप्तान् ।
शक्रजीवविजिदर्थवचोदान् संस्मरामि शिवविष्णुपदीशान् ॥१॥

कारुणीजलनिधीशिवरूपान् हस्तिमुख्यदपदान् वृजिनघ्नान् ।
स्वर्णकान्तिवपुषो भवनाशान् संस्मरामि शिवविष्णुपदीशान् ॥२॥

ॐ मुखार्णनिरतान् यमिबन्धान् पूरुषार्थततिदान् वरदातॄन् ।
भारतीपदरतांश्चरितार्थान् संस्मरामि शिवविष्णुपदीशान् ॥३॥

अर्चिताब्जसुधरान् यमभीहान् दुष्टबुद्धिशमनान् हृतरोगान् ।
निर्विकारमतिदान् पृथुकीर्त्तीन् संस्मरामि शिवविष्णुपदीशान् ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मावचोऽम्बुसुनिधीन् जितरागान् भ्रान्तिमूलहरशान्तिदसेवान् ।
मर्षिताघनिकरान् यममातॄन् संस्मरामि शिवविष्णुपदीशान् ॥५॥

श्री शिवनृसिंहचरणस्तुति

[अश्वललितम्]

परमविबोधकान् यतमनोनिकायविनुतान् कृपाजनिमहीः
प्रणमदभीष्टहस्तिरथमुख्यदपदान् विमुक्तिरमणान् ।
यमिसुलभाङ्घ्रिकान् नतमुदासुधाब्धिशशिनो विबोधितकलान्
शिवनवनृसिंहचरणान् भजे निजहृदि भारतीकुलमणीन् ॥१॥

उरगधवासनोडुपतिधृन्निजाकृतिजुषः प्रणम्रवरदान्
बहुयमिपूजितान् नततते र्महर्द्धिसहितं विमुक्तिदपदान् ।
विभववितारकान् कमलदृक्पदाब्जमधुपान् अजाध्वधिषणान्
शिवनवनृसिंहचरणान् भजे निजहृदि भारतीकुलमणीन् ॥२॥

नतकरुणार्णवान् निटिलदृक्समाननियमान् जिताक्षहृदयान्
तनुमतिसुन्दरान् हरिणदृक्पराङ्मुखमतीन् समस्तनयदान् ।
पदजितपङ्कजान् भुवि दिवि प्रकृष्टसुखदान् सुवर्णतनुभान्
शिवनवनृसिंहचरणान् भजे निजहृदि भारतीकुलमणीन् ॥३॥

जगद्गुरुयतीन्द्रसार्वभौमस्तवः

[नन्दनम्]

अजितनिजाक्षदुर्लभपदौ जितेन्द्रियाप्याङ्घ्रिकौ
विबुधकदम्बगेयचरणौ ज्वरादिरुङ्नाशकौ ।
प्रणतविभूतिगीर्जितधनव्रजाधिराङ्गीष्पती
हृदि निदधे जगद्गुरुयतीन्द्रसार्वभौमौ सदा ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री शुकवनक्षेत्रे श्रीपद्मिनी-शुकवनेश्वरस्तुति

[नन्दनम्]

सपदि वितीर्णभक्तजनतासमस्तकार्यव्रजौ
सुरललनासुरातिशयनस्वकीयरम्याकृती ।
अहिरिपुमुख्यसर्वदिविजप्रकाण्डनम्याङ्घ्रिकौ
निजहृदि पद्मिनीशुकवनेश्वरौ भजे सन्ततम् ॥१॥

भ्रमरभुजङ्गमामृतधराभिमानहृत्कुन्तलौ
शरदृतुवारिवाहधवलाम्बरावृतस्वाङ्गकौ ।
सुललितनैजवर्ष्मसुषमाद्यसूर्यमेलादिकौ
निजहृदि पद्मिनीशुकवनेश्वरौ भजे सन्ततम् ॥२॥

शुनकतनूद्भवादिविनुतस्वकीयमाहात्म्य (सौन्दर्य) कौ
व्यवनिपवाहनाङ्घ्रिकमलस्वनव्यरूपान्तरौ ।
घनतरपीवरस्तनलसद्विशालताढ्योरसौ
निजहृदि पद्मिनीशुकवनेश्वरौ भजे सन्ततम् ॥३॥

कणभुगहीन्द्रदेवहवनीसुतादिशास्त्रप्रदौ
रणमुखसर्वकाम्य (यं) (काल) विजयप्रदायिपादस्मृती ।
गणपतिवर्ष्ममातृजनकप्रसादपात्रायितौ
निजहृदि पद्मिनीशुकवनेश्वरौ भजे सन्ततम् ॥४॥

श्री शुक्रस्तवः

[शार्दूलविक्रिडितम्]

भीतिव्रातहरं पयोदचिकुरं नम्रेष्टदानव्रतं
पद्मस्पर्धिकरं वलक्षवसन त्रैलोक्यपूज्याङ्घ्रिकम् ।
शण्डामर्कगुरुं मनोहरगुणं लक्ष्मीप्रदानप्रियं
कारुण्याम्बुनिधिं परावसवदं श्रीभार्गवं संश्रये ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चत्वाप्तपदाब्जभक्तजनताभूयोऽसुविश्राणत्कं
श्रीप्रह्लादबलिप्रमुख्यविनुतं प्रालेयकुन्दद्युतिम् ।
संसाराम्बुधिवाडवाश्रयभुजं हस्ताब्जराजज्जप-
मालादण्डकमण्डलुप्रभृतिकं श्रीभार्गवं संश्रये ॥२॥

नेत्राङ्घ्र्यब्जकणादकर्दमजनुर्नागाधिराड्जैमिनि-
व्यासाचार्यमुखोक्तशास्त्रकविताम‍ुख्यप्रदानुग्रहम् ।
सर्वज्ञं नतपातकालिजलधृज्झञ्झासमीरस्मृति
कष्टालीशमनेष्टदाननिपुणं श्रीभार्गवं संश्रये ॥३॥

श्री शुचिजनुः (कार्तिकेय) स्तुतिः

[द्रुतगतिः]

इभवरवदनप्रियतरसहज जगदिनतनुभूः शुचिजनुरव माम् ॥१॥
पदनतसकलेप्सितवरदनते सकरुणहृदय शुचिजनुरव माम् ॥२॥
सुरपतितनुजामुखकमलरवे इभमुखदपद शुचिजनुरव माम् ॥३॥
नतजनमुददान्वत उडुरमण जितमतिसुलभ शुचिजनुरव माम् ॥४॥
हिमकरशिशुधृत्प्रजनिततनुक फणिपतिविनुतशुचिजनुरव माम् ॥५॥
पदनतजनतावरततिदपद निखिलविदतुल शुचिजनुरव माम् ॥६॥
नमदखिलविधाभ्युदयदचरण त्रिदिवभवविनुत शुचिजनुरव माम् ॥७॥
सुलभितविभवस्वचरणनमन सुरपतिजनिप शुचिजनुरव माम् ॥८॥
निगडितसरसीरुहनिजभवन रसमितवदन शुचिजनुरव माम् ॥९॥
निटिलगदिविजानततनुजनन अतिमृदुहृदय शुचिजनुरव माम् ॥१०॥
निजतनुसुषमाविवशितहरिभूः मुखजितजलज शुचिजनुरव माम् ॥११॥
रसमुखसुलभस्पृशिनय वितत हरिभुविनिरत शुचिजनुरव माम् ॥१२॥
स्थिरतरकुशलस्पृशिरतहृदया-पुरुतरधिषण शुचिजनुरव माम् ॥१३॥
यमिमणिकुलपाक्तिधृतिरुचिर परपदनिरत शुचिजनुरव माम् ॥१४॥
हरिमुखदनुजप्रहरणनिपुण जितविधुतनुरुक् शुचिजनुरव माम् ॥१५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ अथश्रीशेषस्तवः

[मन्दाक्रान्ता]

भोगीशानं भुजगमहिषीचित्तपद्माहरीशं
कालाकारं सकलधरणीनायकत्वप्रदार्चम् ।
कीरादीड्यं तनुरुचिजिताम्भोधराशेषदर्पं
वन्दे शेषं प्रणतकरुणानीरधिस्वान्तरङ्गम् ॥१॥

●

ॐ अथ श्रीशेषशायिश्रीमहाविष्णुस्तुतिः

[जयानन्दः]

भजत्कल्पक्ष्माजं कररुचिहृताम्भोजदर्पं
भवाम्भोधेः पोतं वसनविजितस्वर्णवर्णम्
पयोधृत्स्वच्छायं करकलितभीहर्तृमुद्रं
महाविष्णुं पाथोनिधिगमनिशं भावयेऽहम् ॥१॥

निलिम्पालीनम्यं कृतनतकृतान्तापहारं
धनूधीभ्यां रम्यं कृतनतिकृपासिन्धुचित्तम् ।
विनम्राघालीघ्नं प्रणमदखिलाभीष्टदाङ्घ्रिं
महाविष्णुं पाथोनिधिगमनिशं भावयेऽहम् ॥२॥

●

ॐ अथश्रीसच्चिदानन्दस्तोत्रम्

[शार्दूलविक्रीडितम्]

नीरागाशयलभ्यपादवनजान् साराज्यमुख्यापहान्
भक्तव्रातजराकुमृत्युमुखहान् देवार्च्यपादाम्बुजान् :
गोःश्रीनिर्जितनिर्जराय नवनिध्यध्यक्षताश्राणकान्
श्रीसच्चित्सुखदेशिकान् हृदि दधे दीनानुकम्पार्णवान् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागास्यार्यनवीनरूपरुचिराञ्छ्रीचक्रपूजारतान्
नागाधीश्वरवर्ण्यभिन्नविभवान् पापेभपञ्चाननान् ।
कीरादीड्यपरात्मबोधजलधीन् स्वर्णापहासित्विषः
श्रीसच्चित्सुखदेशिकान् हृदि दधे दीनानुकम्पार्णवान् ॥२॥

धर्मादींश्चतुरो नताय ददतो भक्ताखिलेष्टप्रदान्
जीवब्रह्मविभेदवारणहरीन् हृद्ग्रन्थिभेदव्रतान् ।
विश्वात्मत्वविभूतिदाननिरतान् दुर्बुद्धिदैन्यापहान्
श्रीसच्चित्सुखदेशिकान् हृदि दधे सर्वाधिरुक्शामकान् ॥३॥

ब्रह्मश्रीपतिशङ्कराकृतिधरान् योगीन्द्रवन्द्याङ्घ्रिकान्
संसारप्रभवाखिलश्रमहरान् शान्त्यादिदाङ्घ्रिस्मृतीन् ।
क्षान्ताङ्घ्रिप्रणतालिमन्तुनिकरान् क्षोणीपतित्वप्रदान्
श्रीसच्चित्सुखदेशिकान् हृदि दधे भीतिघ्नयोगप्रदान् ॥४॥

श्रीसच्चिदानन्दसरस्वतीस्तोत्रम्

[उपजातिः]

पदाम्बुजानम्रसुपर्ववृक्षान्
संसारभीतिप्रमुखप्रणाशान्
संन्यासलिंगारुणवर्णवस्त्रा-
ञ्छ्रीसच्चिदानन्दगुरून्प्रपद्ये ॥१॥

वरप्रदानप्रणवस्वचित्तान्
जिताक्षचित्तालिसमर्च्यपादान्
विवेक-विज्ञान-विरक्ति-सिन्धून्
ञ्छ्रीसच्चिदानन्दगुरून्प्रपद्ये ॥२॥

श्रीकृष्णचन्द्रांघ्रिपयोजभृंगान्
कीनाशबद्धानतमोक्षदक्षान्
कारुण्य-पीयूष-पयोब्धि-चित्तान्-
ञ्छ्रीसच्चिदानन्दगुरून्प्रपद्ये ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वर्णादिभोज्यालिपराङ्मुखान्छ्री-
विमुक्तिकान्ताप्रवणांतरंगान् ।
भवाख्यघोराम्बुधिपारदातन्
न्छ्रीसच्चिदानन्दगुरून्प्रपद्ये ॥४॥

नम्रालिपापव्रजदग्धृपादान्
दण्डाक्षमालादिविराजिहस्तान्
भव्यस्पृगार्तिघ्नकटाक्षलेशा
न्छ्रीसच्चिदानन्दगुरून्प्रपद्ये ॥५॥

०

श्री सच्चिन्मोदक्षमागुरुस्तोम्

[ताटङ्कः]

भवसागरघटजातपादर्चं भजदमरोर्वीजातनतिं
चरणनताभयदायिकराब्जं भगवत्पदपदभक्तिपरम् ॥
वरनिकरस्पृशिमोदित्तचित्तं खरकरवर्णकवस्त्रधरं
सच्चिन्मोदक्षमागुरुमीडे कर्मोपास्तिज्ञानरविम् ॥१॥

मस्करिपुङ्गवमस्तकनम्यं विश्राणितनतजनकाम्यम् ॥
कृष्णविनिर्मितगीताहर्म्याधिष्ठितिमुखवहुगुणरम्यम् ॥
कृतविश्वात्मकसाक्षात्कारं क्रमितःसर्वत्त आत्मज्ञं
सच्चिन्मोद ॥२॥

वीणाधर्त्रीविणुधराङ्घ्रिप्रापकचरणस्मृतिकणिकं
वाणीकमचानुग्रहभूमश्राणननिपुणनिजापाङ्गम् ॥
खरभवनामकशर (जल) निधिनिपतितशरणागतजनततिपोतं
सच्चिन्मोद ॥३॥

०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री सत्यनारायणस्तुतिः

[पृथ्वी]

कृपामृतनिधिं जगत्ततिविभुं तनूजस्मरं
रमाहृदयगं नमत्सकलदं गजादिप्रदम् ।
कलाव्रजनिधिं यमिव्रजनुतं नतानन्ददं
दधामि सततं मुदा मनसि सत्यनारायणम् ॥१॥

नतेष्टवरदं फणीश्वरनुतं दिनेशार्चितं
रमाधृदुरसं सुव्रजनुतं नतर्द्धिप्रदम् ।
हराजकलितं धनप्रमुखदं सुरारिच्छिदं
दधामि सततं मुदा मनसि सत्यनारायणम् ॥२॥

शिवाग्रजनुषं कृपाजनिमहीं शुभालीप्रदं
नयप्रचयदं मनोहरतनुं स्मिताढ्याननम् ।
मनुप्रचयदं पयोरुहपदं परात्माभिधं
तधामि सततं मुदा मनसि सत्यनारायणम् ॥३॥

जगत्त्रयपतिं जपादिमुदितं यमीन्द्रार्चितम्
अशेषशुभदं घनद्युतितनुं नुराधासुहम् ।
किशोरवयसिस्थितं ध्रुवकृतार्चनोद्धर्षितं
दधामि सततं मुदा मनसि सत्यनारायणम् ॥४॥

●

श्री सत्यनारायणस्तोत्रम्

[लता]

अखिलभुवननम्यनैजाङ्घ्रिपपंकेजनुर्भक्तिमन्-
निखिलनिकरकाङ्क्षितस्पर्शकस्वर्धरित्रीरुहम् ।
हृदयकमल आश्रये संमृतिस्वाभिधानाम्वुराट्
पतितसकलभीति भङ्गाव्रते सत्यनारायणम् ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणविनतसर्वकाङ्क्षाप्रदालीलसन्मुद्रिका-
युगललसितनैजहस्तद्वयन्यक्कृताम्भोजनिम् ।
हृदयकमल आश्रये कज्जलव्योमभूभोजन-
भ्रमरजलदकान्तिशीर्षोद्भवं सत्यनारायणम् ।।२।।

प्रणतवितिवाञ्छिताशेषकाम्यावलीश्राणन-
प्रवणहृदयपङ्कजानानुमेयस्वकृत्यव्रजम् ।
हृदयकुहर आश्रये घस्रनाथोस्रराज्युल्लसत्-
कनकनिकरभासमानाम्बरं सत्यनारायणम् ।।३।।

अमरमथितदुग्धवाराशिमध्याप्तवस्तुव्रज-
प्रकर (प्रचय) शिखरशोर्षरत्नेन्दिराकाम्यदिव्याकृतिम् ।
हृदयनलिन आश्रये नीरभूसम्भवक्षोणिधृत्-
क्षितिपतनुजनिप्रियार्द्यर्चितं सत्यनारायणम् ।।४।।

अतुलरुचिरलावणीसम्पदुद्भासितस्वाङ्घ्रधी-
ललितहृदयमुख्यसर्वाङ्गरम्यत्वभाक्चेष्टितम् ।
हृदयवनज ईड उत्तानपज्जाततोकध्रुवा-
नुभवविशदरम्यचेतोऽम्बुजं सत्यनारायणम् ।।
अथवा—
हृदयवनज ईड उत्तानपादाभिधक्षोणिभृत्-
पृथुककृततपोवशीकारितं सत्यनारायणम् ।।५।।

करुणनिजकटाक्षलेशप्रभावार्कविध्वंसित-
प्रणतजनकृतान्तभीमुख्यसर्वान्धकारव्रजम् ।
हृदयवनज आश्रयाम्याधिरोगादिदुःखावली-
पतितविगतिदीनकारुण्यधिं सत्यनारायणम् ।।६।।

अनिशमपि तिलोत्तमामेनकाद्यप्सरःशेखरै-
र्विहितचरणसंजनुर्गाननीराजनाद्यर्चनम् ।
अथवा—(र्विहितचरणनीरजातापदानादिगानार्चनम्) ।
हृदयकुहर आश्रये सन्नताभीष्टसद्मप्रिया-
कनकतनुजमोक्षमुख्यापकं (मुख्यप्रदं) सत्यनारायणम् ।।७।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवनवलयमध्यसर्वाशिका सुप्रतिध्वानभाग्-
द्रुहिणतनुजकीरगीतेतिहासावलीघोषणम् ।
हृदयनलिन आश्रये घोरसंसारसंज्ञाम्बुराट्-
पतितविनतपारदानुग्रहं सत्यनारायणम् ॥८॥

बहुलजनिसहस्रसम्पादितागण्यपापावली-
विपिनसपदिदग्धृदावानलस्वाङ्घ्रिपद्मस्मृतिम् ।
हृदयकुहर आश्रय वैनतेयाभिधारूपधृन्-
निगमततिनिजासनाधिष्ठितं सत्यनारायणम् ॥९॥

नयनजरणजैमिनिव्यासमुख्योक्तशास्त्रावली-
प्रमुखनिखिलबोध्यविज्ञानदस्वाङ्घ्रिभक्त्यादिमम् ।
हृदयवनज आश्रये नम्रकष्टावलीनाशयुङ्-
निखिलकुशलदानदीक्षाधरं सत्यनारायणम् ॥१०॥

●

श्री सप्तगिरीश्वरदम्पति श्रीवेङ्कटेशस्तुतिः

[पृथ्वी]

अशेषभुवनप्रसूजनकनैजलीलाकृती
अनेकपतुरङ्गमप्रमुखसर्वसम्पत्प्रदौ ।
अपारकरूणासुधानिधस्वहृन्नीरजा-
वये शरणमम्बुधिप्रजनिवेङ्कटेशौ मुदा ॥१॥

अनङ्गमुखसेवितस्वचरणामृतप्रोद्भवौ
प्रणम्रजनवाञ्छितालिखपदार्थविश्राणकौ ।
परस्परतपः फलायितपरस्परप्रेमकौ
भजाम्यमृतशेवधिप्रजनिवेङ्कटेशौ मुदा ॥२॥

विनिर्जितमनोभवप्रमुखलभ्यपादाम्बुजौ
पादम्बुजनतव्रजप्रमदनीरराश्यब्धिजौ ।
प्रणम्रजनतावशीकृतसमस्तविद्यावली
श्रये शरणमम्बुधिप्रजनिवेङ्कटेशौ मुदा ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निलिम्पनिकरस्फुरन्मुकुटघृष्टपादाम्बुजौ
यथेष्टमतिसत्वरं लषितपूगपूर्त्तिव्रतौ ।
वचोऽर्थवदभेद्यताञ्चितपरस्पराश्लेषणा-
वये शरणमम्बुधिप्रजनिवेंकटेशौ मुदा ॥४॥

विभूतिनिचयस्पृशिप्रभृतिरक्षितस्वानतौ
षडास्यगणपप्रसूद्रुहिणवल्लभार्घ्यर्चितौ ।
पयोजजपयोधिजार्भकधरादिसंसेविता-
वये शरणमम्बुधिप्रजनिवेंकटेशौ मुदा ॥५॥

अहेतुककृपाजनिक्षितिहृदाख्यपाथोरुहौ
ललाटनयनाद्यनुग्रहपरायणस्वाशयौ ।
पदाब्जनतलाकिनीमुखनिलिम्पनारीव्रजौ
भजाम्यमृतशेवधिप्रजनिवेंकटेशौ मुदा ॥६॥

अजाक्षिजविलोचनप्रभवसोदरीभामकौ
तुलादिरहिताखिलावयवलावणीसागरौ ।
कणादनमुखोदिताखिलनयप्रवीणत्वदा-
वये शरणमम्बुधिप्रजनिवेंकटेशौ मुदा ॥७॥

निजप्रणववाच्यतापरसशीर्षवेदव्रजौ
सदा प्रणवसक्तधीयमिजनप्रसादोन्मुखौ ।
इहोपरि सुखप्रदस्वचरणाम्बुजन्मस्मृती
अये शरणमम्बुधिप्रजनिवेंकटेशौ मुदा ॥८॥

निजाधररतसत्प्रभानिहतबिम्बदर्पव्रजौ
समस्तविषयावलीविरतिभाग्जनाप्याङ्घ्रिकौ ।
अशेषजगतीत्रयस्थितसमस्तवस्त्वीश्वरौ-
अये शरणम्बुधिप्रजनिवेंकटेशौ मुदा ॥९॥

स्वकीयतनुभास्वरच्छविपरास्तहेमाम्बुदौ
क्षणार्धलवसंहृताखिलनतार्त्तिशीकावली ।
अतिद्रुतवितीर्णतत्सकालकाङ्क्षतश्रेयसा-
वये शरणमम्बुधिप्रजनिवेंकटेशौ मुदा ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जलोद्भवभुजंगमक्षितिपभोगदिव्यासनौ
क्षपाधिपतिशेखरप्रभृतिदेवदेवार्चितौ ।
गृहीतपदसन्नतेक्षितवितारदीक्षाविधि
अये शरणाम्बुधिप्रजनिवेंकटेशौ मुदा ॥११॥

श्री सप्तगिरीश्वर (तिरुपति) क्षेत्रे श्रीवेंकटेशस्तोत्रम्

[पुष्पिताग्रा]

निजचरणपयोजजातभक्तव्रजसकलेष्टवितारिकल्पवृक्षम् ।
जनिमृतिमुखसर्वभीतिहन्तृस्मृतचरणं कलयामि वेंकटेशम् ॥१॥

गगनभवनिजाशनम्बुधर्त्तृभ्रमरतमोद्युतिनैजशीर्षजातम् ।
सलिलभवसमस्तदर्पहर्तृस्वकरयुगं कलयामि वेंकटेशम् ॥२॥

दिनकरकरदीप्तशातकुम्भानुकृतनिजच्छविवस्त्रवेष्टितांगम् ।
पदनतजनतेप्सितार्थदानप्रवणमतिं कलयामि वेंकटेशम् ॥३॥

परिमितिरहिताङ्घ्रिनम्रकाम्यस्पृशिपरितुष्टमनोऽमृतप्रजातम् ।
निजपदनतपालनादिरम्यस्वगुणततिं कलयामि वेंकटेशम् ॥४॥

शतधृतिरजतक्षमाधराधीट्शतमखमुख्यनिलिम्पपूजिताङ्घ्रिम् ।
प्रणतजनकृतान्तमुख्यमोहृत्च्चरणयुगं कलयामि वेंकटेशम् ॥५॥

रघुपतियदुनाथरूपधरिप्रकलितनग्यमनोज्ञदिव्यमूर्तिम् ।
अविरलकलिकष्टपीडितालीकरुणं कलयामि वेङ्कटेशम् ॥६॥

जलजनिजनिवर्ष्मेनकाजापतिमुखसर्वसुपर्ववन्दिताङ्घ्रिम् ।
अजतनुभवकीरशौनकादिस्तुतचरणं कलयामि वेङ्कटेशम् ॥७॥

अविरतजननमृत्युरूपसंसृत्यनिधपयोनिधिपारदाङ्घ्रिसेवम् ।
प्रणतजनमनोरथालिपूर्तिव्रतरुचिरं कलयामि वेङ्कटेशम् ॥८॥

नतततिकृतसर्वपापजालप्रशमनपण्डितसंस्मृतिस्वपादम् ।
भुजगसलिलधृन्मधुव्रताभच्छविचिकुरं कलयामि वेङ्कटशम् ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भयहरवरदायिशङ्खचक्रप्रविलसदात्मकराम्बुजातजालम् ।
नयनपदकणादमुख्यशास्त्रव्रजदपदं कलयामि वेङ्कटेशम् ।।१०।।

सितनिजनयनस्वकीयवाहर्षभनिजयानविभासिपार्श्वयुग्मम् ।
श्रुतिततिनिजरूपवैनतेयस्थितवपुषं कलयामि वेङ्कटेशम् ।।११।।

कनकतनुकान्तिवल्लभायुङ्नवसलिलप्रदवर्णनैजकायम् ।
कनकमुखसमस्तवाञ्छितार्थप्रदचरणं कलयामि वेङ्कटेशम् ।।१२।।

निजतनुसुषमानुरूपदिव्यच्छविविलसत्स्वकलेवरात्मजातम् ।
चरणनमदनिष्टहन्त्रभीष्टपदचरणं कलयामि वेङ्कटेशम् ।।१३।।

●

अथश्रीसदाशिवमस्करिवर्यस्तोत्रम् ।।

[दोधकम्]

शृङ्गगिरिक्षितिदेशिकगीतस्वीयपदामृतजन्यपदानम् ।
पन्नगतल्पविभूषिभिदाघ्नं नौमि सदाशिवमस्करिवर्यम् ।।१।।

पद्मजमुख्यविमृग्यविवेकं फालविलोचनतुल्यतपस्यम् ।
नैजगुरुस्तुतचेष्टितबोधं नौमि सदाशिवमस्करिवर्यम् ।।२।।

ब्रह्मधियेक्षितपद्मभवाण्डं योगिगणार्च्यपदामृतजातम् ।
सीमविहीनकृमामृतराशिं नौमि सदाशिवमस्करिवर्यम् ।।३।।

भक्तमनोरथपूरणशक्तं वारणमुख्यदपादसमर्चम् ।
युक्तमतीन्द्रियबोधनशक्त्या नौमि सदाशिवमस्करिवर्यम् ।।४।।

कामरुषामुखवर्जितचित्तं नन्तृमुदम्बुधिनीरधिजातम् ।
श्राणितसंसृतितारकविद्यं नौमि सदाशिवमस्करिवर्यम् ।।५।।

पङ्कजशत्रुविजित्वरहासं भक्तजनेक्षितदाननिषक्तम् ।
भौमसुखव्रजमोक्षदपूजं नौमि सदाशिवमस्करिवर्यम् ।।६।।

सत्वरदत्तसमस्तविभूतिं स्त्रीद्रविणादिपरामुखचित्तम् ।
जन्ममहीं नतदीनकृपाया नौमि सदाशिवमस्करिवर्यम् ।।७।।

२७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुन्दरमूर्तिशितप्रतिभाढ्यं वार्जितशीतलमानसवृत्तिम् ।
शास्त्रकदम्बकपण्डिततादं नौमि सदाशिवमस्करिवर्यम् ॥८॥

ॐप्रतिपादितवास्तवरूपं तन्मनुजादिकृपापरिपूर्णम् ।
शाश्वतमोददबोधदवाक्यं नौमि सदाशिवमस्करिवर्यम् ॥१०॥

अङ्गजितच्छविकोटिशशाङ्कं सङ्गविहीनजनव्रजतुष्टम् ।
अङ्गजरुण्मुखशत्रुहृपूजं नौमि सदाशिवमस्करिवर्यम् ॥१०॥

●

श्रीसनकादिपञ्चकस्तुतिः

[अश्वललितम्]

भजदमरद्रुमांश्चरणगप्रकाम्यवरदान् कृताखिलकृतान्
भवभयभञ्जकान् सुरततिप्रशस्यचरणान् कृतान्तशमनान् ।
भगणाधिपसंनिभाम्बरकचान् सुरम्यचरितान् कृपार्द्रहृदयान्
सनकसनन्दनौ हृदि भजे सनातनसनत्कुमारसुजनीन् ॥१॥

जनकमुखार्चितान् विनतिकृत्कृताघहरणान् प्रसन्नगणपाञ्
जननमृतिप्रभून् घनभयोद्धृताखिलनताङ्घ्रिधूलिकणिकान् ।
तृणमतकाञ्चनान् कनकदान् सिताशयधियः सुमेष्वतिशयान्
सनकसनन्दनौ हृदि भजे सनातनसनत्कुमारसुजनीन् ॥२॥

●

श्रीसरस्वतीशशिधरवालुकेश्वरस्तुतिः

[रुचिरा]

त्रिलोकगाखिलजनताव्रजाननान् विनायकाखिलसुरपादिसेवितान् ।
अकारणामितकरुणानिधीन् भजे सरस्वतीशशिधरवालुकेश्वरान् ॥१॥

पदाम्बुजप्रणतमनोरथप्रदान् विधिक्षमाधरतनुजाद्रिजाप्रियान् ।
रमाधवोचितकमलाधवान्भजे सरस्वतीशशिधरवालुकेश्वरान् ॥२॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसरस्वतीस्तुतिः

[स्वागता]

अक्षसूत्रसृणिपुस्तकपाशै-
र्भासमानभुजयुग्मयुगाढ्ये
कुन्दचन्द्रहिमभासिनि मुक्ताहारशोभि दयाब्धे
ग्रन्थाक्षसूत्रवरदाभयमुद्रिकाभि-
श्चिह्नैश्चतुर्भिरमलैर्विलसद्भुजाले ॥१॥

श्रीसरस्वती (प्रभासपत्तन) स्तुति

[ताटङ्कः]

विहितानन्तनतावलिरक्षे कृष्णबलोद्भवमुखविनुते
प्रणतजनेप्सितहस्त्यश्वादिप्रापकनैजकटाक्षलवे ।
निर्व्याजामितकरुणासागरपश्चिमसागरसंयुक्ते
जय जय भगवति पाहि सरस्वति करुणां कुरु मयि पादनते ॥१॥

नीराग्याप्ये नतसम्मददे विद्याव्रातवितारिपदे
उरगाधिपमुखगोचरविभवे विधिधरमुखनुतनिजपादे ।
नतजनताशापूरणदीक्षे त्रिदिवालयचयकान्तिनताङ्घ्रे
जय जय भगवति पाहि सरस्वति करुणां कुरु मयि पादनते ॥२॥

कामं तूर्णं श्राणितपदनतकामितसम्पन्मुखकामे
षड्रिपुशैलाहङ्कृतिशातकदम्भोलिव्रतचरणनते ।
वाणीशाच्युतगौरीशार्च्ये निर्हेतुकृपाजनिभूमे
जय जय भगवति पाहि सरस्वति करुणां कुरु मयि पादनते ॥३॥

एणाङ्काननबिम्बाधरमुखतनुलावण्यावयवनिधे
काणादादिनयव्रजदायिनि पुरुकारुण्यसुधाजलधे ।
शोणाम्बुजनिभयत्पादार्चासुलभे साम्प्रतभाविसुखे
जय जय भगवति पाहि सरस्वति करुणां कुरु मयि पादनते ॥४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐजपतत्परविषयपराङ्मुखयोगारूढव्रजसुलभे
कायविराजत्कान्तिपराजितकोटिशशाङ्काहङ्कारे ।
इहपरलोकप्रह्लादप्रदकर्मोचितपावनसलिले
जय जय भगवति पाहि सरस्वति करुणां कुरु मयि पादनते ॥५॥

●

श्री सरस्वती (प्रभास) स्त्रोतम्

[पुष्पिताग्रा]

भजदमरवसुन्धराप्रजातां भवभयभञ्जनतत्पराङ्घ्रिचिन्ताम् ।
भ्रमरभुजगनीरदाभवेणीं हृदि कलयामि सरस्वतीमजस्रम् ॥१॥

कररुचिरिमनिर्जिताम्बुजातां शरदृतुवारिवितारिवर्णवस्त्राम् ।
वरवरततिदानसक्तचित्तां हृदि कलयामि सरस्वतीमजस्रम् ॥२॥

हृदयगकरुणावितीर्णकाम्यां शतमखमुखसुपर्वपूगनम्याम् ।
अतिविमलजलप्रवाहरम्यां हृदि कलयामि सरस्वतीमजस्रम् ॥३॥

यदुकुलमणिमुख्यसेविताम्वुं विहतविनम्रकृतान्तमुख्यभीतिम् ।
निरवधिकरुणार्द्रचित्तपद्मां हृदि कलयामि सरस्वतीमजस्रम् ॥४॥

सुरवररमणीसमर्चिताङ्घ्रिं विधितनुसम्भवकीरगीतकीर्त्तिम् ।
कनकमुखसमस्तभोग्यदात्रीं हृदि कलयामि सरस्वतीमजस्रम् ॥५॥

वरदनिजकटाक्षपूगभक्तां निरवधिसंसृतिसिन्धुपारदात्रीम् ।
शशधरफणिचञ्चरीकवेणीं हृदि कलयामि सरस्वतीमजस्रम् ॥६॥

विनतजनसमस्तपापहर्त्रीं नतशुभकृद्विनतातनूजवाहाम् ।
घनकठिनपयोध्रधूतभूघ्रां हृदि कलयामि सरस्वतीमजस्रम् ॥८॥

अपहृतनतकष्टजालमालां पदवनभूस्मरदिष्टदानशीलाम् ।
पठितनिजपदष्टकानां वितरसि सिद्धिसमस्तमाशु देवी ॥९॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसरस्वतीस्तुतिः

[शार्दूलविक्रीडितम्]

श्रुत्यन्तान्तसमस्तशास्त्रनिचयप्रावीण्यदाङ्घ्रिस्तुति-
र्माकन्दाखिलगर्वहारिकविताविश्राणिकाङ्घ्रिस्मृतिः ।
भूत्वा मद्रसनाग्रगाजननभूः कारुण्यलावण्ययो-
र्विन्यासान्पदसन्ततेः कमलभूकान्ता प्रदेयादिह ॥१॥

[आर्या]

रसनाग्रे मे सुरदा लसताद्रसभरविलासदा विरदा ।
रजनीशतुल्यवदना रजनीशाहितसुमोत्थमुखसदना ॥२॥

[इन्द्रवज्रा]

नम्रास्यपद्मान्तरनृत्यशीले कम्रास्यभूताब्जसमस्तगर्वे ।
कञ्जातसञ्जातमनोऽम्बुजात भानुस्वरूपे जगदम्बिकेऽव ॥३॥

[पादाकुलकम्]

नतरसनाग्रे विहितविहारे तुङ्गातटभूकृतसञ्चारे ।
सम्पद्वार्द्धिज्योत्स्नाकारे पालय सोदरनिर्जितमारे ॥४॥

[शार्दूलविक्रीडितम्]

वाणीन्यक्कृतकेकिकोकिलकुले वेणीकृताहेऽम्बिके
वाणीशादिसमर्च्यनैजचरणे पाणीकृताम्भोरुहे ।
वाणीवर्ष्ममनोमलालिहरणे क्षोणीधरश्रेणिके
वाणीशानुभवे प्रभूतकरुणे क्षोणीपताश्राणिके ॥५॥
अंहोहंत्रि मनोज्ञगात्रि सकलाम्नायान्तवेत्रीडिते
धात्रीधात्रि विनम्रपत्रिदनुभूसंहाररात्रीश्वरि ।
साध्वीनेत्रि सरोजनेत्रि तिमिरव्रातप्रभेत्त्रीक्षणे
श्रेयोदात्रि वचःसवित्रि विनुतिं श्रुत्या पवित्रीकुरु ॥६॥

[मात्रिकरुचिरा]

करधात्रीकृत नतजनकरधात्रीकृतपरमात्मपरविद्याम् ।
धात्रीधात्रीमेकामनाथधात्रीं भजामि जगदम्बाम् ॥७॥
दारान् विधेरुदारान् करुणापूरान् कराब्जघृतकीरान् ।
हीरालङ्कृतहारान् जगदाधारान् विभावये धीरान् ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धात्रीपात्रीहर्त्रीवेत्रीचाम्ब त्वमस्य लोकस्य ।
दात्री सकलार्थानां पात्रीकुरु मां त्वदीयकरुणायाः ॥९॥

निजनेत्रीकृतवनजां स्मरत्रिनेत्रीकृतनिजपदभक्ताम् ।
दुरितविनेत्रीं नतशुभततिप्रणेत्रीं भजामि जगदम्बाम् ॥१०॥

सरसात्मगुणनिकायां सज्जनगेयां समाधिसुविजेयाम् ।
सच्चिसुखमयकायां सततमुपेयां सरोजजनिजायाम् ॥११॥

हयमुखमुखतनुकीर्त्तें नयनोत्सवदाननिपुणनिजमूर्त्ते ।
भयभरहरणस्फुरते जय जय सौन्दर्यसारपरिपूर्त्ते ॥१२॥

[मालिनी]

सरसगुणनिकायां सच्चिदानन्दकायां
सकलसुजनगेयां संयमीन्द्रैर्विचेयाम् ।
सरसिजजनिजायां सर्वलोकाल्यमेयां
सततमहमपेयां संहृताशेषमायाम् ॥१३॥

[इन्द्रवज्रा]

पातीतिपात्री पिवतीति पात्री
व्युत्पत्तिरेवं द्विविधा भवन्ती ।
पीयूषपात्री नतसर्वपात्री
द्वेधाभिपात्री भवती भवन्ती ॥१४॥

पात्रीकृतस्वीयकराच्र्यमानां
पात्रींपरब्रह्म [रसामृतस्य] ।
पात्रीं धरित्रीवलयस्य, मुक्ति-
पात्रीकृतानम्रजनां प्रपद्ये ॥१५॥

[शार्दूलविक्रीडितम्]

एणीदर्पनिराकरिष्णुनयनच्छाये विधातृप्रिये
कामारात्यनुजेऽव पल्लवशये भव्यैकसक्ताशये ।
भक्तालीशरणे पवित्रचरणे बुद्धिप्रदे शारदे
[संविन्मोदसुधार्पणप्रणयिनि श्रेयोऽर्थविश्राणिके] ॥१६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री सिद्धिस्तुतिः ।

[हरनर्तनम्]

रागिदूरपदां विरागिजनेक्षितां सुरपूजितां
वारितापमृत्तिं कुबेरसुरार्यजिद्धनवाक्प्रदाम् ।
कारुणीजलधिं धराधरजास्नुषां करिमुख्यदां
सर्वपापहरां भजे हृदयाम्बुजेऽनिशमृद्धिकाम् ॥१॥
कल्यहेर्गरुडं रुचा जितहाटकां मुनिवन्दिताम्
अक्षराकृतिकां प्रणम्रवरप्रदां पुरुषार्थदाम् ।
पङ्कजातदृशं प्रकाशिततत्त्विकां नृपताप्रदां
सर्वलोकनुतां भजे हृदयाम्बुजेऽ निशम द्धिकाम् ॥२
रुग्जराशमनीं निराकृततानवां यमिचिन्तितां
रामसुख्यनुतां शमादिगुणप्रदां श्रमनाशिकाम् ।
अङ्कुशादिधरां सुमावलिपूजितामघमर्षिणीं
मृत्युभीमुखहां भजे हृदयाम्बुजेऽ निशमृद्धिकाम् ॥३॥

श्री सिद्धिस्तवः ॥

[कुसुमविचित्रा]

भजदमृताशिक्षितिरुहपादे भवनिजसंज्ञाम्बुधिवडवाग्ने ।
भुजगपयोदभ्रमरकचे मे भगवति सिद्धे कलय विभूतिम् ॥१

करचरणन्यक्कृतजलजाते शरदृतुमेघच्छविनिजवस्त्रे ।
वरवरदानप्रवणहृदब्जे भगवति सिद्धे कलय विभूतिम् ॥२॥

सुरवरनम्यस्वपदपयोजे नतजनकाम्याखिलदकटाक्षे ।
गणपतिकाम्याकृतिमतिरम्ये भगवति सिद्धे कलय विभूतिम् ॥३

कृतसुरनाशप्रभृतिनुताङ्घ्रे कृतविहितान्तप्रभवभयान्ते ।
कृतनिजपादप्रणतकृपाब्धे भगवति सिद्धे कलय विभूतिम् ॥४

वनजनियोनिप्रणुतपदाब्जे वनरतमौनीप्सितवरदात्रि ।
कनकविहासिच्छविनिजकाये भगवतिसिद्धे कलय विभूतिम् ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शरभवजिष्णुस्वनयनयुग्मे शरधरतुल्यस्वकचभराढ्ये ।
वरनिकुरुम्बप्रणयनसक्ते भगवति सिद्धे कलय विभूतिम् ॥६॥

विनतसमस्तस्थिरचरजाले विनतजनालीदुरितविभेत्रि ।
घनधरपीनस्तनजितभूध्रे भगवति सिद्धे कलय विभूतिम् ॥७॥

छविविजितैणाम्बकयुगरम्ये पुरुतरशोणाधरजितबिम्बे ।
क्वणितसुवीणाधरनिजपाणे भगवति सिद्धे कलय विभूतिम् ॥८॥

भवततिकष्टक्लमततिहन्त्र्याः प्रणतजनेष्टप्रदपदसिद्धेः ।
नतियुतमष्टौ पठति नुतीयः भगवति पुष्टोऽखिलवरसिद्धेः ॥९॥

●

श्री सीतादेवीस्तुतिः ॥

[सुवदना]

क्षोणीगर्भोपलब्धस्वरुचिरवपुषं ध्यातां यमिवरैः
शक्रप्रह्लादमुख्यामरदितिजनुतां दुर्मृत्युशमनीम् ।
काकुत्स्थोत्तंसचेतोवनजनिदिनपं हस्तिप्रमुखदां
कारुण्याम्भोधिवेलायितनिजहृदयां सीतां हृदिभजे (दधे) ॥१॥

अथवा:— [दुर्मृतित्रासहन्त्रीम्)

क्षोणीगर्भोपलब्धस्वरुचिरवपुषं योगिभिर्ध्यायमानां
शक्रप्रह्लादमुख्यामरदितिजनुतां दुर्मृत्युसुख्यापहाम् ।
काकुत्स्थोत्तंसचेतोवनजनिदिनपं भूपसम्पत्प्रदात्रीं
कारुण्याम्भोधिवेलायितनिजहृदयां मैथिलीं भावये ऽहम् ।

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथश्री सीतारघूत्तमतनुस्तोत्रम् ॥

[वसन्ततिलका]

रागादिदोषकलिलाशयदुर्लभाङ्घ्री
वैराग्यराजदमलाशयलभ्यपादौ ।
पीयूषभोजितदितिदैत्यवरार्चिताङ्घ्री
सीतारघूत्तमतनू कलयामि चित्ते ॥१॥

श्रीगीर्जितामरमहीशगुरुत्वराजत्-
पादारविन्दमधुकृन्निजचित्तपद्मौ ।
भक्तव्रजापमृतिरोगजरादिहार्चौ
सीतारघूत्तमतनू कलयामि चित्ते ॥२॥

कारुण्यसिन्धुनिजमानसवृत्तिपूगौ
हस्तीन्द्रवाजिपृतनामुखदानदक्षौ ।
पादाश्रिताघभसितीकृतिसक्तचित्तौ
सीतारघूत्तमतनू कलयामि चित्ते ॥३॥

भोगीन्द्रवर्ण्यविभवाङ्घ्र्यपदानलेशौ
शारीरकान्तिहृतभर्मपयोददर्पौ ।
भक्ताखिलेप्सितवितारककल्पवृक्षौ
सीतारघूत्तमतनू कलयामि चित्तं ॥४॥

शङ्खाभयेष्टदरथाङ्गधरस्वहस्तौ
धर्मार्थकामभवपाशविमोक्षदार्चौ ।
चिन्तान्धकारविनिवारकचण्डरश्मी
सीतारघूत्तमतनू कलयामि चित्ते ॥५॥

वागम्बिकासरसिजासनपर्वतेश-
वर्ष्मोद्भवाविधुधरादिसमर्चिताङ्घ्री ।
फुल्लाम्बुजाततुलसीदलमुख्यपूज्यौ
सीतारघूत्तमतनू कलयामि चित्ते ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृत्ताङ्घ्रिपङ्कजनतासुरचित्तवृत्ती
शान्ताशयाखिलविकारविभाविताङ्घ्री ।
नम्राखिलामयनिकृन्तनसक्तचित्ती
सीतारघूत्तमतनू कलयामि चित्ते ॥७॥

श्री सीतारघुनाथस्तवः ।

रागपरीताशयदूरौ रागविहीनमनः सुलभौ ।
शक्रमुखार्चितपादाब्जौ जयतं सीतारघुनाथौ ॥१॥
गोर्घननिर्जितगुरुशक्री-कृतपदनतमूकवराकौ ।
कृत्तजरादुर्मरणमुखौ जयतं सीतारघुनाथौ ॥२॥
वाणीगिरिजामुखविनुतौ कारुण्याम्भोनिधिहृदयौ ।
कुञ्जरमुख्याखिलमादौ जयतं सीतारघुनाथौ ॥३॥
भक्ताघाम्बुधिघटजातौ कमलसरोरुहवासरतौ ।
कनकाम्बुदजित्तनुकान्ती जयतं सीतारघुनाथौ ॥४॥
अक्षरतत्त्वस्वाकारौ मारुतिकीरमुखध्यातौ ।
प्रणमच्चिन्तामणिपादौ जयतं सीतारघुनाथौ ॥५॥
वीक्षास्पृष्टात्मविबोधौ हरिणीसरसिजजिन्नेत्रौ ।
पुरुषार्थव्रजदानरतौ जयतं सीतारघुनाथौ ॥६॥
मनुजाधीशीकृतभक्तौ निखिलचतुर्दशभुवनेशौ ।
आसुरभावासुरशमनौ जयतं सीतारघुनाथौ ॥७॥
आमयहरचरणस्मरणौ विजितविकारार्चित चरणौ ।
वरदाभयमुद्राढ्यकरौ जयतं सीतारघुनाथौ ॥८॥
वाणीद्रुहिणोमाशम्भु = प्रमुखसुरानुग्रहदाङ्घ्री ।
प्रणताघौघक्षान्तिनिधी जयतं सीतारघुनाथौ ॥९॥
श्रमततिकृन्तकचरणार्चौ शममुखसाधनदातारौ ।
यमनियमादिदपदधूली जयतं सीतारघुनाथौ ॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री सीतारामस्वरमाला स्तुतिः ।

[पादाकुलकम्]

अङ्गदसुगलविभीषणमुख्य-स्तुतनिजपादपयोजनियुग्मौ ।
कोटिब्रह्माण्डावलिजनकौ हृदये कलये सीतारामौ ॥१॥
आशापूरणविधिनिर्धूत-स्वर्भूरुहडम्बरसर्वस्वौ ।
अव्याजामितकरुणासिन्धू हृदये कलये सीतारामौ ॥२॥

इन्द्रानलयमनिर्ऋतिवरुणाद्याशापालनसर्वाशादौ ।
इभरथहयनरमुख्यश्रीदौ हृदये कलये सीतारामौ ॥३॥
ईशानाखिलत्रैलोक्यान्त-र्गतनयविद्याव्रातनिकायौ !
निष्कामानतमोदनिदाने हृदये कलये सीतारामौ ॥४॥

उपनिषदुक्तामृतवारांनिध्युडुपतिपादानुग्रहलेशौ ।
उरगाधिपमुखवर्ण्यमहत्त्वौ हृदये कलये सीतारामौ ॥५॥
ऊहापोहसमर्थसुरव्रज-मौकुटरत्ननिघृष्टपदाब्जौ ।
ऊरीकृतनतकाङ्क्षापूर्त्ती हृदये कलये सीतारामौ ॥६॥

ऋक्षाधीश्वररक्षःसत्तम-मुख्याराधितपादाम्भोजौ ।
ऋद्धिसमृद्धिस्पर्शिकटाक्षौ हृदये कलये सीतारामौ ॥७॥
ॠकारादिस्वरसङ्घातैः शङ्करमुख्यध्यातस्वाङ्घ्री ।
लावण्याकरकारुण्याब्धी हृदये कलये सीतारामौ ॥८॥

पाथःसम्भवसम्भवपाथो-जातधरस्तुतपदवार्जातौ ।
विनतातनुसम्भवमुखविनतौ हृदये कलये सीतारामौ ॥९॥
एनःपन्नगताक्ष्यायितनिज-शोणाब्जन्यक्कृतपदविनती ।
एणाक्षीमणिसलिलभवाक्षौ हृदये कलये सीतारामौ ॥१०॥

ऐच्छिकमुख्यप्रारब्धादिककर्मदपोषककरुणाकणिकौ ।
कणभुङ्मुखनयबोधदनमनौ हृदये कलये सीतारामौ ॥११॥
ॐ युततत्तन्मन्त्रविशेषद्वारासाक्षात्करणीयपदौ ।
ओमिति विश्वादृतनैजाज्ञौ हृदये कलये सीतारामौ ॥१२॥
औदार्यादिगुणव्रजसिन्धु-स्वीयस्वान्ताख्यामृतजनुषौ ।
औदासीन्यादिमसद्गुणदौ हृदये कलये सीतारामौ ॥१३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तकपाशग्रस्तनताल्या अन्तकसूदनदत्तस्वमनूः ।
अङ्गजसूपितृनव्याकारौ हृदये कलये सीतारामौ ॥१४॥
अश्च्योतितनिजवर्णिव्रतहनुमन्मुखसन्ततकीर्त्तितसञ्ज्ञौ ।
अशुभोन्मूलकशुभदपदाब्जौ हृदये कलये सीतारामौ ॥१५॥

●

अथ श्री-सुभद्रिकाहरिसखस्तोत्रम्

(अश्वललितम्)

सुरविनतौ जरादिशमनौ सरागविमुखौ विरागिसुलभौ
सदयहृदावुमाहररतौ नतद्रविणवाजितेन्द्रधिषणौ ।
प्रियहलिनौ सुवर्णशशिभौ गजाश्वमुख्यदौ नताघशमनौ
कलित (विदित, परम) परौ शुकादिविनुतौ
भजे हृदि सुभद्रिकाहरिसखौ ॥१॥
कुमतिहरौ सरोजचरणौ त्रिलोकविनुतौ हृतनतरुजौ
शममुखदौ नृपत्वदपदौ (नतौ) समस्तवरदौ चतुर्भुजरतौ ।
श्रमादिशमनौ विकारहरणौ प्रसादितहरौ नताघसहौ
यममुखदौ भवमृतिहौ भजे हृदि सुभद्रिकाहरिसखौ ॥२॥

●

श्री सुरभिगोपालस्तवः

[पृथ्वी]

भयघ्नवरदावुमाधवविधिप्रमुख्यार्चितौ
शमादिगुणदौ मनोविकृतिपूजजिष्णुत्वदौ ।
श्रमालिशमनौ यमप्रमुखसर्वभीक्रन्तकौ
कृपामृतनिधी भजे सुरभिबालगोपालकौ ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसुवर्णपक्षस्तोत्रम्

[विषमार्धसमपुष्पिताग्रा]

भुजगकुलरिपुं भवाब्धिपोतं भुजघृतमारमणं भजत्सुरद्रुम् ।
भगवदनुग्रहभाजनं विभूत्यै भज हृदय सदा सुवर्णपक्षम् ॥१॥
प्रणतभयहरं जगत्प्रणम्यं हरिचरणरतं गुणालिरम्यम् ।
सकरुणहृदयं वितीर्णकाम्यं भज हृदय सदा सुवर्णपक्षम् ॥२॥
भवभयशमनं मरीचिपौत्रं करलसदभयं विनम्रपालं (नताघनाशं)
....भज हृदय सदा सुवर्णपक्षम् ॥३॥
नतदिविजं विनतातनुप्रजातं गगनजभुगरलघ्नमूलमन्त्रम् ।
वरवरततिदं सुरांगनेड्यं भज हृदय सदा सुवर्णपक्षम् ॥४॥

●

श्री सुभद्रार्जुनस्तवः

[नन्दनम्]

नतजनकष्टजालहरणावभीष्टविश्राणकौ
प्रणयविशेषवैभववशप्रयातकृष्णाहृदौ ।
अतुलपराक्रमादिरुचिराभिमन्युसूतातकौ
सहजनिभामकौ भगवतो ? भजे सुभद्रार्जुनौ ॥१॥

●

श्री सुपर्वदेशिकस्तोत्रम्

[प्रमाणिका]

भवाम्बुराशिकुम्भजं भुजङ्गवर्णमूर्धजम् ।
भजत्सुपर्वभूरुहं भजे सुपर्वदेशिकम् ॥१॥
सुवर्णहर्म्यवल्लभाप्रमुख्यकाम्यवस्तुदम् ।
सुपर्वनम्यपादुकं भजे सुपर्वदेशिकम् ॥२॥
सुवर्णवर्णविग्रहं सुवर्णकान्तिवाससम् ।
सुपर्णनायकार्यकं भजे सुपर्वदेशिकम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वपूर्वजन्युतथ्यकं द्विपोत्तमस्ववाहनम् ।
चतुर्भुजं बृहस्पतिं भजे सुपर्वदेशिकम् ॥४॥
धृताक्षसूत्रदण्डकं नतावलीष्टदायकम् ।
नतव्रजाधकृन्तनं भजे सुपर्वदेशिकम् ॥५॥

●

श्री सुरारिदेशिकस्तवः

[प्रमाणिका]

सरोजमानहृत्करं शरत्पयोदवाससम् ।
वरालिदानदीक्षितं सुरारिदेशिकं भजे ॥१॥
रमाधवाङ्घ्रितत्परं कृतान्तभीतिकृन्तनम् ।
कृपाम्बुराशिचेतसं सुरारिदेशिकं भजे ॥२॥
भवाब्धिपारदस्मृतिं मनोज्ञधीकलेवरम् ।
समस्तशास्त्रबोधदं सुरारिदेशिकं भजे ॥३॥
उदारताढ्यचेतसं [कवीन्द्रताप्रदायकम्]।
भजज्जनालिकाम्यदं सुरारिदेशिकं भजे] ॥४॥

●

श्री सुरेश्वरगुरुस्तवः

[पृथ्वी]

यमादिसुलभा (निरता) ञ्जगच्छुभकराञ्जपादिप्रियान्
यमादि भयहृच्छुभप्रचयदान्सुवर्णच्छवीन्-
गिरीशनवरूपकान् भवहरान्गिरीशार्चकान्
सुरेश्वरनिजाभिधान्मनसि भावय सद्गुरून् ॥१॥
विमुक्तिरमणान्गजाश्वमुखसर्वसम्पत्प्रदान् नतेष्टवरदान् ॥२॥
पयोजजनुषः शमप्रमुखदान्निलिम्पेडितान् ॥
मुदब्धिशशिनो नमत्कुशलदान्मरालासना-
न्सुरेश्वरनिजाभिधान्मनसि भावये सद्गुरून् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुनिमण्डलकलितं नतनिखिलेष्टदचरणं
त्रिदशव्रजविनुतं यतिगणपूजितचरणम् ।।
कमलासननवमूर्तिकमतिमञ्जुलचरितं
धरणीगुरु विबुधेश्वरमनिशं हृदि कलये ।।३।।

श्रीसूर्यस्तवः

[हरिणी]

विरतिसुलभो रागद्वेषादिदुष्टसुदुर्लभो
हृतनतजरः शकाद्यग्रेप्रजातकलेवरः ।
प्रणतवचनैर्वीर्योद्धूतामरेश्वरदेशिको
ऽवतु दिनमणिः कारुण्याम्भोनिधिस्वहृदम्बुभूः ।।१।।
शशिधरशिरोनागाध्यक्षस्वतल्पनिजाकृति-
र्द्विरदमुखदः पादानम्राखिलाघविनाशकृत् ।
मुनिततिनुतः स्वांशुव्रातप्रकाशितविश्वको
ऽवतु दिनमणिर्ब्रह्मज्ञानप्रदाङ्घ्रिसमर्चनः ।।२।।
दशशतकरो भक्ताभीष्टप्रदानपरायणो
नृपतिपददोऽध्यात्मज्ञानप्रकाशनपण्डितः ।
हृतनतरुजस्त्रैलोक्याक्षिस्वकीयकरव्रजो
ऽवतु दिनमणिर्बाह्यस्वान्तान्धकारनिवारकः ।।३।।
यमिपकुलपो भीतिघ्नेष्टप्रदातृकराम्बुजो
रघुपतिनुतः शान्तिक्षान्तिप्रमुख्यगुणप्रदः ।
श्रमततिहरो भवताल्यंहःकदम्बसहाशयो
ऽवतु दिनमणिर्भन्दश्राद्धमरादितनूगुरुः ।।४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री सोमघस्रे श्रीशशिशशिकलाधरस्तोत्रम्

तारोमेशौ स्मरसुहृदरी नतेष्टसमष्टिदौ
द्व्यक्षत्र्यक्षौ हिमरुचितनू अजाक्षिजफालजौ ।
भामश्यालीकृतमुरहरी भुजङ्गपसंस्तुतौ
वन्दे श्रीमच्छशिशशिकलाविभूषितमस्तकौ ॥१॥

•

श्री सौर्यश्वत्थनारायणस्तुतिः ॥

[शार्दूलविक्रीडितम्]

पादाम्भोरुहयुग्मधूलिकणिकालेशप्रणामादिकृद्-
व्राताकाङ्क्षितवस्तुदाननियमोद्भूतामरोर्वीरुहौ ।
वन्दे कालमुखातिदारुणमहायादोनिकायोल्लसत्-
संसाराब्धिघटोद्भवौ दिनपसून्वश्वत्थनारायणौ ॥१॥
षट्पादाम्बरजीत[1]भोजनतमःकीलालधृत्कज्जला-
शेषाहङ्कृतिहुङ्कृदात्मशिरसी सञ्जातकान्तिच्छटौ ।
वन्दे शारदनीरदायकहिमक्षीराब्धिजाताशनौ
क्षीराभाम्बरवेष्टितौ दिनपसून्वश्वत्थनारायणौ ॥२॥
पादाम्भोजयुगीविनम्रजनतासर्वेष्टदाभीतिद-
मुद्रामुद्रितपाणिनिर्जितपयोजाताखिलाडम्बरौ ।
वन्दे संसृतिमध्यजन्यसकलक्लेशालिविध्वंसन-
काङ्क्षव्रातनमस्कृतौ दिनपसून्वश्वत्थनारायणौ ॥३॥
दीनानन्यगतित्वयुक्तमनसानेजाङ्घ्रिपाथोजनु-
र्द्वन्द्वासक्तजनावनव्रतधरस्वस्वान्तरम्याशयौ ।
वन्दे स्वीयकृपाकटाक्षकणिकाकृत्ताङ्घ्रिनम्रावली
कार्त्तान्तादिभयव्रजौ दिनपसून्वश्वत्थनारायणौ ॥४॥
कष्टक्लेशसहस्रजालविलसत्संसारपाथोनिधि-
मग्नानम्रकृपाम्बुधी अविरतं भक्तालिरक्षाव्रतौ ।
वन्दे व्यासशुकादिमौनिमणिभिर्मेनाघृताचीमुख-
स्वःस्त्रीभिश्च नुताङ्घ्रिकौ दिनपसून्वश्वत्थनारायणौ ॥५॥

---

१. सर्प ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कान्तारत्नसुवर्णरत्नतनुभूगेहादिभुक्तिव्रजान्
मुक्तिञ्च स्पृशती पदाम्बुजनताभीष्टानुरोधंमुहुः ।
वन्दे कज्जलिकाप्रियङ्गुकलिकाश्यामच्छविभ्राजित-
स्वीयाङ्गद्युतिभास्वरौ दिनपसून्वश्वत्थनारायणौ ॥६॥

भूयो जन्मशतार्जिताघनिकराकाराटवीप्लोषकृद्-
दावस्वाश्रयभोजिनैंजचरणाम्भोजातधूलिस्मृती ।
वन्दे पुष्करपूर्वजादिधरणीनाथानुभूतस्वपन्-
माहात्म्यातिशयव्रजौ दिनपसून्वश्वत्थनारायणौ ॥७॥

अक्षस्वाङ्घ्रिकणादजैमिनिफणिव्रातक्षितीट्कादंमी-
व्यासाचार्यमुखोदिताखिलनयज्ञानप्रदाङ्घ्रयर्चनौ ।
वन्दे चन्द्रशरीरजातरमणीताताङ्घ्रभूविग्रहौ-
चन्द्राग्रेजनिवल्लभौ दिनपसून्वश्वत्थनारायणौ ॥८॥

०

श्रीसौरिस्तुतिः

[वसन्ततिलका]

नम्रेष्टदं भवभयघ्नमहीशकेश
पाथोजपाणिममृतप्रदवर्णवस्त्रम् ।
देवेडितं त्रिभुवनीशुभसक्तचित्तं
श्रीकृष्णरूपमनिशं कलयामि सौरिम् ॥१॥

छिन्नाङ्घ्रिनम्रमृतिमुख्यसमस्तभीतिं
श्रीरामतातकलितं करुणाम्बुराशिम् ।
स्वर्णादिदं भवसमुद्रघटप्रजातं
नम्राघजालहरणं करराजिशूलम् ॥२॥

०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसञ्ज्ञादेवीस्तुतिः

[मयूरगतिः]

संयमिनीपतिकृष्णपरिग्रहसप्तममन्वभिवन्दितपादां
विश्वजगत्स्थितवस्तु-समूहविवोदकनामकदम्बकरूपाम् ।
वारणवाजिमुखेष्टसमृद्धिदसीमविहीननिसर्गकृपाब्धि
भास्करमानसवारिसमुद्भवभास्करमाकलये हृदि सञ्ज्ञाम् ॥१॥

नम्रशुभाम्बुधिशीतकरं विषयालिविरक्तयमीशनुताङ्घ्रिं
स्वश्वशुरार्यसहोद्भवसूनुविधुं पतिसूभगिनीसुतसर्पाम् ।
देवततीडितपादयुगीं नतसर्वमनोरथपूरणदीक्षां
भास्करमानसवारिसमुद्भवभास्करमाकलये हृदि सञ्ज्ञाम् ॥२॥

काममभीप्सितवैभवदानसमुद्धतपादसमाश्रितपूगां
षड्रिपुहन्तृनतिश्वशुरद्रुहिण [णादि] समुद्भववर्ष्मसमुत्थाम् ।
सुन्दरताकरुणाकरकायमते (नो) दिविषल्ललनार्चितपादां
भास्करमानसवारिसमुद्भवभास्करमाकलये हृदि सञ्ज्ञाम् ॥३॥

शास्त्रचयोदितवोधदनैजकृपाञ्चितिबिम्बनिजाधरबिम्बां
वेदवचोभिरदःशिखरैः प्रणवप्रमुखैः प्रतिपादितरूपाम् ।
यत्पदपूजनतःसुलभा निखिलेष्टततिः प्रणमद्दयमानां
भास्करमानसवारिसमुद्भवभास्करमाकलये हृदि सञ्ज्ञाम् ॥४॥

सर्वत उज्झितसक्तिमनः सुलभां सकलास्तिकपूजितपादां
निर्जितकोटिशशांक (मुख) च्छविमन्तकमुख्यमणिप्रसवित्रीम् ।
नम्रजनेप्सितसर्वशुभव्रजदानपरायणधीजपसञ्ज्ञां
भास्करमानसवारिसमुद्भवभास्करमाकलये हृदि सञ्ज्ञाम् ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीसञ्ज्ञास्तुतिः

[सिंहविक्रीडितम्]

चरणविनमदामदक्षोणिजं संसृतेर्नाशिकां
भ्रमरभुगनीरधृत्कुन्तलां पद्मजित्पाणिकां,
विजलजलदतुल्यनैजाम्बरां नम्रसर्वेष्टदां
हृदयसलिलसम्भवे सन्दधे सञ्ज्ञिकां सन्ततम् ॥१॥

विविधविनतकाम्यवस्तुप्रदां देवनम्याङ्घ्रिकाम्
अतुलशुभदरम्यधीवृत्तिकां भानुकाम्याकृतिम् ।
प्रणतशमनमुख्यभीवारयार्द्रचित्ताञ्चितां
हृदयसलिलसम्भवे सन्दधे सञ्ज्ञिकां सन्ततम् ॥२॥

स्वरधिवसतिभामिनीपूजितां मौनिभिः संस्तुतां
कनकनिभतनुच्छविखचित [भव्य]भूषाञ्चिताम् ।
अमितभवपयोनिधेः पारदां वायुभुग्वेणिकां
हृदयसलिलसम्भवे सन्दधे सञ्ज्ञिकां सन्ततम् ॥३॥

विनतसकलपापपूगच्छिदं वैनतेयार्चितां
कनकधरणिधारिजिष्णुस्तनीं-भीतिहृन्मुद्रिकाम् ।
कणभुगहिपमुख्यशास्त्रप्रदामैणजिल्लोचनां
हृदयसलिलसम्भवे सन्दधे सञ्ज्ञिकां सन्ततम् ॥४॥

श्रीस्थिरवासरे श्रीसत्यनारायणस्तुतिः

[शालिनी]

श्रीहेरम्बाधित्तजातार्च्यपादं कारुण्याम्भोराशिवेलास्वचित्तम् ।
शास्त्रव्रातस्पर्शकस्वाङ्घ्रिचिन्त्तं विष्णुं वन्दे सत्यनारायणाख्यम् ॥१॥

भोगिव्रातोत्तंसभोगस्वतल्पं विश्वद्रव्याकारधृत्प्राणकान्तम् ।
अभ्राशेषाहङ्कृतिघ्नाङ्गकान्ति विष्णुं वन्दे सत्यनारायणाख्यम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नम्रानन्दाम्भोधिराकाशशाङ्कं श्यालं स्वीयश्वालधृत्स्वीयमौलेः ।
नाभ्युत्थाम्भोरुड्जनुः सीधुवक्त्रं विष्णुं वन्दे सत्यनारायणाख्यम् ॥३॥

देवश्रेष्ठव्रातसम्पूजिताङ्घ्रि फालाक्षाजाद्यर्च्यपादारविन्दम् ।
लाकिन्यादिस्त्रीमणिव्रातगीतं विष्णुं वन्दे सत्यनारायणाख्यम् ॥४॥

बिम्बन्यक्कृत्स्वीयदिव्याधरोष्ठं लावण्याब्धिस्वीयकान्तान्तरङ्गम् ।
एका[णा]ङ्काग्रेजन्महृत्पद्मभानुं विष्णुं वन्दे सत्यनारायणाख्यम्॥५॥

नित्यं लोकव्रातमाङ्गल्यहेतुं भक्ताल्याशापूगसत्पूरकार्चम् ।
सिन्धूद्भूताश्लेषणानन्दिताङ्गं विष्णुं वन्दे सत्यनारायणाख्यम् ॥६॥

●

स्थिरवासरे-श्री-अश्वत्थनारायण-स्तोत्रम्

[शालिनी]

श्री-विघ्नाधीट् स्कन्दमात्राग्रजातं दुःखव्रातक्लिष्ट कारुण्यवार्धिम् ।
विद्यापूगोत्पत्तिधात्रीस्वबुद्धिं विष्णुं वन्देऽश्वत्थनारायणाख्यम् ॥१॥

ईहाशून्यप्राप्यनैजाङ्घ्रिपद्मं हस्त्यश्वादिश्री-प्रदानप्रवीणम् ।
ऋद्धिव्रातद्राग्वितारि-प्रसादं विष्णुं वन्देऽश्वत्थनारायणाख्यम् ॥२॥

स्वीयाङ्घ्र्यर्चाजातसौलभ्यसौख्यं भक्तिश्रद्धाप्रेमवात्सल्यसिन्धुम् ।
तद्रक्षार्थं सन्ततं बद्धदीक्षं विष्णुं वन्देऽश्वत्थनारायणाख्यम् ॥३॥

औदासीन्यप्रौढधीजन्मधात्री–मोङ्कारार्थस्वीयतत्त्वस्वरूपम् ।
ॐकारार्थध्यानसंसक्ततुष्टं विष्णुं वन्देऽश्वत्थनारायणाख्यम् ॥४॥

●

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री स्थिरवासरस्तुतिः

[प्रमदाननम्]

विरतप्रियं स्मरशेषमुख्यवशीकृताशयदुर्लभं
भजदार्तिहं सुरसङ्घसंस्तुतपादतोयजवैभवम् ।
पदचिन्तनालवलभ्यजीवकुबेरजिद्वचनार्चकं
शनिमाश्रये निजसंश्रिताखिलकष्टहर्तृकृपानिधिम् ॥१॥

धरणीधरप्रभवाधवोरगराजतल्पमुखाकृतिं
गजवाजिकोशचमूमुखाखिलमाप्रदं नलराज्यदम् ।
प्रणताघहं भ्रमराहिनीरदजित्वरच्छविविग्रहं
शनिमाश्रये पुरुषोत्तमाभिधपूर्णवस्तु-विबोधदम् ॥२॥

पुरुषार्थदं प्रणमन्मनोरथपूगपूरणदीक्षितं
परतत्त्वदं नलपिप्पलादहरिद्रथप्रमुखेडितम् ।
हृतरुक्तर्तिं भुवनत्रयास्थितसर्वपालितशासनं
शनिमाश्रये दशवक्त्रवर्ष्मभवप्रमुख्यविघातकम् ॥३॥

यमिपूजितं प्रणतानयेष्टहरप्रदाढ्यकराम्बुजं
शममुख्यदं कुलिशायुधाश्रयभोजिमुख्यसुरादृतम् ।
अघमर्षणं पदसंश्रिताखिलरीतिकश्रमवारकं
शनिमाश्रये यमसोदरं यमभीतिहं यममुख्यदम् ॥४॥

श्री स्मरदयितास्तुतिः

[शशिवदना]

त्रिभुवनमातः सुरकलिताङ्घ्रे सकरुणचित्ते स्मरदयितेऽव ॥१॥
गजमुखसम्पत्प्रदपदपद्मे हरिसुतकान्ते भगवति पाहि ॥२॥
विरतजनाप्ये कृतनतमोदे कलितकलाले स्मरदयितेऽव ॥३॥

२९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उडुपतिहासे नतवरदात्रि उरगपतोड्ये स्मरदयितेऽव ॥४॥
अखिलसुरार्च्ये विभवद्पादे मनसिजजाये स्मरदयितेऽव ॥५॥
गुहमुखपूज्ये विधिमुखवन्द्ये हरतनुजाते स्मरदयितेऽव ॥६॥
सुरललनेड्ये रुचिरशरीरे नतकरुणाढ्ये स्मरदयितेऽव॥७॥
मुखजितचन्द्रे ऽधरजितबिम्बे नयततिदात्रि स्मरदयितेऽव ॥८॥
सुलभसुखार्चे प्रणवनिजाख्ये प्रणतमुखेड्ये स्मरदयितेऽव ॥९॥
विरतिदचिन्ते कनकभकाये भयततिहर्त्रि स्मरदयितेऽव ॥१०॥
शुभदपदार्चे विमलमनोऽर्च्ये जितझषनेत्रि स्मरदयितेऽव ॥११॥

श्रीहयगलमूर्तिस्तोत्रम् ॥

[नर्कुटकम्]

दयितरमं त्रिलोकजनकं मनुमुख्यगुरुं
दितिजरिपुं भुजंगशयनं विधिमामतनुम् ।
स्मरपितरं मनुप्रचयदं निटिलाक्षनुतं
हयगलमूर्त्तिमच्युतमहं हृदये कलये ॥१॥

भुजङ्गप्रयातम्

हयग्रीवसत्त्रामरारीशचौर्यापनीतश्रुतिव्रातमोक्षप्रवीणम् ।
सुरज्येष्ठशम्भुस्वरीशप्रमुख्यामरव्रातनम्यं हयग्रीवमीडे ॥२॥
निजापाङ्गपातैः कृतान्तस्य भीतेर्द्रुतं मोचितस्वीयपादाब्जभक्तम् ।
भवक्लेशशीर्णातिदीनाङ्घ्रिवाभूं नतालीकृपाब्धिं हयग्रीवमीडे ॥३॥
सुवर्णोदशम्भूकलाधर्तृसत्य-व्रतागस्त्यमुख्येडितस्वाङ्घ्रिपद्मम् ।
सुवर्णादिसर्वेप्सितव्रातदानो-द्धतानम्रलोकं हयग्रीवमीडे ॥४॥
मनोवृत्तिकौटिल्यरूपाहिभोक्तृश्रुतित्रातरूपाण्डजेशस्ववाहम् ।
प्रणम्रालिरक्षाप्रमुख्यातिरम्यस्वचित्ताम्बुजातं हयग्रीवमीडे ॥५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीहनुमत्स्तुतिः

[कमलामुखी]

जगदसुज त्रिदशनुत, सकरुणहृज्जय हनुमन् ।।१।।
नतशुभकृद् गजमुखद, रघुपरतज्जय हनुमन् ।।२।।
विरतिधन प्रमदकर, प्रवरपटोज्जय हनुमन्।।३।।
कलितकल फणिपनुत, विधुशिशुधृज्जयहनुमन् ।।४।।
नतहृदयेप्सितवरद, नतदिविजज्जय हनुमन् ।।५।।
विभवदपत् स्मरहसुत, जनततिदज्जय हनुमन् ।।६।।
करुणमनो वरदविधे, शुभचयदज्जय हनुमन् ।।७।।
वहुनयवित् स्थिरमतिद, वहुलवलज्जय हनुमन् ।।८।।
यमरतधीर्मनु वलद, जगदवनज्जय हनुमन् ।।९।।
मनसिजजित् पुरदहन, सकलमहज्जय हनुमन् ।।१०।।

श्रीहरिस्तोत्रम्

[तोटकम्]

पदपङ्कजनम्रजनेष्ट-तति-प्रतिपादन-तत्पर-कल्पतरो ।
जननक्षयसाध्वसभञ्जनकृन्निजपादपयः प्रभवाव हरे ।।१।।

सरसीरुहदर्पहर-स्वकरोल्लसदासुरदर्पह चक्रमुख ।
गगनोद्भवभोगिपयोधरषट्पदजित्वरशौर्षजनेऽव हरे ।।२।।
पुटपाकविशोधितमर्मरुचोल्लसदम्बरवेष्टितरम्यतनो ।
नतकांक्षितसर्ववरप्रचयस्पृशितुष्टहृदम्बुजनेऽव हरे ।।३।।

वरदुग्धपयोधिविलोडनभू-रमणि (णी)मणिकाम्यमनोज्ञतनो ।
अहिजम्भमुखासुरहृत्प्रमुख-त्रिदिवालयनम्यपदाव हरे ।।४।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

झषकूर्मवराहनृसिंहमुखाकृतिकारितसर्वजगत्कुशल ।
शरणागतवत्सलताप्रमुख स्वगुणावलिरम्यमतेऽव हरे ।।५।।

चरणाम्बुजनम्रकृतान्तजभीप्रमुखार्तिनिकृन्तनचुञ्चुनते ।
गतिवर्जितदीननमज्जनताकरुणाब्धिमनोऽम्बुभवाव हरे ।।६।।

शशिशेखरपद्मजतत्प्रभवप्रभृतिस्तुतपादपयोजयुग ।
पुरुहूतसतीप्रमुखामृतमुग्ललनार्चितपादुक पाहि हरे ।।७।।

कनकाभतनु (नू) रमणीधृदुरः स्थलमण्डितमेघरुचिस्वतना (नो)
निजपादसरोजविनम्रमनोरथपूरणशक्तमनोऽव हरे ।।८।।

मितिपारविहीनभवाब्धिगतप्रणतावलिपारदनैजपद ।
कृतदुग्धमहाम्बुधिमध्यलसद्वरभोगितनूशयनाव हरे ।।९।।

पदपद्मरजः कणिकास्मृतिकृज्जननाकृतपातकजालहर ।
विनतातनुभूनिजवाहनजोल्लसदम्बुधिजारमणाव हरे ।।१०।।

सनकादिमहामुनिसन्ततिसत्कृदनुग्रहदाङ्घ्रिसरोजयुग ।

करपद्मगशंखरथाङ्गगदामुखनाशितदैत्यततेऽव हरे ।।११।।
नयनाङ्घ्रिकणाशनकर्दमभूफणिजैमिनिकीरगुरुप्रणत ।
खण्डित

श्रीहरिवट्टस्तवः

[अश्वललितम्]

परिमितसीमकारणमुखाखिलांशरहितस्वभावजनित—
स्वपदविनम्रदीनजनताकदम्बकरुणाकरस्वहृदयम् ।
स्वचरणनीरजातयुगलीपरागशरणगतव्रजमनो—
रथततिपूरणादिनियमाञ्चितस्वचरितं भजे हरिवटुम् ।।१।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनसिसमुत्थरोषगृधितातिमोहमदमत्सरादिकृतिरिपु—
प्रचयविजित्वरस्ववशधीसमुज्ज्वलयमिव्रताप्यचरणम् ।
स्वपदसरःसमुद्भवयुगीरजोलवनमस्कृतिप्रियमनः—
प्रमदमहापयोनिधिपयोनिधिस्वकरुणं भजे हरिवटुम् ॥२॥

अवनकृदन्तरादिरहितस्वपादसरसीरुहैकशरण—
प्रणयिमनोऽब्जदीनजनताकृपाजनिमहीहृदम्बुजनुषम् ।
अमितजनुःसहस्ररचितप्रणम्रदुरितच्छटापरिणति—
द्रुहिणविलेख्यदुष्टलिखितप्रमार्जनपटुं भजे हरिवटुम् ॥३॥

कमलदृगेणचिह्नितवपुःकलाधरशिरः सरोजनिजनु—
गुंखनिखिलाधिकारिककृपाप्रसादभरभाजनत्वरुचिरम् ।
चरणगदृक्कणादमनुभूतनूभवपतञ्जलिकृतुपर—
श्रुतिरतवादरायणनयप्रदाननिपुणं भजे हरिवटुम् ॥४॥

निजशिखरान्विताखिलविधश्रुतिव्रजसमन्वयैककुशल (धिषण)—
प्रणवजपादिबोधकरणाखिलात्मपरमात्मशक्तिलसितम् ।
प्रणवपुरस्सराखिलमनुप्रकाण्डजपमुख्यसाधनचय—
प्रणवहृदम्बुजातजनताप्रमोदततिदं भजे हरिवटुम् ॥५॥

तृणलघुताविभावितजगत्त्रयस्थितसमस्तबाह्यविषय—
प्रचयमनोऽम्बुसम्भवयमिप्रकाण्डसुलभस्वपादकमलम् ।
अतिहृदयङ्गमत्वलसितस्वकीयतनुकान्तिनिर्जितनिशा—
रमणसहस्रकोटिनिखिलाभिमाननिकरं भजे हरिवटुम् ॥६॥

श्रीहरिबलिस्तोत्रम्

[अश्वललितम्]

अगणितकोटिसङ्ख्यजलभूर्भवाण्डततिमध्यभूषणमणि-
त्रिदिवनिवासिराजपदवीप्रतिष्ठितभविष्ययोगरुचिरौ ।
निजचरणाम्बुसम्भवनमस्कृतिप्रवणनाकलोकजनता-
सुतलनिवासिदैत्यदनुभूसहस्रनिकरौ भजे हरिबली ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्विरदरथाश्वसैनिकमुखाखिलावयवपूर्णराष्ट्रकमला-
प्रमुखसमस्तवस्तुविततिप्रदाननिपुणस्वलेशकरुणौ ।
अनवरतं पुलोमतनुभूस्वकीयवपुराननामृतजनु-
र्मधुकरविन्ध्यपङ्क्तिहृदयाम्बुजातदिनपौ
(सम्भवरवी) भजे हरिबली ॥२॥

अपरपरप्रमुख्यविविधप्रकारकसमस्तशास्त्रनिकर-
प्रमुखकलाव्रजामृतनिधीकृतस्वचरणाब्जभक्तिभरितौ ।
पुरुषसमुद्भवोद्भवनिजाशनव्रजधरेशभोगविहित-
स्वशयनपादपद्मयुगलीसमर्चनरतौ भजे हरिवली ॥३॥

अमृतकृते स्वकीयवशगद्यु वासिदितिसम्भवादिजनता-
मथितपयःपयोनिधिजनुःपयोजसदनासुधाविधुमुखौ ।
निजचरणाब्जसक्तमनसां पराजितखगेश्वरानिलमनो-
जवसहितं वितीर्णकमलासमृद्धिकरुणौ भजे हरिबली ॥४॥

निखिलनिलिम्पदैत्यदनुजप्रकाण्डमुकुटव्रजोटन (जाप्त) विविध-
च्छविमणिकान्तिपुञ्जशबलीकृतस्वपदपङ्कजातयुगलौ ।
निजनियमीकृतस्वचरणाम्बुजन्मयुगलीपरायणमनो-
हृदयसमीहितार्थनिचयस्पृशिव्रतमुखौ भजे हरिबली ॥५॥

निजतनुभूजयन्तवृषभप्रियानिजसहस्त्र दोःकृतधरा-
धरजनिवल्लभाप्रभदसूप्रमुख्यदैत्योपगूढवपुषौ ।
त्रिभुवनसार्वभौमपदवीप्रमुख्यविभवादिनम्रजनता-
हृदयवनेजवाञ्छितवरप्रदानकुशलौ भजे हरिबली ॥६॥

निजतनुसम्भवेशभगदवदवतारवृषभामरानतजनु-
र्निजतनुसम्भवात्मतनुजाहृदीशभगवत्तनूजतनुजौ ।
वरुणसहस्त्ररश्मिहिमकृद्धुताशयमनिर्ऋतिद्रविणपा-
निलमुखसेवितस्वचरणामृतोद्भवयुगौ भजे हरिबली ॥७॥

रुचिरशरीरकान्तिसुषमामनोज्ञमण्डितामरसती-
सुतलनिवासकृत्कुलवधूललामचयपूजिताङ्घ्रिकमलौ ।
त्रिदिवनिवासिवारललनाशिरोमणितिलोत्तमामुखमनो-
हृतिपटुदिव्यकान्तिविलसत्स्वकीयवपुषौ भजे हरिवली ॥८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

असुरकुलारिनामिनलिनप्रजाततनुपुष्पवाणजनक-
स्मरतनुभस्मसात्कृतिचणस्वफालनयनानलाकृतिधरौ ।
हृदयशुद्धिभक्तिविलसन्नमस्कृतिकृदावलीप्रणतिकृज्-
जननिकरेप्सिताखिलशुभव्रजप्रदनतौ भजे हरिबली ।।९।।

श्रीहरिहरपुरक्षेत्रस्तोत्रम्

[नर्कुटकम्]

शुकमुखपूजिते त्रिभुवनावनकार्यरते
नतजनकाम्यदायि करुणावरुणावसथे ।
प्रियकमलविधौ रथगजप्रमुखाखिलदे
नरहरिनीरसम्भवजनुर्दयिते कलये ।।१।।

श्रितजनहर्षदे जितमनोभवलभ्यपदे
फणिपतिसंस्तुते प्रणतसात्कृतसर्वफले ।
अखिलवरप्रदे गिरिसुताविधुधृत्सहजे
नरहरिनीरसम्भवजनुर्दयिते कलये ।।२।।

निखिलसमृद्धिदे सुरगणार्चितपादयुगे
विभवदसंस्मृतिजलधिजाविधिरब्धतनू ।
अहिरिपुपूजिते मनसिभूघटजादिनुते
नरहरिनीरसम्भवजनुर्दयिते कलये ।।३।।

निटिलकुलेखहे नतकृपाजनिभूहृदये
रुचिरकलेवरत्रिदिवभूललनाकलिते ।
नयचयदायिके स्मितजितक्षणदारमणे
नरहरिनीरसम्भवजनुर्दयिते कलये ।।४।।

इहपरसौख्यदे पदरुचाहृतपद्मपदे
प्रणवरतप्रिये प्रणवमुख्यनिजाभिहिते ।
रविकनकच्छवौ जितमनःसुलभाङ्घ्रियुगे
नरहरिनीरसम्भवजनुर्दयिते कलये ।।५।।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीहरिस्तुतिः

[मन्दाक्रान्ता]

दीनानम्रानुपमकरुणावारिराशिस्वचित्तौ
ब्रह्माण्डालीसृजिमुखकृतिव्यापृतौ लोकनाथौ ।
ब्रह्मानङ्गप्रमुखदिविभूसेवितस्वीयपादौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ (श्री हरी भावयेऽहम्) ॥१॥

भवतव्रातेप्सितवरततिश्राणनासक्तचित्तौ
हस्त्यश्वालीप्रमुखधरणीनाथसंपत्प्रदाङ्घ्री ।
सान्द्रप्रेमप्रचुरनिगडान्योऽन्यभक्तिप्रधानौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥२॥

ईहाशून्यस्वहृदयसरोजातलभ्याङ्घ्रिपद्मौ
नम्रानन्दामृतजलनिधे : पूर्णपीयूषरश्मो ।
विश्वभ्राजन्निखिलविषयाशेषविद्याधिनाथौ
ब्रह्मानन्दामृतस्वधनौ नौमि लक्ष्मीरमेशौ ॥३॥

अम्भोजन्मस्वशयनमहाभोगिराड्भोगतल्पौ
पाथोराशिप्रभवसहभूभामताभासिताङ्गौ ।
पादानम्रव्रजहृदयगाभीष्टदानव्रताढ्यौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मोरमेशौ ॥४॥

कादाचित्कस्वनतिफलिताशेषभूतिव्रजेभ्यौ
गीर्वाणाली (मर्त्यान्याली) (अस्वप्नालो)
मुकुटगमणिव्रातनीराजिताङ्घ्री ।
क्षोणीधृन्न्यक्कृदुरसिभवक्षोणिधृद्भेद्युरस्कौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥५॥

स्वप्नेऽप्याशाल्यविषयमहाभूतिदायिप्रसादौ
बाधाषट्कप्रमुखनिखिलक्लेशनिर्वापणाङ्घ्री ।
अब्जोद्भूताम्बुजरिपुकलाधृन्मुखार्च्यस्वपादौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निर्व्याजाङ्घ्रिप्रणतिनिरतव्रातकारुण्यसिन्धू
दुष्कर्मालीफलनिटिलगव्रह्मलेखालिनाशौ ।
श्रीवाग्देवीगिरिजनिशचीमुख्यगीतापदानौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥७॥

वर्ष्मस्वान्तप्रभृतिसकलस्वाङ्गलावण्यवार्धी
एणाम्भोजप्रसृमरमदोन्मूलकच्छायनेत्रौ ।
काणादाक्षस्वचरणमुखाशेषशास्त्रावलीदौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥८॥

अङ्गच्छायानिहितनिखिलाहङ्कृतिस्वर्णवार्दौ (मेघौ)
बिम्बाशेषाभिमतदलनौत्सुक्यधृत्स्वाधरोष्ठौ ।
अङ्गोद्भूतप्रसृमरमहाविक्रमोद्घोषिविश्वौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥९॥

पादाम्भोजप्रणतजनताक्लेशविध्वंसपूर्वं
तत्तत्काङ्क्षाधिकशुभततिश्राणकाङ्घ्रिप्रसादौ ।
वैराग्यादिप्रथितगुणयुक्संयमिव्रातलभ्यौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥१०॥

ओमित्याख्यां गदति निगमःस्वान्तयुक्तो यदीयाँ
लोके लोके जनुषि जनुषि स्वच्छसौख्यानि दत्त्वा ।
ओंकारार्थप्रवणमनसां मोक्षदानैकदीक्षौ
ब्रह्मानन्दामृतरसघनौ नौमि लक्ष्मीरमेशौ ॥११॥

श्रीहरिहरस्तुतिः ॥

अनियतनिजमतिदूरौ विजितखसुलभकटाक्षौ ।
परिहृतकुमृतिजरादी गिरिधर ! विधुधर ! पातम् ॥१॥

पदनतजनधनविद्या-जितधनपतिगुरुगर्वौ ।
श्रितजनपुरुकरुणाब्धी गिरिधर ! मृगधर ! पातम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रथमुखसकलरमादौ कलिमलफणिविनताजौ ।
अघवनदवहविराशौ गिरिधर ! शशिधर ! पातम् ॥३॥

तनुरुचिनिकषशरीरौ नतवरवितरणशक्तौ ।
प्रशमितविनमदबोधौ गिरिधर ! विधुधर ! पातम् ॥४॥

त्रिभुवनजनततिपालौ पदरतनरपतितादौ ।
ज्वरमुखशमननिषक्तौ गिरिधर ! मृगधर ! पातम् ॥५॥

विकृतिहचरणकटाक्षौ शममुखयममुखदार्चौ ।
नमदघसहनसमुद्रौ गिरिधर ! शशिधर ! पातम् ॥६॥

सहजनिसहजनिकान्त-त्रिभुवननिकरसृडर्चौ (र्यौ) ।
करभृतनिखिलपदार्थौ गिरिधर ! विधुधर ! पातम् ॥८॥

श्रीहरिस्तवः

[शार्दूलविक्रीडितम्]

आशाकृष्टविनष्टनैजहृदयभ्रष्टालिरुष्टानिशं
जुष्टाचार्यपदाब्जशिष्टविततिस्मृत्यैव तुष्टेष्टद ।
ज्येष्ठभ्रातृगणेष्टदुष्टकृतितो नष्टस्वराष्ट्रासये
कष्टाश्लिष्ट तृतीयविष्ट पवसद्वस्वष्टकेनार्चित ॥१॥

अष्टांगान्वितयोगदृष्टिलसितप्रज्ञानसृष्ट्यादितो
मोक्षाख्यां परमप्रमोदविततेः काष्ठां परां श्राणयन् ।
अष्टैश्वर्यविशिष्टशिष्टजनताकष्टाद्यनिष्टापह
शिष्टाभीष्ट समष्टिदापनपटो प्रेम्णा शृणुष्वाष्टकम् ॥२॥

गोकर्णाखिलगर्वचर्वणचणस्वक्षान्तिविश्राणन-
गोकर्णाद्यखिलान्तरारिशमन श्रीवल्लभ श्रीकर ।
गोकर्णाधिपवल्लभासहजनुः पर्णाशिसंसेवित
गोकर्णाधिपभोगमाश्रिततनोऽथाकर्णयाङ्घ्रिस्तुतिम् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आपद्ध्वान्तवियन्त्रणे हिमनिधे सौभाग्यवारांनिधेः
पापारण्यदवानल प्रणमतां तापत्रयीकालिके ।
अज्ञानाख्यमहाहिमाधवरथप्रज्ञाब्जचण्डच्छवे
प्रह्लादद्वयपोषकाव नृहरे त्वत्पादपद्मानतम् ॥४॥
दत्याधोशहिरण्यपूर्वकशिपुक्रौर्योद्भवार्त्यावले
प्रह्लादस्य निजाङ्घ्रिसक्तमनसो रक्षाचणाङ्घ्रिस्मृते ।
कामारात्तिकलत्रपूर्वक हरे कामप्रसूवल्लभ
मांगल्याब्धिसुधानिधेऽव सततं कम्रस्मिताभीष्टद ॥५॥
क्षीराम्भोधित सत्फणीश्वरफणाजालोत्थरत्नावली
च्छायाद्योतितविग्रहामरधुनीविभ्राजिताङ्घ्र्यम्बुज ।
अम्भोदावलिधिक्करिष्णूनिनदाम्भोराशिधिक्कृत्स्व
वर्षाकाल पयोदमेचकतनो मामानतं पालय ॥६॥
भक्त्यैकाग्रसमन्वितं त्वयि परप्रेम्णार्पितस्वात्मकं
भूयोऽघघ्नगतागतप्रमथनप्रीतान्तरंग प्रभो ।
भूमावल्लभ वल्लकीप्रभृतिभिर्वाद्यालिभी रंजित
भूपालत्वदपादपंकजनते मामानतं पालय ॥७॥
भूमानन्दवितारणैकरतहृद्भूमाप्रदाभीतिद
रामाद्याकृतिधर्तरातिहृदये रामाविरक्तिप्रद ।
कामोत्पत्तिनिदानभूत विनमत्कामप्रदान-प्रिय
सामाम्नायनिकायगेयगरिमन्मामानतं पालय ॥८॥
सर्वानर्थनिकायनीरवितरज्झञ्झाम्रुत्स्वस्मृतं
सर्वप्राणिहृदन्तरे कृतनिजावास श्रियालिंगित ।
सर्वज्ञ प्रियकृद्विनम्रविततेे कारुण्यपाथोनिधे
सर्वाघौघहृत्ति प्रमुख्यकृतितो मामानतं पालय ॥९॥
सक्तासक्तविरक्तिदापनविधौ रक्ताङ्घ्रिपद्मानते
मुक्तालीविनताघवारण हरे मुक्तावलीभूषित ।
उक्ताशीर्वचनावले प्रणमतां नक्तव्रताद्यर्चित
सर्गस्थानलयादिकारण हरे भर्गार्चिताङ्घ्रिद्वय
सर्गातीत सुखप्रदाङ्घ्रिविनुते दुर्गाम्बिकापूर्वज ।
दुर्गानर्थकरारिवर्गशमन स्वर्गापवर्गप्रद
दुर्गारण्यगगर्गमुख्ययमिराण्मार्गप्रदावानतम् ॥११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीहरिस्तवः

[शार्दूलविक्रीडितम्]

यातायातपरम्परारतिजुषश्चक्षुर्मुखाक्षावली—
भृत्यांस्तद्धृदयस्य भावनिवहाच्छादार्थवेषावलेः ।
हारान्निर्मलतां नयन्नयजलक्रीडारतस्त्रीतरो—
र्वासोहारक इत्यशेषजनतास्तव्याङ्घ्रिरव्याद्धरिः ॥१॥

मालिनी

जननिधनलीलासक्तिभाजां नितान्तं
श्रवण-नयनमुख्याक्षावलीकिङ्कराणाम् ।
हृदयनिहितभावाच्छादकोपायजातं
स्मृतिलवलवमात्रान्नाशयन् केशवोऽव्यात् ॥२॥

उपजातिः

अजं परिच्छेद-विहीनमेकं
नित्यं विमुक्तं विभुमद्वितीयम् ।
सच्चित्सुखस्वीयतनुं महान्तं
पुमांसमाद्यं गुरुमूर्त्तिमीडे ॥३॥

आकाशवाय्वाश्रयभोजिवारि—
धराः स्वसङ्कल्पमहामहिम्ना ।
तन्मात्रिकाः पञ्च सृजन्तमादौ
पुमांसमाद्यं गुरुमूर्त्तिमीडे ॥४॥

गाङ्गेयगर्भं स्वयमेव सृष्ट्वा
साङ्गा श्रुति [ती] श्चापि वितीर्यं तस्मै ।
तं सर्वलोकानभ [न्नथ] सर्जयन्तं
पुमांसमाद्यं गुरुमूर्त्तिमीडे ॥५॥

सदा जनानां हृदये वसन्तं
यन्त्राधिरूढानिव सर्वजन्तून् ।
विभ्रामयन्तं निजमाययैनं
पुमांसमाद्यं गुरुमूर्त्तिमीडे ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदा तदा धर्मकृते जगत्यां
स्वकीयमायासचिवीप्रभूय ।
गृह्णन्तमिन्द्रावरजादिरूपं
पुमांसमाद्यं गुरुमूर्त्तिमीडे ॥७॥

अनाद्यनन्तं हृदये वसन्तं
वसन्तवल्लोकहितं चरन्तम् ।
उत्तेजयन्तं नतलोकबुद्धिं
भजे महान्तं शरणं गुरुं तम् ॥८

प्रचोदयन्तं सुकृतेषु लोकान्
निवारयन्तं कुकृतीस्तदीयाः ।
संशोधयन्तं नतमानसानि
भजे महान्तं शरणं गुरुं तम् ॥९

विश्राणयन्तं सकलं नतेष्टं
निर्मूलयन्तं सकलामविद्याम् ।
प्रदर्शयन्तं जनिमोक्षमार्गं
भजे महान्तं शरणं गुरुं तम् ॥१०॥

दीनान् विषण्णान् परिसान्त्वयन्तं
पादाब्जनम्रान् परिपालयन्तम् ।
विज्ञानवह्निं हृदि दीपयन्तं
भजे महान्तं शरणं गुरुं तम् ॥११॥

दान्तं प्रशान्तं नतशुक्कृतान्तं
कृतान्तमन्तं सहसा नयन्तम् ।
ध्वान्तं नयन्तं विलयं नयन्तं
भजे महान्तं शरणं गुरुं तम् ॥१२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीहायनाधिनाथस्तोत्रम्

[मन्दाक्रान्ता]

देवालीड्यान्नुतरिपुहरान् भक्तमार्गीर्जितेन्द्र-
देवाचार्यान् हृतकुमरणांस्त्यक्तसर्वाप्यपादान् ।
द्रव्यातीतान् सकरुणहृदो विष्णुशम्भ्वादिरूपान्
वन्दे नित्यं दुरितशमनान् हायनस्थाधिनाथान् ॥१॥

इष्टातीदान् भुजगपतिनुतान् कान्तिदेदीप्यमानान्
मौनिध्येयान् परमपददान् भक्तिमत्कल्पवृक्षान् ।
राज्यस्रष्टॄन् मृदुलहृदयाँस्तत्त्वविज्ञानदातॄन्
वन्दे नित्यं त्रिभुवनपतीन् हायनस्थाधिनाथान् ॥२॥

भीतिघ्नार्चान् हृलनतरुजानुद्धतोच्छेदसक्तान्
पुष्पाल्यर्चान् यमिनुतपदान् देवदैत्याहृताङ्घ्रीन् ।
क्षान्त्यम्भोधीन् प्रशममुखदान्छ्रान्तिविच्छेददक्षान्
वन्दे नित्यं मतिविजयदान् हायनस्थाधिनाथान् ॥३॥

●

श्रीहिमगिरिवर्ष्मसम्भवास्तुतिः

[नन्दनम्]

अहिरिपुमुख्यदेवविनुते समस्तलोकाधिपे
शुभनिकरप्रदाननिपुण कृपाकरस्वाशये ।
प्रणतजनार्त्तिभञ्जनचणे रथेभमुख्यप्रदे
हिमगिरिवर्ष्मसम्भवतनो पदनतं पाहि माम् ॥१॥

नतजनहर्षसागरविधो विरक्तलोकप्रिये
भुजगमहीप (धनेव) संस्तुतपदे समस्त-विद्येश्वरि ।
प्रणतजनेष्टदाननियम-शशाङ्कधृद्वल्लभे
क्षितिधरवर्ष्मसम्भवतनो पदानतं पाहि माम् ॥२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रितसकलर्द्धिदाननिरते निलिम्पपूगेहिते
निखिलविभूतिदानचतुरे समस्तपापापहे ।
निटिलकुलेखमार्जनपटो कृपाजनुर्मेदिनि
क्षितिधरत्रर्ष्मसम्भवतनो पदानतं पाहि माम् ॥३॥
इहपरसौख्यदानकुशले विधूतबिम्बाधरे
निटिलगदृक्प्रसादविभवे (रुचिरे) नयव्रजाधीश्वरी ।
सुषमजनुर्धरित्रि वपुषो जिताक्षलभ्याङ्घ्रिके
गिरिपतिवर्ष्मसम्भवतनो पदाश्रितं पाहि माम् ॥४॥

●

श्रीजगदम्बा (पद्मा) स्तुतिः

[विद्युन्माला]

रागिविदूरा पायात् पद्मा ॥१॥
योगाप्यङ्घ्रिः पायात् पद्मा ॥२॥
देवार्च्याङ्घ्रिः पायात् पद्मा ॥३॥
जारठ्यघ्नीः पायात् पद्मा ॥४॥
दुर्मृत्युघ्नी पायात् पद्मा ॥५॥
दत्तैश्वर्या पायात् पद्मा ॥६॥
विद्यादात्री पायात् पद्मा ॥७॥
कारुण्याब्धिः पायात् पद्मा ॥८॥
गौरीपूज्या पायात् पद्मा ॥९॥
दन्त्यादिस्पृक् पायात् पद्मा ॥१०॥
नम्राघघ्नी पायात् पद्मा ॥११॥
भोगीड्वर्ण्या पायात् पद्मा ॥१२॥
मर्मच्छाया पायात् पद्मा ॥१३॥
कीरस्तव्या पायात् पद्मा ॥१४॥
हंसीकण्ठी पायात् पद्मा ॥१५॥
इष्टस्रष्ट्री पायात् पद्मा ॥१६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मस्प्रष्ट्री पायात् पद्मा ॥१७॥
अर्थस्प्रष्ट्री पायात् पद्मा ॥१८॥
कामस्प्रष्ट्री पायात् पद्मा ॥१९॥
मोक्षस्प्रष्ट्री पायात् पद्मा ॥२०॥
पद्माद्यर्च्या पायात् पद्मा ॥२१॥
ज्ञानस्प्रष्ट्री पायात् पद्मा ॥२२॥
राजस्प्रष्ट्री पायात् पद्मा ॥२३॥
सर्वाध्यक्षा पायात् पद्मा ॥२४॥
व्याधिघ्नी मा पायात् पद्मा ॥२५॥
दैत्यघ्नी मा पायात् पद्मा ॥२६॥
अब्भूहस्ता पायात् पद्मा ॥२७॥
योगिध्येया पायात् पद्मा ॥२८॥
शम्भ्वाद्यर्च्या पायात् पद्मा ॥२९॥
शान्त्यादिस्पृक् पायात् पद्मा ॥३०॥
श्रान्तिघ्नी मा पायात् पद्मा ॥३१॥
योगस्प्रष्ट्री पायात् पद्मा ॥३२॥
क्षान्त्यम्भोधिः पायात् पद्मा ॥३३॥
भद्रं दत्त्वा पायात् स्तोतॄन् ॥३४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकाशक
मधुभारती ग्रन्थमाला प्रकाशन ट्रस्ट
के लिए
भा र ती य वि द्या भ व न
चौपाटी : बम्बई-७

Dr. Urmila Sharma Collection, Varanasi